ગચ્છરા નાયક મ્હારા ! પટરા લાયક પ્યારા ! વંદિઈ સુજ્ઞાની !
તપગચ્છ તિલક સવાય હોં. (એ આંકણી) ૧

શ્રાવકદિનકર નેં વલી સુ૦, સિદ્ધપંચાસિકા નામ હોં,
ધર્મરત્નગ્રંથ એ તીનની સુ૦, વૃત્તિકરણ ગુણધામ હો. ગ૦ ૨

ભાષ્ય ને કર્મગ્રંથ પાંચ જે સુ૦, ચરિત્ર સુદર્શન સાર હો,
ઈત્યાદિક બહુ ગ્રંથના સુ૦, કરતા જગ ઉપગાર હો. ગ૦ ૩

વિહરંતા માલવ દેસમાં સુ૦, કરી ઉપગાર સવાય હો,
સંવત તેર સત્તાવીસ(૧૩૨૭) સુ૦, સૂરિ અમરપદ પાય હો. ગ૦ ૪

— શ્રી દીપવિજયજી વિરચિત સોહમકુલરત્નપટ્ટાવલી રાસ.

૨ - દેવિંદસૂરિ દેવે વંદિઉ... ... ... ... ॥૭॥

— અજ્ઞાતકર્તૃક તપાગચ્છ ગુર્વાવલી રાસ.

૩ - તઉ ગુણમણિ ભંડારુ, સિરિ દેવિંદમુણિંદ પરુ, જો આગમ લહુકીણુ, સાર સુત્ત વરવિત્તિ કરું. ૧૦

— શ્રીભુવનસુંદરસૂરિશિષ્યવિરચિત શ્રીતપાગચ્છ ગુર્વાવલી.

૪ - ... ... ... તાસ પટ્ટિ દેવિંદ દિવામણિ ... ... ... ... ॥૪૫॥

— શ્રીવિબુધવિમલશિષ્ય વિરચિત શ્રીતપાગચ્છપટ્ટાનુક્રમગુર્વાવલી છંદ.

૫ - ... ... તસ પાટિ પ્રભાવક વેદ જાણ, દેવિંદસૂરીસર જુગપહાણ. ૭
સોહાવી જિણઈ વડી સાખ, પ્રતિબોધ્યા શ્રાવકતણા લાખ; .. ... ..॥૮॥

— આચાર્યશ્રી જયકલ્યાણસૂરિશિષ્ય વિરચિત તપાગચ્છ કમલકલશશાખા-ગુર્વાવલી.

૬ - **દેવિંદ** ગણધર ધુરિ પાટ, કિય લઘુશાલા આધાટ;
સ્તંભનયરી આભૂ વંશધારી, સોની સંગ્રામ માલાકારી ૨૮

ગચ્છનાયક તે લઘુશાલા, આચારથી વૃદ્ધશાલા;... ... ... ... ૨૯

— આચાર્યશ્રી સોમવિમલસૂરિ વિરચિત તપાગચ્છનાયક પટ્ટાવલી સજ્ઝાય.

૭ - તસપટિ સૂરિ શ્રી **દેવેન્દ્ર** ૪૭......૧૬

— શ્રી વિનયસુંદરગણિ વિરચિત શ્રીતપાગચ્છગુર્વાવલી સ્વાધ્યાય.

૮ - **શ્રી દેવેન્દ્રસૂરિસરું** તસ પાટઈ શ્રૃંગાર
કર્મગ્રંથિ જેણઈ કીયા ભાષ્યાદિ સુવિચાર. ૫૫

— મહો. શ્રી વિનયવિજય મ. વિરચિત શ્રીગણધરપટ્ટાવલી સજ્ઝાય.

१ - श्री जगचन्द्र सूरि पट्टे देवेन्द्र सूरि हुए। सो मालवे की उज्जैन नगरी में जिनचंद्र नामा बडे सेठ का श्रीदेवेन्द्रसूरि तथा वीरधवल नामा पुत्र, तिसके विवाह निमित्त महोत्सव हो रहा था, तब वीरधवलकुमार को प्रतिबोध करके संवत् १३०२ में दीक्षा दीनी, तिस पीछे तिस के भाई को भी दीक्षा देकर चिरकाल तक मालव देश में विचरे। तिस पीछे गुर्जर देश में श्री देवेन्द्रसूरि स्थंभतीर्थ में आये। तहां पहिले श्री विजयचंद्र सूरि गीतार्थों को पृथक् पृथक् वस्त्र के पोटले देता है, और नित्य विगय खाने की आज्ञा देता है, और वस्त्र धोने की तथा फल, शाक लेने की और निर्विकृत के प्रत्याख्यान में विगयगत का लेना कहता है। और आर्या का लाया आहार साधु खावे, यह आज्ञा देता है, और दिन प्रति द्विविध प्रत्याख्यान और गृहस्थों के अवर्जने वास्ते प्रतिक्रमण करने की आज्ञा देता है। और संविभाग के दिन में तिस के घर में गीतार्थ जावे, लेप की संनिधि रखनी, तत्कालोष्णोदक का ग्रहण करना, इत्यादि काम करने से कितनेक साधु शिथिलाचार्यों के साथ लेकर सदोष पौषधशाला में रहता था।

इन विजयचंद्राचार्य की उत्पत्ति ऐसे है। मंत्री वस्तुपाल के घर में विजयचंद्र नामा दफतरी था। वो किसी अपराध से जेलखाने में कैद हुआ, तब देवभद्र उपाध्याय ने दीक्षा की प्रतिज्ञा करवा कर छुडा दिया। पीछे तिसने दीक्षा लीनी। सो बुद्धिबल से बहुश्रुत हो गया तब मंत्री वस्तुपाल ने कहा कि ये अभिमानी है, इस वास्ते सूरि पद के योग्य नहीं हैं। इस तरह मना करने पर भी जगचंद्र सूरि जी ने देवभद्र उपाध्याय के कहने से सूरि पद दे दिया। यह देवेन्द्रसूरि का सहायक होवेगा, ऐसा जान कर सूरि पद दिया। पीछे वह विजयचंद्र बहुत काल तक देवेंद्र सूरि के साथ विनयवान् शिष्य की तरह वर्त्तता रहा। परन्तु जब मालव देश से देवेंद्र सूरि आये, तब वंदना करने को भी नहीं आया। तब देवेंद्र सूरिजी ने कहला भेजा कि एक बस्ती में तुम बारह वर्ष कैसे रहे ? तब विजयचंद्र ने कहा कि शांत दांतों को बारह वर्ष एक जगह में रहने से कुछ दोष नहीं। संविग्नसाधु सर्व देवेंद्रसूरि के साथ रहे, और देवेंद्र सूरिजी तो अनेक संविग्न साधु समुदाय के साथ उपाश्रयमें ही रहे। तब लोकोंने बडीशाला में रहने से विजयचंद्र सूरि के समुदाय का नाम वृद्ध पौशालिक रक्खा और देवेंद्र सूरिजी के समुदाय का लघुपौशालिक नाम दिया। और स्थंभतीर्थ के चौक में कुमारपाल के विहार में धर्मदेशनामें मंत्री वस्तुपाल ने चारों वेदों का निर्णयदायक, स्वसमय परसमय के जानकार देवेंद्र सूरिजी को वंदना दे के बहुमान दिया। और देवेंद्रसूरिजी विजयचंद्र की उपेक्षा करके विचरते हुये क्रम से पाल्हणपुर में आये। तहां चौरासी इभ्य सेठ अनेक पुरुषों के साथ परिवरे, सुखासन ऊपर बैठे हुये, शास्त्र के बडे श्रोता व्याख्यान सुनने आते थे। और पालनपुर के विहार में रोज की रोज एक मूढक प्रमाण अक्षत और सोलह मन सोपारी दर्शन करने वाले श्रावकों की चढाई चढती थी, इत्यादि। बडे धर्मी लोगों ने गुरु को विनति करी कि 'हे भगवन् ! यहां आप किसी को आचार्य पदवी देकर हमारा मनोरथ पूरा करो। तब गुरु ने उचित जान के पालनपुर में विक्रम संवत् १३२३ में विद्यानंद सूरि नाम दे के वीरधवल को सूरिपद दीना; और तिस के अनुज भीमसिंह को धर्मकीर्ति उपाध्याय की पदवी दीनी। तिस अवसर में प्रह्लादन विहार के सौवर्ण कपिशीर्ष मंडप से कुंकुम की वर्षा हुई, तब सर्व लोगों को बडा आश्चर्य हुआ। श्री विद्यानंद सूरि ने विद्यानंद नाम नवीन व्याकरण बनाया, यदुक्तम्—

'विद्यानंदाभिधं येन कृतं व्याकरणं नवम्। भाति सर्वोत्तमं स्वल्पसूत्रं बह्वर्थसंग्रहम् ॥'

पीछे श्री देवेंद्र सूरिजी फिर मालवे को गये। देवेंद्र सूरिजी के करे हुये ग्रंथो का नाम लिखते हैं:-१. श्राद्धदिनकृत्यसूत्रवृत्ति, २. नव्यकर्मग्रंथपंचकसूत्रवृत्ति, ३, सिद्धपंचाशिकासूत्रवृत्ति, ४. धर्मरत्नवृत्ति, ५. सुदर्शनचरित्र, ६. तीन भाष्य, ७. वृंदारवृत्ति, ८. सिरिउसहवद्धमाण प्रमुख स्तवन। कोई कहते हैं कि श्राद्धदिनकृत्यसूत्र तो चिरंतन आचार्यों का करा है। विक्रम संवत् १३२७ में मालवदेश में देवेंद्र सूरि स्वर्गवास हुए।

# પરિશિષ્ટ-૭

## સપ્તતિકા પ્રકરણ ઉપરનું પ્રાકૃત/સંસ્કૃત/ગુજરાતી વ્યાખ્યાસાહિત્ય

| | | | |
|---|---|---|---|
| | સપ્તતિકા | અજ્ઞાત | ગા. ૭૦ |
| ૧ | સપ્તતિકા અન્તર્ભાષ્ય | અજ્ઞાત | ગા. ૭૦ |
| ૨ | સપ્તતિકા ચૂર્ણિ | અજ્ઞાત | |
| ૩ | સપ્તતિકા પ્રાકૃતવૃત્તિ | શ્રીચન્દ્રર્ષિમહત્તર | શ્લો. ૨૩૦૦ |
| ૪ | સપ્તતિકા વૃત્તિ | શ્રીમલયગિરિસૂરિ | શ્લો. ૩૭૮૦ |
| ૫ | સપ્તતિકા ભાષ્ય | શ્રી અભયદેવસૂરિ | ગા. ૧૯૧ |
| ૬ | સપ્તતિકા વૃત્તિ | શ્રીદેવન્દ્રસૂરિ | |
| ૭ | સપ્તતિકા ભાષ્ય વૃત્તિ | શ્રીમેરુતુંગસૂરિ | શ્લો. ૪૧૫૦ |
| ૮ | સપ્તતિકા ટિપ્પણ | શ્રીરામદેવ | શ્લો. ૫૭૪ |
| ૯ | સપ્તતિકા અવચૂર્ણિ | શ્રીજ્ઞાનસાગરસૂરિ | |
| ૧૦ | સપ્તતિકા અવચૂર્ણિ | શ્રીગુણરત્નસૂરિ ૨.સં. ૧૪૫૯ - શ્લો. ૧૦૦૦ | |
| ૧૧ | સપ્તતિકા અવચૂરિ | શ્રીગુણરત્નસૂરિ | ૨.સં. ૧૪૮૬ |
| ૧૨ | સપ્તતિકા (અવ)ચૂર્ણિ | શ્રી સોમસુંદરસૂરિ | |
| ૧૩ | સપ્તતિકા વૃત્તિ | શ્રીમુનિશેખર | શ્લો. ૪૧૫૦ |
| ૧૪ | સપ્તતિકા બાલાવબોધ | શ્રી ભુવનકુશલગણિ | ૨.સં. ૧૫૯૭ |
| ૧૫ | સપ્તતિકા બાલાવબોધ | શ્રીધનવિજયગણિ | ૨.સં. ૧૭૦૦ |
| ૧૬ | સપ્તતિકા બાલાવબોધ | શ્રીરાજહંસ | |
| ૧૭ | સપ્તતિકા બાલાવબોધ | શ્રી પાર્શ્વચંદ્ર સૂ. શિષ્ય | |
| ૧૮ | સપ્તતિકા સ્તબક | શ્રીસંઘસોમ | |
| ૧૯ | સપ્તતિકા સ્તબક | શ્રીજયસોમમુનિ | |
| ૨૦ | સપ્તતિકા સ્તબક | શ્રીજિનવિજયગણિ | |
| ૨૧ | સપ્તતિકા બાલાવબોધ | શ્રીમતિચન્દ્રગણિ | |
| ૨૨ | સપ્તતિકા બાલાવબોધ | શ્રીયશઃસોમમુનિ(જસસોમ) | |
| ૨૩ | સપ્તતિકા કર્મગ્રન્થયન્ત્ર | શ્રીસુમતિવર્ધન | |
| ૨૪ | સપ્તતિકા સ્તબક | શ્રીજીવવિજયજી | સં. ૧૮૦૩ |
| ૨૫ | સપ્તતિકા કર્મગ્રન્થ યન્ત્ર | શ્રીલબ્ધિવિમલ | |
| ૨૬ | સત્તરી બાલાવબોધ | શ્રીલાવણ્યભદ્રગણિ શિષ્ય | |

[ આ સિવાય સપ્તતિકાપ્રકરણ ઉપર બીજા પણ જ્ઞાત/અજ્ઞાતકર્તૃક અનેક અવચૂરિઓ/સ્તબકો તથા બાલાવબોધો આદિની રચના થઈ છે. ]

# પરિશિષ્ટ-૮

## પૂ. આચાર્યશ્રી ગુણરત્નસૂરિનિર્મિત ગ્રંથો

૧ કલ્પાન્તર્વાચ્ય — ર.સં.૧૪૫૭
૨ કર્મગ્રન્થ અવચૂર્ણિ (૧ થી ૫) — ર.સં.૧૪૫૯
૩ સપ્તતિકા અવચૂર્ણિ — ર.સં. ૧૪૫૯ — શ્લો. - ૩૧૦૦
૪ ક્રિયારત્નસમુચ્ચય — ર.સં. ૧૪૬૬ — શ્લો. ૫૬૬૧
૫ પ્રમાણનયતત્વ રહસ્ય
૬ ષડ્દર્શન સમુચ્ચય બૃહદ્વૃત્તિ (તર્કરહસ્ય દીપિકા)
૭ પ્રતિષ્ઠાકલ્પ
૮ ભક્તામરસ્તોત્ર અવચૂરિ (સુખબોધિવૃત્તિ) શ્લો. ૩૭૦
૯ કલ્યાણ મંદિર સ્તોત્ર અવચૂરિ
૧૦ શતક અવચૂરિ
૧૧ નવ્ય બૃહત્ક્ષેત્રસમાસ અવચૂરિ
૧૨ નવતત્વ અવચૂરિ
૧૩ ઓઘનિર્યુક્તિ ઉદ્ધાર
૧૪ ચતુ:શરણપયન્ના અવચૂરિ
૧૫ આતુરપ્રત્યાખ્યાનપયન્ના અવચૂરિ
૧૬ ભક્તપરિજ્ઞાપયન્ના અવચૂરિ
૧૭ સંસ્તારક પયન્ના અવચૂરિ
૧૮ વાસોન્તિકવિતંડા વિડંબના પ્રકરણ (અંચલમતનિરાકરણ)
૧૯ કર્મગ્રંથ અવચૂરિ (૧ થી ૬) ર. સં. ૧૪૮૬- શ્લો. ૫૬૭૦
૨૦ તત્વચિન્તામણિ ટિપ્પન[1]

---

૧- લાલભાઈ દલપતભાઈ ભારતીય સંસ્કૃતિ વિદ્યામંદિર (અમદાવાદ)માં ન્યાયનો ગ્રન્થ તત્વચિંતામણિ ેશોપાધ્યાયકૃત) ઉપર અસોથી ગણસો પત્ર પ્રમાણ શ્રી ગુણરત્ન સૂ.મ. વિરચિત ટિપ્પન છે એમ પં.શ્રી અમૃતભાઈએ એટલે અમે લા.દ. તરફથી પ્રસિદ્ધ થયેલ લા.દ. સ્થિત હસ્તપ્રતોની સૂચીના ચારેભાગ તપાસી ગયા પણ આ ટિપ્પન ને જોવા નથી મળ્યું. વિશેષમાં પં. અમૃતભાઈનું કહેવું છે કે આ ટિપ્પન તેમણે તથા આગમપ્રભાકર મુનિશ્રી પુણ્ય ્યજી મહારાજે જોયું પણ છે. અમે ઘણી તપાસ કરી છતાં અમને આ નામ જોવા નથી મળ્યું તે છતાં પંડિતજીના ાથી આ નામ અત્રે નોંધ્યું છે.

## પરિશિષ્ટ-૯[1]

| | |
|---|---|
| ૧. ન્યાયસિદ્ધાન્ત દીપ ટિપ્પન (શશધર ટિપ્પન) | વાચનાચાર્ય ગુણરત્નગણિ |
| ૨. ગણધરવાદ | ગુણરત્નસૂરિ |
| ૩. કુલપાક તીર્થ મંડન શ્રીઋષભજિનસ્તવન | ગુણરત્નસૂરિ |
| ૪. શંખેશ્વર પાર્શ્વનાથ સ્તોત્ર | ગુણરત્નસૂરિ |
| ૫. મુદ્રાવિચાર | ગુણરત્ન |
| ૬. વિચારસંગ્રહ | ગુણરત્નસૂરિ |
| ૭. ક્ષેત્ર સમાસ પ્રકરણ બાલાવબોધ | ગુણરત્નસૂરિ |
| ૮. મેરુત્રયોદશી કથા સ્તબક | ગુણરત્નસૂરિ |
| ૯. મેઘદૂત પંજિકા | ગુણરત્ન |

## પરિશિષ્ટ-૧૦

### આચાર્ય શ્રી ગુણરત્નસૂરિ મહારાજ

**१ - भूतभाविभवत्सूरिक्रमरेणुकणोपमः । सूरिः श्रीगुणरत्नाह्वस्तृतीयः समजायत ॥६०॥**

— श्रीगुणरत्नसूरिविरचित क्रियारत्नसमुच्चय-प्रशस्ति ।

२ - देवसुन्दरगुरुक्रमपद्मोपास्तिविस्तृतसमस्तगुणा ये ।
तद्विनेयवृषभा विजयन्ते कीर्तयामि ततकीर्तिततींस्तान् ॥३७६॥
आद्या जयन्ति गुणरत्नमुनीन्द्रचन्द्राः सूरीश्वराः सुगुणरत्नविभूषणैर्यैः ।
सा काऽप्यवापि सुभगत्वरमा यया तान् श्लिष्यन्ति सर्वबुधमानसवृत्तिनार्यः ॥३७७॥

---

૧-આ પરિશિષ્ટમાં અમે પૂ. આચાર્ય શ્રી દેવસુંદર સૂ. મ. ના શિષ્ય પૂ. આ. શ્રી ગુણરત્નસૂરિ મહારાજથી ભિન્ન ગુણરત્નગણિ/સૂરિ/મુનિકર્તૃક જે ગ્રંથો પ્રાપ્ત થાય છે તેની નામાવલી આપી છે.

तेषां निर्जितवादिराजिकुयशोजम्बालजालाविले
भ्रान्त्वा भूवलयेऽखिलेऽथ चलिता खं स्वर्गदण्डाध्वना।
श्रान्ती श्रान्तिहृतीच्छयेन्दुसरसि स्वैरं सुधाशीकरान्
कीर्तिर्यान् विकिरत्यमी प्रतिनिशं दृश्या ग्रहादिच्छलात् ॥३७८॥
यज्जाता हिमभूभृतः पशुपतेः पत्नीति कः प्रत्ययस्तत्कीर्तिर्जनिताऽमुनेति तु सतां नूनं प्रतीतेः पथः।
एषा यद्धवला हिमाऽपि जनयेद् म्लानिं जवाद् वादिनां वक्त्राम्भोजगणेषु निर्दहति च प्रोद्दामदर्पद्रुमान् ॥३७९॥
ग्रन्थेषु येषु न परस्य धियां प्रवेशोऽप्येतेष्वपि प्रसरतीह तदीयबुद्धिः।
संभाव्यवत्यपि तदाश्रितमन्यमर्थं यः सोऽपि दैत्यारिपुणा किमु नो ममन्थे ? ॥३८०॥
जगदुत्तरो हि तेषां नियमोऽवष्टम्भरोषविकथानाम्। आसन्नां मुक्तिरमां वदति चरित्रातिनैर्मल्यात् ॥३८१॥
सिद्धत्वात् सार्ववैद्यस्य ते सिद्धपुरुषोत्तमाः। तदाप्ततत्कणाः शिष्या यद्वशीकुर्वते जगत् ॥३८२॥
सर्वव्याकरणावदातहृदयाः साहित्यसत्यासवो गम्भीरागमदुग्धसिन्धुलहरीपानैकपीताब्धयः।
न्यायोज्योतिषनिस्तुषाः प्रदधतस्तर्केषु चाऽऽचार्यकं वादे तेऽत्र जयन्त्यशेषविदुषां त्रैवैद्यदर्पोच्चलान् ॥३८३॥
उत्कल्लोलं दिशि दिशि बुधाः कर्णपात्रैः पिबन्तः स्फीतं गीतं सुकृतिततिभिस्तद्यशःक्षीरपूरम्।
तेषां शुद्धां चरणकमलां बिभ्रतां श्रीगुरूणां सृष्ट्या स्रष्टा जगदुपकृतं मन्यते सांप्रतं वै ॥३८४॥
परमेष्ठिमन्त्रतत्त्वाम्नायस्मरणेन दैवतादेशैः। पारत्रिक्यैहिकीस्ते प्रायो जानन्ति कार्यगतीः ॥३८५॥
स्वदर्शने वा परदर्शनेषु वा ग्रन्थः स विद्यासु चतुर्दशस्वपि।
समीक्ष्यते नैव सुदुर्गमेऽप्यहो ! यत्र प्रगल्भा न तदीयशेमुषी ॥३८६॥
या ज्ञानाद्युद्यमप्रौढिर्या च नित्याऽप्रमादिता। या चैषां स्मरणशक्तिः साऽन्यत्र श्रूयतेऽपि न ॥३८७॥
चक्रुष्टीकाशलाकां ते षड्दर्शनसमुच्चये। ज्ञाननेत्राञ्जनायेव सत्ता तत्त्वार्थदर्शिनीम् ॥३८८॥
उद्धृत्य ये व्याकरणाम्बुराशितो विलोक्य बुद्धिप्रसरामराद्रिणी
शुद्धक्रियारत्नसमुच्चयं सतामाश्चर्यभूतं विबुधालये ददुः ॥३८९॥
लोकोत्तरां सच्चरणश्रियं मुदा सदा भजन्तश्च सरस्वतीं प्रियां
दुष्कर्मदैत्यव्यथका जयन्तु ते गुरुप्रवेकाः पुरुषोत्तमाश्चिरम् ॥३९०॥ (युग्मम्)

— श्री मुनिसुन्दरसूरिविरचिता गुर्वावली।

२ - श्रीगुणरत्नसूरीणां चासाधरणो नियमः।
तदुक्तं- 'जगदुत्तरो हि तेषां नियमोऽवष्टंभरोषविकथानां,

आसन्नां मुक्तिरमां वदंति चरित्रादिनैर्मल्यात्' ॥ इति (गुर्वावलि श्लोक ३८२)

तत्कृताश्च ग्रन्थाः - क्रियारत्नसमुच्चयः, षड्दर्शनसमुच्चयबृहद्वृत्त्यादयः ॥

— महो० श्रीधर्मसागरगणिविरचित तपागच्छपट्टावली सूत्र गाथा-१६ वृत्ति ।

४. श्रीदेवसुन्दरसूरीणां च.......श्रीगुणरत्नसूरयः....... अनेकग्रन्थकर्तारः शिष्याश्चाऽभवन् ४९ ।

— उपा० श्रीरविवर्धनगणिविरचित- श्रीपट्टावलीसारोद्धार ।

५. श्रीदेवसुन्दरगुरोरथ पञ्च शिष्याः........... चञ्चद्गुणश्च गुणरत्नगुरुर्महात्मा........॥२८॥

— महो० श्रीविनयविजयविरचित लोकप्रकाश-प्रशस्ति ।

६. हैमव्याकरणाम्भोधिः येऽवगाह्य महाधियः । अभिज्ञानमिवाकार्षुः क्रियारत्नसमुच्चयम् ॥६॥

ये वैयाकरणवर्यास्ते श्रीगुणरत्नसूरयः । अन्येऽपि शाब्दिकश्रेष्ठा विजेजीरन् महर्षयः ॥७॥

— महो० श्रीविनयविजयविरचित हैमलघुप्रक्रियास्वोपज्ञवृत्तिप्रशस्ति ।

## ઢાળ ૪૦

૧. વલિ એહ સૂરિને પટ પંચાસમેં સા० સૂરિ ગુણનૂરી પંચ કહાય ગુ०;
જ્ઞાનસાગરસૂરિ કુલમંડન સૂરિ સા० ત્રીજા શ્રી ગુણરત્નસૂરિ સોહાય ગુ० વં. ૩.
ત્રીજા ગુણરત્નસૂરિ ગચ્છરાજજી સા० કીધા જેણે ગ્રંથ તણા સમુદાય ગુ०;
સમુચ્ચય ષડ્દર્શન વૃત્તિ કરી સા० ટીકા વલી ક્રિયારતનસમુચા(ચ્ચ)ય ગુ० વં. ૭.

— શ્રી દીપવિજયકૃત સોહમકુલરત્ન પટ્ટાવલીરાસ.

૨ - સૂરિ શ્રી ગુણરયણ વખાણઉં, ગરુઉ ગણહર ગરૂં પ્રમાણું, પ્રણમઉં જ્ઞાન ભંડારો. ૨૨

— અજ્ઞાતકર્તૃક તપાગચ્છગુર્વાવલીરાસ.

૩ - ભવિયણ ભવદહદાહ વારિવિલાસણ અમિયઘણુ
સિરિ ગુણરયણસૂરિ દૂરિ પણાસિઅ મોહભડુ. ૧૮

— શ્રીભુવનસુંદરસૂરિશિષ્યવિરચિત શ્રીતપાગચ્છ ગુર્વાવલી.

१ - तीसरे श्रीगुणरत्नसूरि, तिनके करे ग्रन्थ-१. क्रियारत्नसमुचय, २- षड्दर्शनसमुच्चयकी बृहद्वृत्ति है ।

— आत्मारामजीम.विरचित जैनतत्वादर्श - द्वादशपरिच्छेद ।

# परिशिष्ट-११

## सङ्केतस्पष्टीकरणम्

| | |
|---|---|
| सि० हे० | = सिद्धहेमशब्दानुशासन |
| आ० नि० गा० | = आवश्यकनिर्युक्तिगाथा |
| जीव० गा० | = जीवसमासगाथा |
| वि० प० श० | = वियाहपण्णत्तिशतक |
| उ० | = उद्देश |
| सू० | = सूत्र |
| बृ० श० गा० | = बृहच्छतकगाथा |
| पं० सं० गा० | = पञ्चसङ्ग्रहगाथा |
| क० प्र० | = कर्मप्रकृति |
| क० वि० | = कर्मविपाक |
| बृ० सं० | = बृहत्सङ्ग्रहणि |
| विशे० गा० | = विशेषावश्यकभाष्यगाथा |
| न्याय० | = न्यायसङ्ग्रह |
| क० स्त० गा० | = कर्मस्तवगाथा |
| प्र० सा० गा० | = प्रवचनसारोद्धारगाथा |

## अनुक्रमणिका


| | पृष्ठ |
|---|---|
| १. प्रथमकर्मग्रन्थ-अवचूर्णि | १ |
| २. द्वितीयकर्मग्रन्थ-अवचूर्णि | १९ |
| ३. तृतीयकर्मग्रन्थ-अवचूर्णि | ३३ |
| ४. चतुर्थकर्मग्रन्थ-अवचूर्णि | ४३ |
| ५. पञ्चमकर्मग्रन्थ-अवचूर्णि | ७० |
| ६. षष्ठकर्मग्रन्थ-अवचूर्णि | ११६ |

# शुद्धिपत्रकम्

| पृ. / पं. | शुद्धपाठः | पृ. / पं. | शुद्धपाठः | पृ. / पं. | शुद्धपाठः |
|---|---|---|---|---|---|
| १/८ | °समृद्धचा | ४१/२१ | °ष्ट्याप° | ११८/१२ | चतुर्विंध |
| १/११ | कर्म पु° | ४९/१३ | °मुद्धाना° | १२१/१३ | व्यवच्छिन्ने |
| १०/५ | °पुद्गला | ५१/११ | °रिन्द्रियेऽसं° | १२२/२० | °लात्पूर्वं |
| ११/६ | °पुद्गलैश्च | ५२/१४ | °लमनो° | १२७/४ | °दयस्था° |
| ११/१२ | पंचविहं | ५४/२१ | क्रोधादि° | १२८/१६ | त्रयाणां |
| १४/१ | °मुद्योत° | ५५/१३ | °सम्यक्त्वा° | १३२/१ | चतुर्विंशतिः |
| १६/१६ | °शुद्धह° | ५६/१४ | देश° | १३२/९ | °दृष्टेरूप° |
| १७/१ | °सणाम° | ५८/१८ | °योगत्र° | १४४/१२ | °विंशत्यु° |
| २०/१२ | °गुणस्था° | ६०/१९ | बध्नन्ति | १४७/११ | पञ्चविंश° |
| २३/४ | °शान्तत्वसम्भ° | ६३/१५ | द्व्यणुक° | १५०/९ | °बादरद्वीन्द्रियत्री° |
| २३/५ | °न्वगृह° | ६४/१६ | जघन्यं | १५०/२३ | °रकसा° |
| २३/१४ | मनःप° | ७३/१७ | °तुर्विंश° | १५२/५ | °तद्वय° |
| २३/१७ | °रुत्तरका° | ७४/६ | °न्तकरू° | १५२/६ | °दिप्रकृ° |
| २३/१८ | °रोधानन्तरं | ७४/७ | °मवश्यं | १५८/१० | °सम्मूर्च्छिम° |
| २५/४ | °दिवाम° | ७९/१९ | लिङ्गं बि° | १५८/१८ | °हारक° |
| २६/४ | °रीराङ्गो° | ८९/१७ | °बादर° | १६३/११ | °न्द्रियसा° |
| ३२/१४ | सङ्क्रान्त° | ८९/२१ | अस० ततोऽप्यस° | १६७/३ | दयोदी° |
| ३३/८ | °वीसवज्जं | ९२/१८ | °प्तोऽबन्ध° | १७२/१ | °गाद्धाया° |
| ३६/८ | लब्ध्य० | ९२/२० | °पल्यस्थि° | १७७/६ | य हणाइ |
| ३८/९ | चतुर्विंश० | ९६/१९ | °क्षेत्वङ्ग | १८०/३ | °चूर्णीकृत्यश° |
| ३९/२० | यथाख्याते | १०१/२० | °त्कृष्टानु | १८०/९ | ग्रं |
| ४१/२० | °ध्यात्वौघ° | ११२/१६ | °कर्षतस्तु | | |

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

॥ नमोनमः श्रीगुरुप्रेमसूरये ॥

श्रीगुणरत्नसूरिविरचित- अवचूर्ण्युपेतः

श्रीदेवेन्द्रसूरिविरचितः

# कर्मविपाकनामा प्रथमः कर्मग्रन्थः

सिरिवीरजिणं वंदिय कम्मविवागं समासओ वुच्छं ।
कीरइ जिएण हेउहिं जेणं तो भन्नए कम्मं ॥१॥

सिरि० श्रियाऽष्टप्रातिहार्यरूपया चतुस्त्रिंशदतिशयसमृद्ध्या वा युक्तो वीरः श्रीवीरः,स चासौ जिनश्च तम् । क्रियते-अञ्जनचूर्णपूर्णसमुद्गकवन्निरन्तरपुद्गलनिचिते लोके कर्मद्रव्यमात्मसंबद्धं जीवेन हेतुभिर्मिथ्यात्वादिभिः सामान्यैः 'पडिणीयत्तणनिण्हव' [गाथा० ५३] इत्यादिविशेषरूपैश्च येन कारणेन तत् तेन भण्यते कर्मपुद्गलरूपम् ॥१॥

**पयइठिइरसपएसा तं चउहा मोयगस्स दिट्ठंता ।**
**मूलपगइट्ठउत्तरपगइअडवन्नसयभेयं ॥२॥**

पयइ० प्रकृति-स्थिति-रस-प्रदेशादिति *'गम्ययपः कर्माधारे'* [सि० हे० २/२/७४] पञ्चमी, ततश्च प्रकृति-स्थित्यादीनाश्रित्य मोदकस्य दृष्टान्तात् । यथा वातापहारिद्रव्यजन्मा मोदकः प्रकृत्या वातमपहरति, पित्तापहर्तृद्रव्यनिष्पन्नः पित्तम्, श्लेष्मापनायकद्रव्यकृतः श्लेष्माणम् । स्थित्या तु स एव कश्चिद्दिनमेकमवतिष्ठते । यावन्मासमपि कश्चित् । अनुभागेनाऽपि स्निग्धमधुरत्वलक्षणेन स एव कश्चिदेकगुणानुभागोऽपरस्तु द्विगुणानुभागः । प्रदेशाश्च[१] कणिकादिरूपास्तैः स एव कश्चिदेकप्रसृतिमानोऽपरस्तु द्व्यादिप्रसृतिमानः । एवं कर्म्मापि किञ्चित्प्रकृत्या ज्ञानाच्छादकम्, किञ्चिद्दर्शनाच्छादकमित्यादि । स्थितिस्त्रिंशत्सागरकोटीकोट्यादिका । तस्य रस एकस्थानकादिः । प्रदेशा अनन्ताणुरूपाः । तन्मूलप्रकृतीराश्रित्याष्टभेदम् । उत्तरप्रकृतीश्च प्रतीत्याष्टपञ्चाशच्छतभेदम् ॥२॥

**इह नाणदंसणावरणवेयमोहाउनामगोयाणि ।**
**विग्धं च पणनवदुअट्ठवीसचउतिसयदुपणविहं ॥३॥**

इह नाण० ज्ञानावरणं पञ्चविधम् । दर्शनावरणं नवविधमित्यादि योज्यम् ॥३॥

**मइसुयओहीमणकेवलाणि नाणाणि तत्थ मइनाणं ।**
**वंजणवग्गह चउहा मणनयणविणिंदियचउक्का ॥४॥**

मइ० व्यञ्जनेनोपकरणेन्द्रियेण व्यञ्जनानां शब्दादिद्रव्याणामवग्रहः परिच्छेद एकव्यञ्जनलोपाद् व्यञ्जनावग्रहः । चतुर्धा=मनोनयने विनेन्द्रियचतुष्कात्, श्रोत्रादीन्द्रियचतुष्कमाश्रित्य । मनोनयनयोस्त्वप्राप्यकारित्वाद् व्यञ्जनावग्रहो न स्यात् ॥४॥

**अत्थुग्गहईहावायधारणा करणमाणसेहिं छहा ।**
**इय अट्ठवीसभेयं चउदसहा वीसहा व सुयं ॥५॥**

अत्थु० विषयविषयिसन्निपातानन्तरसमुद्भूतसत्तामात्रगोचरदर्शनाज्जातमाद्यमवान्तर-

१. ०गोऽपरस्तु त्रिगुणानुभाग इत्यादि-प्रदेशाश्च-पा० ला० ।

सामान्याकारविशिष्टमर्थग्रहणमवग्रहः । अवगृहीतार्थविशेषाकाङ्क्षणमीहा । ईहितविशेषनिर्णयोऽवायः । स एव दृढतमावस्थापन्नो धारणा । तत्र व्यञ्जनावग्रहोऽसङ्ख्येयसमयमानः । अस्य कालो जघन्य आवलिकाऽसङ्ख्येयभागतुल्य, उत्कृष्ट आनप्राणपृथक्त्वम् । अर्थावग्रह एकसामयिकः । ईहापायौ प्रत्येकमन्तर्मुहूर्तमानौ । धारणा संख्येयकालमसंख्येयं वा ॥५॥

**अक्खर सन्नी सम्मं साईअं खलु सपज्जवसियं च ।**
**गमियं अंगपविट्ठं सत्त वि एए सपडिवक्खा ॥६॥**

अक्खर० संज्ञाव्यञ्जनलब्धिभेदात् त्रिधाऽक्षरम् । संज्ञाक्षरमक्षरस्य संस्थानाकृतिर्यथाऽष्टादशलिपयः । व्यञ्जनादक्षरं व्यञ्जनाभिलापोऽकारादिहकारान्तं तत् । शब्दश्रवणादिनाऽर्थज्ञानं लब्ध्यक्षरम् । अनक्षरं क्ष्वेडितादि । संज्ञी त्रिधा-हेतुवादोपदेशेन दृष्टिवादोपदेशेन दीर्घकालिकोपदेशेन च । यस्याभिसन्धारणपूर्विका करणशक्तिरस्ति स आद्यः संज्ञी १, इतरो निश्चेष्टोऽसंज्ञी । संज्ञिश्रुतस्य क्षयोपशमेन द्वितीयः सम्यग्दृष्टिः२,असंज्ञानी मिथ्यादृष्टिः । यस्येहापोहमार्गणादयः सन्ति स तृतीयस्त्रिकालसंज्ञाधरः३,अपरोऽसंज्ञी । सम्यक्श्रुतमर्हत्प्रणीत*माचाराङ्गादि,* मिथ्याश्रुतं *भारतरामायणादि* । सादिसपर्यवसितं नैकपुरुषाद्यपेक्ष्य । बहुपुरुषाद्यपेक्ष्याऽनाद्यपर्यवसितं च । गमिकं *दृष्टिवादो*ऽगमिकं *कालिकश्रुतम्* । प्रत्येकं श्रुतशब्दो योज्यः । अङ्गप्रविष्टश्रुत*माचाराङ्गादि* । अनङ्गप्रविष्ट*मावश्यकादि* ॥६॥

**पज्जयअक्खरपयसंघाया पडिवत्ति तह य अणुओगो ।**
**पाहुडपाहुडपाहुडवत्थूपुव्वा य ससमासा ॥७॥**

पज्ज० समासो=मीलकः । एको ज्ञानांशः पर्यायः । अनेके तु ज्ञानांशाः पर्यायसमासः । अक्षरमकारादि । द्व्याद्यक्षरसमुदायोऽक्षरसमासः । पदं यत्रार्थसमाप्तिः । *'गइ इंदिए अ काए'* [आ० नि० गा० १४] इत्यादिगाथोक्तद्वारकलापैकदेशो यो *'गइ'* इत्यादिकस्तस्याप्येकदेशो यो नरकगत्यादिस्तत्र जीवादिमार्गणाया क्रियते स संघातः । द्व्यादिगत्याद्यवयवमार्गणा संघातसमासः । गत्यादिद्वाराणामन्यतरैकपरिपूर्णगत्यादिद्वारेण[१] जीवादिमार्गणाप्रतिपत्तिः । द्वारद्व्यादिमार्गणा तु प्रतिपत्तिसमासः । *'संतपयपरूवणया'* [आ० नि० गा० १३] इत्याद्यनुयोगद्वाराणामन्यतरदनुयोगद्वारमुच्यते ।

१-मन्यतमैक०-पा० ला० ।

तदद्व्यादिसमुदायोऽनुयोगद्वारसमासः । प्राभृतगतोऽधिकारः प्राभृतप्राभृतम् । वस्त्वन्तर्गतोऽधिकारविशेषः प्राभृतम् । पूर्वान्तर्गतोऽधिकारो वस्तु । पूर्वं*मुत्पादपूर्वादि*। समासशब्दः प्रत्येकं योज्यः ॥७॥

**अणुगामिवड्ढमाणयपडिवाईयरविहा छहा ओही ।**
**रिउमइविउलमई मणनाणं केवलमिगविहाणं ॥८॥**

अणु० अनुगाम्यवधिः पुरुषस्य लोचनवत् । अननुगामी स्थितप्रदीपवत् । वर्द्धमानोऽङ्गुलासङ्ख्येयभागादारभ्याऽलोके लोकमिवासङ्ख्यखण्डानि यावद्विज्ञेयः, प्रशस्तेष्वध्यवसायस्थानेषु वर्तमानस्य, अप्रशस्तेषु च वर्तमानस्य हीयमानः, पूर्वावस्थातोऽधोऽधो ह्रासमुपगच्छन्नुच्यते । यः पुनः प्रदीप इव निर्मूलमेककालमुपगच्छति स प्रतिपाती यावल्लोकमपि दृष्ट्वा प्रतिपततीति । ततः परमप्रतिपात्यवधिः । इतरविधादननुगाम्याद्यपरभेदात् षोढाऽवधिः । ऋजुमति-विपुलमतिभेदाद् द्विधा मनोज्ञानम् । ऋजु=सामान्यम्, तन्मात्रग्राहिणी मतिः ऋजुमतिः । विपुलमतिस्तु विशुद्धतरा । केवलज्ञानमेकविधम्, समस्तावरणक्षयादुत्पत्तेः ॥८॥

**एसिं जं आवरणं पडु व्व चक्खुस्स तं तयावरणं ।**
**दंसणचउ पणनिद्दा वित्तिसमं दंसणावरणं ॥९॥**

एसिं० तत्तदावरणं मतिज्ञानावरणादि । पदैकदेशे पदसमुदायोपचारात् । दर्शनावरणीयचतुष्कं वेत्रिसमम्, यथा राजानं द्रष्टुकामस्याप्यनभिप्रेतस्य लोकस्य वेत्रिणा स्खलितस्य राज्ञो दर्शनं नोपजायते तथाऽऽत्मनो येनावृतस्य स्तम्भाद्यदर्शनं स्यात् ॥९॥

**चक्खूदिट्ठिअचक्खूसेसिंदियओहिकेवलेहिं च ।**
**दंसणमिह सामन्नं तस्सावरणं तयं चउहा ॥१०॥**

चक्खू० 'केवलेहिं च' इत्यत्र चशब्दः 'अचक्खूसेसिंदिय' इत्यत्र मनसः सूचकस्ततश्चक्षुरादीन्द्रियैर्मनसाऽवधिकेवलाभ्यां च यद्दर्शनं सामान्योपयोगरूपं स्यात्तस्य चक्षुरादिदर्शनस्यावरणं तच्चक्षुर्दर्शनावरणादि चतुर्धा स्यात् । अत्र च चक्षुर्दर्शनावरणोदये एकद्वित्रीन्द्रियाणां मूलत एव चक्षुर्न स्याच्चतुष्पञ्चेन्द्रियाणां तु भूतमपि चक्षुर्विनश्यति । तथा मनःपर्यायज्ञानं तथाविधक्षयोपशमात्सदा विशेषा-

नैव गृह्णदुत्पद्यते न सामान्यमतस्तद्दर्शनाभावः ॥१०॥

**सुहपडिबोहा निद्दा निद्दानिद्दा य दुक्खपडिबोहा ।**
**पयला ठिओवविट्ठस्स पयलपयला उ चंकमओ ॥११॥**

सुह० सुखेन नखच्छोटिकामात्रेण प्रतिबोधो जागरणं यस्या उदये तद्विपाकवेद्या कर्मप्रकृतिरपि निद्रा । निद्रातोऽतिशायिनी निद्रा निद्रानिद्रा । मध्यपदलोपी समासः । प्रचला स्थितस्योर्ध्वस्थितस्योपविष्टस्य[१] च या आगच्छति । प्रचलातोऽतिशायिनी प्रचला प्रचलाप्रचला चङ्क्रमतो या भवति ।११॥

**दिणचिंतियत्थकरणी थीणद्धी अद्धचक्किअद्धबला ।**
**महुलित्तखग्गधारालिहणं व दुहा उ वेयणियं ॥१२॥**

दिण० स्त्याना=सङ्घातमापन्ना गृद्धिर्दिनचिन्तितार्थेच्छा यत्र, प्राकृतत्वान्निपातः । यद्वा स्त्याना—पिण्डीभूता ऋद्धिरात्मशक्तिरस्यां सा स्त्यानर्द्धिरर्द्धचक्रवर्त्ती—वासुदेवस्तदर्धबला प्रथमसंहननस्य पुंसः स्यात् । आसां क्रमश्चैवं निद्रा, प्रचला, निद्रानिद्रा, प्रचलाप्रचला, स्त्यानर्द्धिर्यथोत्तरं विपाकाधिक्यात् । तथा च सति *कर्मग्रन्थेषु* स्त्यानर्द्धित्रिकमित्युक्ते निद्रानिद्रा प्रचलाप्रचला स्त्यानर्द्धिलक्षणं प्रबलविपाकं निद्रात्रिकं गृह्यते । चक्षुर्दर्शनावरणादि चतुष्कं मूलत एव दर्शनलब्धिमुपहन्ति । निद्रापञ्चकं च प्राप्ताया दर्शनलब्धेरुपघातकृत् । मधुलिप्तखड्गधारालेहनमिव द्विधा सातासातरूपं वेदनीयम् । मध्वास्वादनसदृशः सातस्य विपाको, असिधाराऽग्रच्छेदसमश्चासातस्य[२] ॥१२॥

**ओसन्नं सुरमणुए सायमसायं तु तिरियनरएसु ।**
**मज्जं व मोहणीयं दुविहं दंसणचरणमोहा ॥१३॥**

ओस० 'ओसन्नं'ति देशीशब्दो बाहुल्यार्थे । ततश्च सुरनरेषु सातम्, च्यवनादौ चारकरोधवधादौ चाऽसातमपि । असातं च तिर्यग्नरकेषु, अत्रापि प्रायोग्रहणात्तिर्यक्षु पट्टहस्तितुरङ्गादीनां नरकेष्वपि नारकाणां जिनजन्मोत्सवादौ सुखसंवेदनं सातविपाकः ॥१३॥

१. ०स्योर्ध्वदमस्योप०- हे० ला०। ०स्योर्ध्वसंधानेनोप०-बृ०। २-०को जिह्वाच्छे०-पा०। ०को छेद०-ला०।

**दंसणमोहं तिविहं सम्मं मीसं तहेव मिच्छत्तं ।**
**सुद्धं अद्धविसुद्धं अविसुद्धं तं हवइ कमसो ॥१४॥**

दंसण० 'सम्मं'ति मदनकोद्रवन्यायेन मिथ्यात्वपुद्गला एवाध्यवसायविशेषेण शुद्धाः सम्यक्त्वम्,

*'तथयेह प्रदीपस्य स्वच्छाभ्रपटलीगृहम् । न करोत्यावृतिं काञ्चिदेवमेतद्रुचेरपि'* ॥१॥
[ ]

सम्यक्त्वमपि मिथ्यात्वप्रकृतित्वेनातिचारसम्भवादौपशमिकादिदर्शनमोहत्वाच्च दर्शनमोहनीयम् ॥१४॥

**जीयअजीयपुन्नपावासवसंवरबंधमुक्खनिज्जरणा ।**
**जेणं सद्दहइ तयं सम्मं खइगाइबहुभेयं ॥१५॥**

जिय० जीवादीन् पदार्थान् येन जीवः श्रद्धाति तत्सम्यक्त्वं क्षायिकादि, आदिशब्दाद्वेदकादिग्रहणम् ॥१५॥

**मीसा न रागदोसो जिणधम्मे अंतमुहु जहा अन्ने ।**
**नालियरदीवमणुणो मिच्छं जिणधम्मविवरीयं ॥१६॥**

मीसा० मिश्रान्मिश्रोदयात् । यथाऽन्ने=कूराद्योदने नालिकेरद्वीपवासिमनुष्यस्य न रागो न च द्वेषोऽदृष्टाऽश्रुतत्वेन ॥१६॥

**सोलस कसाय नव नोकसाय दुविहं चरित्तमोहणीयं ।**
**अण अप्पच्चक्खाणा पच्चक्खाणा य संजलणा ॥१७॥**

सोल० नोकषाया नोशब्दोऽत्र साहचर्यवाची, कषायसहचरितत्वं चैषां कषायैः सह सर्वदा वर्तमानत्वात् । 'अण'त्ति अनन्तं भवमनुबध्नन्तीत्यनन्तानुबन्धिनः, यद्यपि चैषां शेषकषायोदयरहितानामुदयो नास्ति तथाप्यवश्यमनन्तसंसारमौलकारणमिथ्यात्वोदयाऽऽक्षेपकत्वादेषामेवानन्तानुबन्धित्वव्यपदेशः । न विद्यते प्रत्याख्यानं देशसर्वविरतिरूपं येषु तेऽप्रत्याख्यानाः । 'पच्चक्खाण' त्ति प्रत्याख्यानावरणाः सर्वविरतिनिषेधकाः । समीपज्ज्वलयन्ति चारित्रिणमपि इति सञ्ज्वलनाः ॥१७॥

**जाजीववरिसचउमासपक्खगा नरयतिरियनरअमरा ।**
**सम्माणुसव्वविरईअहक्खायचरित्तघायकरा ॥१८॥**

जाजी० यावज्जीवं वर्षादीन् [वा] गच्छन्तीति इग्प्रत्ययः, व्यवहारत इदमुक्तम्, अन्यथा ***बाहुबल्यादी***नां पक्षादिपरतोऽपि सञ्ज्वलनाद्यवस्थितिः श्रूयते, अन्येषां संयतादीनाम् [आकर्षादिकाल] चानन्तानुबन्ध्यादीनामुदयस्य श्रवणादन्तर्मुहूर्तादिकं कालं यावत् । कारणे कार्योपचारात्कषाया अनन्तानुबन्ध्यादयोऽपि नरकाद्या, इदमपि व्यवहाराश्रितमेवाऽन्यथा ह्यनन्तानुबन्ध्युदयवतामपि मिथ्यादृशां केषाञ्चिदुपरितनग्रैवेयकेषूत्पत्तिः श्रूयते । प्रत्याख्यानावरणोदयवतां देशविरतानां देवगतिरप्रत्याख्यानोदयवतां च सम्यग्दृष्टिदेवानां मनुष्यगतिः ॥१८॥

**जलरेणुपुढविपव्वयराईसरिसो चउव्विहो कोहो ।**
**तिणिसलयाकट्ठट्ठियसेलत्थंभोवमो माणो ॥१९॥**

जल० राजिशब्दसंबन्धाज्जलराजिसदृशः सञ्ज्वलनक्रोधः । तिनिसलता=वनस्पतिविशेषः ॥१९॥

**मायावलेहिगोमुत्तिमिंढसिंगघणवंसिमूलसमा ।**
**लोहो हलिद्दखंजणकद्दमकिमिरागसामाणो ॥२०॥**

माया० धनुरादीनामुल्लिख्यमानानां याऽवलेखिका वक्रत्वरूपा पतति तत्समा सञ्ज्वलनमाया वक्रा, मूत्रधारा=गोमूत्रिका यथासौ शुष्का पवनादिभिः कष्टेनापनीयते एवं यज्जनिता कुटिलता कष्टेनापगच्छति सा प्रत्याख्यानावरणमाया। कृमिरागो=रक्तपट्टसूत्ररागस्तत्समानोऽनन्तानुबन्धी लोभः ॥२०॥

**जस्सुदया होइ जिए हास रई अरइ सोग भय कुच्छा ।**
**सनिमित्तमन्नहा वा तं इह हासाइमोहणीयं ॥२१॥**

जस्सु० ॥२१॥

**पुरिसित्थि तदुभयं पइ अहिलासो जव्वसा हवइ सो उ ।**
**थीनरनपुवेउदओ फुंफुमतणनगरदाहसमो ॥२२॥**

पुरि० पुरुषं प्रति यद्वशाद् यदुदयादभिलाषः स्यात् स्त्रियाः स स्त्रीवेदोदयो ज्ञेयः, फुंफुमः=करीषाग्निस्तद्दाहसमः ॥२२॥

**सुरनरतिरिनिरयाऊ हडिसरिसं नामकम्म चित्तिसमं ।**
**बायालतिनवइविहं तिउत्तरसयं च सत्तट्ठी ॥२३॥**

सुर० चित्री=चित्रकारः । विधाशब्दस्य प्रत्येकं योगाच्चशब्दस्य च प्रान्ते, द्विचत्वारिंशद्विधं त्रिनवतिविधं त्र्युत्तरशतविधं सप्तषष्टिविधं च ॥२३॥

**गइजाइतणुउवंगा बंधणसंघायणाणि संघयणा ।**
**संठाणवन्नगंधरसफासअणुपुव्विविहगगई ॥२४॥**

गइ० नाम्नः प्रस्तावात् सर्वत्र गत्यादिषु नामेत्युपसंस्कारः कार्यः । 'उवंग' त्ति उपलक्षणत्वादङ्गोपाङ्गनाम । 'विहगगई' त्ति विहायसा गतिः पादादिविहरणात्मिका द्वीन्द्रियादीनां तद्धेतुत्वात्कर्मापि विहायोगतिनाम । नाम्नो गत्याख्यप्रथमप्रकृतिपौनरुक्त्याशङ्कानिरासाय विहायोग्रहणमन्यथा विहायसः सर्वगतत्वेन ततोऽन्यत्र गमनाभावाद् विशेषणस्य वैयर्थ्यप्रसङ्गः ॥२४॥

**पिंडपयडि त्ति चउदस परघाउस्सासआयवुज्जोयं ।**
**अगुरुलहुतित्थनिमिणोवघायमिय अट्ठ पत्तेया ॥२५॥**

पिंड० एता गत्यादयश्चतुर्दश प्रकृतयश्चतुरादिभेदानां पिण्डितानां प्रतिपादनात् पिण्डप्रकृतय उच्यन्ते । पराघातादयोऽष्टौ प्रकृतयः प्रत्येकाः, अपरतद्भेदाभावात् । अत्र 'पत्तेयडनीस' इत्यादि*पाठान्तरं* ज्ञेयम् ॥२५॥

**तस बायर पज्जत्तं पत्तेय थिरं सुभं च सुभगं च ।**
**सुसराइज्ज जसं तसदसगं थावरदसं तु इमं ॥२६॥**

तस० त्रसदशकमिदमुच्यत इति शेषः । स्थावरदशकं त्विदं वक्ष्यमाणम् ॥२६॥

**थावर सुहुम अपज्जं साहारणअथिरअसुभदुभगाणि ।**
**दुस्सरणाइज्जाजस इय नामे सेयरा वीसं ॥२७॥**

थाव० स्थावरादयः सेतरास्त्रसादिदशकसहिता नाम्नि विंशतिप्रकृतयः स्युः ॥२७॥

**तसचउथिरछक्कं अथिरछकसुहुमतिगथावरचउक्कं ।**
**सुभगतिगाइविभासा तदाइसंखाहिँ पयडीहिं ॥२८॥**

तस० 'सुभगतिगाइविभास'त्ति सुभगत्रिकं सुभगसुस्वरादेयाभिधमादिशब्दाद्दुर्भगत्रिकं दुर्भगदुःस्वरानादेयस्वरूपम् । ततः सुभगत्रिकादेर्विभाषा=प्ररूपणा कर्त्तव्येति शेषस्तदादिसङ्ख्याभिः प्रकृतिभिः=सा निर्दिष्टा प्रकृतिरादिर्यस्याः सा तदादिः, तदादिः सङ्ख्या यासां तास्तथा याऽसौ प्रकृतिस्त्रसादिकोक्ता तामादौ कृत्वा निर्दिष्टसङ्ख्या पूर्णीयेत्यर्थः । एताश्च संज्ञाः पिण्डकसंग्राहिण्यो यथास्थानमुपयोगं यास्यन्तीति प्ररूपिताः ॥२८॥

**गइयाईण उ कमसो चउपणपणतिपणपंचछच्छक्कं ।**
**पणदुगपणट्ठचउदुग इय उत्तरभेयपणसट्ठी ॥२९॥**

गइ० गत्यादीनां पिण्डप्रकृतीनामुत्तरभेदाः पञ्चषष्टिः ॥२९॥

**अडवीसजुया तिनवइ संते वा पनरबंधणे तिसयं ।**
**बंधणसंघायगहो तणूसु सामन्नवन्नचऊ ॥३०॥**

अड० प्रत्येकाष्टाविंशतियुता त्रिनवतिः । सा च क्वोपयुज्यत इत्याह- 'संते'ति सत्तायां वाशब्दस्य व्यवहितार्थत्वात् पञ्चदशबन्धनैस्त्रिशतं वा सत्तायामधिक्रियत इति शेषः । न चैवमष्टोत्तरं शतं स्यात् ? उच्यते, वक्ष्यमाणपञ्चदशबन्धननामप्रकृतीनां मध्यादौदारिकादिबन्धनपञ्चकस्य त्रिनवतिमध्ये पूर्वंप्रक्षिप्तत्वाच्छेषाणां दशानां क्षेपे त्रिशतमेव । 'बंधणसंघायगहो तणूसु' त्ति औदारिकादितनुभिः स्वजातीयत्वात् पञ्चदशबन्धनानि सङ्घाताश्च गृहीता न पृथग् गण्यन्ते । वर्णादिविंशतेर्मध्यात् सामान्येन

वर्ण-रस-गन्ध-स्पर्शरूपं वर्णचतुष्कं गृह्यते ॥३०॥

**इय सत्तट्ठी बंधोदए य न य सम्ममीसया बंधे ।**
**बंधुदए सत्ताए वीसदुवीसट्ठवन्नसयं ॥३१॥**

इय० सप्तषष्टिर्बन्धे उदये चोपयुज्यते, चादुदीरणायां[१] च । तथा न च सम्यक्त्वमिश्रके बन्धेऽधिक्रियते । अयमभिप्रायः—→ सम्यक्त्वमिश्रयोर्बन्ध एव न स्यात् किन्तु मिथ्यात्वपुद्गला एव जीवेन सम्यक्त्वगुणेन मिथ्यात्वरूपतां त्याजितास्तत्तद्व्यपदेशभाजो भवन्ति । उदयोदीरणासत्तासु पुनः सम्यक्त्वमिश्रके अप्यधिक्रियेते । एवं च सति ज्ञानावरणके पञ्च दर्शनावरणे नव वेदनीये द्वे मोहे सम्यक्त्वमिश्रवर्जाः षड्विंशतिरायुषि चतस्रो नाम्नि भेदान्तरसम्भवेऽपि सप्तषष्टिर्गोत्रे द्वे अन्तराये पञ्च । एवं विंशत्युत्तरं प्रकृतिशतं बन्धेऽधिक्रियते । एतदेव सम्यक्त्वमिश्रसहितं द्वाविंशत्युत्तरं प्रकृतिशतमुदये उदीरणायां च । सत्तायां पुनः शेषकर्मणां पञ्चपञ्चाशन्नाम्नस्त्रिनवतिरेवं १४८ यद्वा शेषकर्म्मणां ५५ नाम्नस्त्र्युत्तरशतं एवं १५८ ॥३१॥

**निरयतिरिनरसुरगई इगबियतियचउपणिंदिजाईओ ।**
**ओरालविउव्वाहारगतेयकम्मण पण शरीरा ॥३२॥**

निरय० यस्या उदयेन जीवो नैरयिकः स्यान्नरकपृथ्व्यां सा नरकगतिरेवं शेषा अपि ज्ञेया औदयिकभावे । सूचकत्वादेकेन्द्रियाद्याः जातयः । औदारिकं शरीरं तिर्यग्मनुष्याणां, वैक्रियमौपपातिकं लब्धिप्रत्ययं च, आहारकं चतुर्दशपूर्वविदः कारणे स्यात्, तैजसं भुक्तान्नपरिणतितेजोलेश्याहेतुः, कर्मणो विकारः कार्मणमशेषकर्मराशेराधारभूतं कुण्डवद् बदरादीनाम्, अशेषकर्मप्रसवसमर्थं वा बीजमङ्कुरादीनाम् ॥३२॥

**बाहूरु पिट्ठि सिर उर उयरंग उवंग अंगुलीपमुहा ।**
**सेसा अंगोवंगा पढमतणुतिगस्सुवंगाणि ॥३३॥**

बाहू० शेषाण्यङ्गुलिपर्वरेखादीन्यङ्गोपाङ्गानि, प्रथमतनुत्रिकस्योपाङ्गानि । तैजस-

---

१. चशब्दादु०-बृ०। चोपलक्षणादु०-पा०।

कार्मणयोर्जीवप्रदेशानुरोधित्वान्नाङ्गोपाङ्गनाम ॥३३॥

**उरलाइपुग्गलाणं निबद्धबज्झंतयाण संबंधं ।**
**जं कुणइ जउसमं तं उरलाईबंधणं नेयं ॥३४॥**

उर० ननु यत्र बन्धनपञ्चकमेवोपादीयते तत्र कथं पञ्चदशबन्धनानां ग्रह उच्यते ? तदेवमवगन्तव्यं → निबद्धबध्यमानानामौदारिकपुद्गलानां तैजसकार्मणपुद्गलैश्च सह सम्बन्धकारि जतुसममौदारिकबन्धनम्, एवं वैक्रियाहारकबन्धने, तथा तैजसपुद्गलानां निबद्धबध्यमानानां कार्मणपुद्गलैश्च सह सम्बन्धहेतुस्तैजसबन्धनम् । पञ्चमं तु कार्मणबन्धनम् । यदि बन्धनपञ्चकं न स्यात्तदौदारिकादिपुद्गलानां शरीरपरिणतौ सत्यामप्यसम्बद्धत्वात् पवनाहतकुण्डस्थिताऽस्तीमितसक्तूनामिवैकत्र स्थैर्यं न स्यात् ॥३४॥

बन्धनं(न)नामाऽसंहि(ह)तानां पुद्गलानां न सम्भवत्यतः सङ्घातनामाह-

**जं संघायइ उरलाइपुग्गले तणगणं व दंताली ।**
**तं संघायं बंधणमिव तणुनामेण पंचविहं ॥३५॥**

जं० यत्कर्म सङ्घातयति पिण्डीकरोति ॥३५॥

**ओरालविउव्वाहारयाण सगतेयकम्मजुत्ताणं ।**
**नव बंधणाणि इयरदुसहियाणं तिन्नि तेसिं च ॥३६॥**

ओरा० औदारिकवैक्रियाहारकाणां 'सग'त्ति स्वकान्यौदारिकवैक्रियाहारकाणि, औदारिकौदारिकबन्धनम् १ औ. तै. २ औ. का. ३ एवं वैक्रिये ३ आहारके ३ इतरद्विसहितानां त्रीणि यथा-औ.तै.का. १, वै. तै. का. २, आ. तै. का. ३, तयोस्तैजकार्मणयोश्च त्रीणि तै. तै. १, का. का. २, तै. का. ३ ॥३६॥

**संघयणमट्ठिनिचओ तं छद्धा वज्जरिसहनारायं ।**
**तह रिसहं नारायं नारायं अद्धनारायं ॥३७॥**

संघ० 'वज्जरिसहनाराय' त्ति अयमर्थः → द्वयोरस्थ्नोरुभयतो मर्कटबन्धेन बद्धयोः

पट्टाकृतिना तृतीयेनास्थ्ना परिवेष्टितयोरुपरि तदस्थित्रयभेदि कीलिकाऽपरपर्यायं वज्रनामकमस्थि यत्र भवति तद्वज्रऋषभनाराचम् । अर्द्धनाराचे द्वितीयपार्श्वे कीलिका स्यात् ॥३७॥

**कीलिय छेवट्टं इह रिसहो पट्टो य कीलिया वज्जं ।**
**उभओ मक्कडबंधो नारायं इममुरालंगे ॥३८॥**

कीलि० यत्र तु परस्परं पर्यन्तसंस्पर्शलक्षणां सेवां आऋतानि=आगतान्यस्थीनि स्युः, स्नेहाभ्यवहारतैलाभ्यङ्गविश्रामणादिरूपां च परिशीलनां नित्यमपेक्षन्ते तत्सेवार्त्तम् । इदं संहननमौदारिकाङ्ग एव स्यान्न तु वैक्रियादौ ॥३८॥

**समचउरंसं निग्गोहसाइखुज्जाइँ वामणं हुंडं ।**
**संठाणा वन्ना किण्हनीललोहियहलिद्दसिया ॥३९॥**

सम० आसनस्थस्य पुंसो जानुनोरन्तरम् १, आसनललाटान्तयोः २, दक्षिणस्कन्ध वामजानुनोः ३, वामस्कन्धदक्षिणजानुनोश्च ४, समं समचतुरस्रं १, न्यग्रोधवदुपरि परिमण्डलमधोहीनं २, 'साइ'त्ति शाल्मलीतरुस्तस्य हि स्कन्धो द्राघीयानुपरि तु न तदनुरूपा विशालता ३, मडहकोष्ठं वामनं ४, अधःकायमडहं कुब्जं ५, सर्वत्रासंस्थितं हुण्डम् ६ ॥३९॥

**सुरहिदुरही रसा पण तित्तकडुकसायअंबिला महुरा ।**
**फासा गुरुलहुमिउक्खरसीउण्हसिणिद्धरुक्खट्ठा ॥४०॥**

सुर० सुरभिदुरभी गन्धाविति गम्यम् । तिक्तरसं निम्बादि, कटुकरसं मरिचादि, कषायरसं बिभीतकादि, आम्लरसमम्लिकादि, मधुररसमिक्ष्वादि, लवणस्य त्वेतदनुयायित्वात् केवलस्यानुपयोगाच्च पृथगुपादानं न कृतम् ॥४०॥

वर्णादिचतुष्कोत्तरविंशतिभेदानां शुभाशुभत्वमाह ---

**नीलकसिणं दुगंधं तित्तं कडुयं गुरुं खरं रुक्खं ।**
**सीयं च असुहनवगं इक्कारसगं सुभं सेसं ॥४१॥**

नील० ॥४१॥

**चउह गइ व्वणुपुव्वी गइपुव्विदुगं तिगं नियाउजुयं ।**
**पुव्वी उदओ वक्के सुह असुह वसुट्टविहगगई ॥४२॥**

'चउहगइव्वणुपुव्वी' त्ति पूर्वीशब्देनानुपूर्वी भण्यते, ततो नरकादिगति-नरकाद्यानुपूर्वीस्वरूपं नरकादिद्विकमुच्यते । तदेव त्रिकमभिधीयते निजायुर्युतं नरकाद्यायुष्कसहितमुत्तरत्रोपयोगीत्येतदुक्तम् । उपलक्षणत्वादौदारिकादिद्विक-वैक्रियषट्काष्टका[१] ऽगुरुलघुचतुष्काद्यनुक्तमपि ज्ञेयं । पूर्व्या=आनुपूर्व्या वृषभनासिकारज्जुकल्पया द्विसमयादिवक्रेण गच्छतो जीवस्योदयः स्यात् । विहायसा गतिर्विहायोगतिर्ननु विहायसः सर्वगतत्वात् तदन्यत्र गमनाभावाद् विशेषणमनर्थकम् ? । नैवं, विहायोग्रहणं नाम्नः प्रथमप्रकृतिगतितोऽस्या विशेषणार्थं । सा शुभा वृष-हंसादीनामशुभोष्ट्र-खरादीनाम् ॥४२॥

**परघाउदया पाणी परेसि बलिणं पि होइ दुद्धरिसो ।**
**ऊससणलद्धिजुत्तो हवेइ ऊसासनामवसा ॥४३॥**

पर० पराघातोदयात्प्राणी परेषां बलिनामपि भवति दुर्द्धर्षः, त्वग्विषदन्तविषादिर्वाङ्गावयवो योऽन्येषां जीवानां घातं करोति स पराघातस्य विपाकः । उच्छ्वासनामवशादुच्छ्वसनलब्धियुक्तो भवति, जीवविपाकित्वेऽप्यस्य विशिष्ट एव शरीरे उदयो, नापान्तरालगत्यादौ ॥४३॥

**रविबिंबे उ जियंगं तावजुयं आयबाउ न उ जलणे ।**
**जमुसिणफासस्स तहिं लोहियवन्नस्स उदउ त्ति ॥४४॥**

रवि० रविबिम्ब एव जीवाङ्गं पृथिवीकायिकाङ्गं तापयुतं स्वयमनुष्णमपि उष्णप्रकाशयुक्तं स्यादातपनामोदयात् ॥४४॥

**अणुसिणपयासरूवं जियंगमुज्जोयए इहुज्जोया ।**
**जइदेवुत्तरविकियजोइसखज्जोयमाइ व्व ॥४५॥**

---

१-औदारिकशरीरौदारिकाङ्गोपाङ्गमित्यौ० द्विकम्, देवद्विक-नरकद्विक-वैक्रियशा०-वैक्रियाङ्गोपाङ्गरूपं वै०षट्कम्। देवनरकत्रिक-वै०श०-वैक्रियाङ्गो०रूपं वैक्रियाष्टकम्।-हे०प्रतौ

अणु० अनुष्णप्रकाशरूपमुद्योतते जीवाङ्गमुत्तनामोदयात्, यतिदेवानां मूलाङ्गापेक्षयोत्त-रकालं क्रियमाणमुत्तरवैक्रियं, ज्योतिष्काश्चन्द्रादय आदिशब्दाद्रत्नौषध्यादयः । 'मो' अलाक्षणिकस्ते इव ॥४५॥

**अंगं न गुरु न लहुयं जायइ जीवस्स अगुरुलहुउदया ।**
**तित्थेण तिहुयणस्स वि पुज्जो से उदओ केवलिणो ॥४६॥**

*'अंगं न गुरु न लहुयं' ति आत्मापेक्षयेदमवगन्तव्यम्, अन्यापेक्षया तु त्रिधाऽपि स्यात्* ॥४६॥

**अंगोवंगनियमणं निम्माणं कुणइ सुत्तहारसमं ।**
**उवघाया उवहम्मइ सतणुवयवलंबिगाईहिं ॥४७॥**

अंगो० अङ्गोपाङ्गानां नियमनं, यथा मनुष्यस्य द्वौ हस्तौ द्वौ पादावित्यादिनियमः, लिङ्गाऽऽकृत्योरपि नियमनं, यथा —> पुरुषस्य श्मश्रुप्रभृतिलिङ्गमधृष्यादिका चाकृतिः, स्त्रियश्च स्तना-दिकं चिह्नमभिगम्यत्वादिका चाकृतिः, तन्निर्माणं करोति । उपघातोदयादुपहन्यते स्वतन्वयवैर्लम्बि-कादिभिः प्रतिजिह्विकाचौरदन्तादिभिः ॥४७॥

**बितिचउपणिंदिय तसा बायरओ बायरा जिया थूला ।**
**नियनियपज्जत्तिजुया पज्जत्ता लद्धिकरणेहिं ॥४८॥**

बिति० द्वि-त्रि-चतुः-पञ्चेन्द्रियाः स्युः त्रसाः त्रसनामोदयात्, त्रसन्त्युष्णाद्यभितप्ताश्छा-याद्यासेवनार्थमिति त्रसास्तद्विपाकवेद्यं नाम त्रसनाम । नन्वग्नेरुर्ध्वज्वलनं वायोस्तिर्यग्पवनमिति कथमनयोर्न त्रसत्वं ? उच्यते, स्वाभाविकमेव तत् तयोर्न तूष्णाद्यभितापे द्वीन्द्रियादीनामिव । बादरतो बादराः, बादरमपि पृथिव्यादीनामेकैकं वपुर्न चक्षुर्ग्राह्यं, किन्त्वसङ्ख्यातवपुःपिण्ड एव चक्षुर्ग्राह्यः, निजनिजपर्या-प्तियुताः स्युः पर्याप्तोदयात् । लब्धिकरणैः । तत्र वैक्रियवतामेका शरीरपर्याप्तिरन्तर्मुहूर्तेन स्याच्छेषा एकसामयिक्यः, औदारिकवतां त्वाहारपर्याप्तिरेकसमया, शेषा अन्तर्मुहूर्तमानाः । ये सर्वा अपि स्वपर्याप्तीः

समर्थ्य[१] म्रियन्ते नार्वाक् ते लब्धिपर्याप्ताः, करणानि=वपुरिन्द्रियादीनि कृतवन्तः करणपर्याप्ताः ॥४८॥

**पत्तेय तणू पत्तेउदयेणं दंतअट्ठिमाइ थिरं ।**
**नाभुवरि सिराइ सुहं सुभगाओ सव्वजणइट्ठो ॥४९॥**

पत्ते० प्रत्येकतनुः प्रत्येकोदयेन स्याज्जीवोऽयमर्थः, यस्योदयेनैकैकस्मिन् जीवे एकैकमौदारिकादि शरीरं भवति तत्प्रत्येकनाम । यस्योदयेन शरीरे दन्तास्थ्यादि स्थिरं निष्पद्यते तत् स्थिरनाम । नाभेरुपरि शिरआदयः शुभा अङ्गावयवा यस्योदयेन जायन्ते तच्छुभनाम । सुभगात् सर्वजनानामिष्टः ॥४९॥

**सुसरा महुरसुहझुणी आइज्जा सव्वलोयगज्झवओ ।**
**जसओ जसकित्ति इओ थावरदसगं विवज्जत्थं ॥५०॥**

सुस० सुस्वरोदयान्मधुरशुभध्वनिः । आदेयात्सर्वलोकानां ग्राह्यवाग् बहुमतचेष्टश्च स्यात् । यशोनामकर्मोदयाद् यशो जीवतः श्लाघ्यतारूपं कीर्तिश्च परलोकगतस्यापि श्लाघनीयतारूपा, यद्वा—

*'दानपुण्यकृता कीर्तिः पराक्रमकृतं यशः ॥'* [ ]

*'एकदिग्गामिनी कीर्तिः सर्वदिग्गामुकं यशः ॥'* [ ]

स्थावरदशकं विपर्यस्तम् । तथाहि-स्थावरनामोदये पृथिव्यादिषूत्पद्यते । सूक्ष्मोदये सूक्ष्मकायोऽन्तर्मुहूर्त्तायुः । अपर्याप्तोदये लब्धिकरणैर्द्विधाऽपर्याप्तो, लब्ध्यपर्याप्तोऽप्याहारशरीरेन्द्रियपर्याप्तित्रयं समर्थ्यैव म्रियते, अन्यथा परभवायुर्बन्धाभावः । अनन्तानां जीवानामेकमौदारिकं शरीरं यस्योदयात् तत्साधारणम् । भ्रूजिह्वादीनां यस्योदयेन निष्पत्तिस्तदस्थिरम्[२] । अशुभानां पादादीनां निष्पत्तिर्यदुदयेन तदशुभम् । दुर्भगात् सकललोकस्य दुःखदः । दुःस्वराद् विस्वरो जल्पन् जनद्वेष्यः स्यात् । अनादेयोदयेन चेष्टा हसितललितादिका भाषणं युक्तियुक्तस्याप्यबहुमतम् ॥५०॥

---

१-समाप्य-पा०। २०येनाऽस्थिरत्वानि०-पा०।

**गोयं दुहुच्चनीयं कुलाल इव सुघडभुंभलाईयं ।**
**विग्घं दाणे लाभे भोगुवभोगेसु विरिए य ॥५१॥**

**गो०** गोत्रं द्विधोच्चनीचं, कुलाल इव सुघटभुंभलादिकं करोतीति शेषः । उच्चगोत्रो धनबुद्धिरूपवियुक्तोऽपि लोके लभते पूजां, नीचगोत्रस्तु धनादियुक्तोऽपि निन्दां धृतकपुत्रोऽयमित्यादिरूपाम् । विघ्नमन्तरायं दानादिविषयम् ॥५१॥

**सिरिहरियसमं एयं जह पडिकूलेण तेण रायाई ।**
**न कुणइ दाणाईयं एवं विग्घेण जीवो वि ॥५२॥**

सिरि० श्रीगृहिको=भाण्डागारिकस्तत्समं मनुजत्वेऽपि प्राप्ते लब्धेऽपि च-भोगसाधने विभवे कार्पण्याशक्त्यादिवशाद् भोक्तुं न शक्नोति, विरतिहीनोऽपि यदुदये तद्भोगान्तरायम् । बलवान् रोगवियुक्तो वयःसम्पूर्णोऽपि यस्योदयेन भवति जीवो वीर्यहीनस्तद्वीर्यान्तरायम् ॥५२॥

कर्मबन्धहेतूनाह--

पडिणीयत्तण निन्हव उवघाय पओस अंतराएणं ।
अच्चासायणयाए आवरणदुगं जिओ जयइ ॥५३॥

**पडि०** ज्ञानस्य मत्यादेर्ज्ञानिनां साध्वादीनां साधनस्य च पुस्तकादेस्तथा दर्शनस्य चक्षुर्दर्शनादेर्दर्शनिनां साध्वादीनां साधनस्य च श्रोत्रचक्षुर्नासिकादेः प्रत्यनीकतादिभिस्तथा अत्याशातनया च जात्याद्युद्धट्टनादिहीलारूपयाऽऽवरणद्विकं ज्ञानावरणदर्शनावरणरूपं जीवो जयति, धातूनामनेकार्थत्वाद् बध्नाति ॥५३॥

**गुरुभत्तिखंतिकरुणावयजोगकसायविजयदाणजुओ ।**
**दढधम्माई अज्जइ सायमसायं विवज्जयओ ॥५४॥**

गुरु० योगो=दशविधसामाचार्याचरणम् ॥५४॥

**उम्मग्गदेसणामग्गनासणादेवदव्वहरणेहिं ।**
**दंसणमोहं जिणमुणिचेइयसंघाइपडिणीओ ॥५५॥**

उम्म० जिनादिप्रत्यनीको दर्शनमोहं तीव्रमर्जयतीति क्रियायोगः ॥५५॥

**दुविहं पि चरणमोहं कसायहासाइविसयविवसमणो ।**
**बंधइ नरयाउ महारंभपरिग्गहरओ रुद्दो ॥५६॥**

दुवि० द्विविधमपि कषायनोकषायभेदाच्चरणमोहं कषायादिविसंस्थुलमना बध्नाति । तत्र तीव्रकोपाद्युपयुक्तस्तीव्रं कोपादिकमेव बध्नाति, हास्याद्युपयुक्तस्तु हास्यादिकम् ॥५६॥

**तिरियाउ गूढहियओ सढो ससल्लो तहा मणुस्साउं ।**
**पयईइ तणुकसाओ दाणरुई मज्झिमगुणो य ॥५७॥**

तिरि० गूढहृदयो, वचसा मधुरः परिणामे तु दारुणः शठो वक्रो बहिश्चेष्टः, सशल्योऽनालोचिताऽप्रतिक्रान्तः । मध्यमगुणः क्षान्तिविनयादिगुणयुक्तः ॥५७॥

**अविरयमाइ सुराउं बालतवोऽकामनिज्जरो जयइ ।**
**सरलो अगारविल्लो सुहनामं अन्नहा असुहं ॥५८॥**

अवि० अविरतादिरादिशब्दाद्देशविरतादिः । सरलो=निर्मायः, 'अगारविल्लो' त्ति गौरवत्रयोज्झितः [शुभं देवगतियशःकीर्तिपञ्चेन्द्रियजात्यादिरूपं नामकर्म बध्नाति, सरलादिविशेषणरहितो जीवस्तु] अशुभं नरकगत्ययशःकीर्त्येकेन्द्रियजना(जात्या)दिरूपं नामकर्म बध्नाति ॥५८॥

**गुणपेही मयरहिओ अज्झयणज्झावणारुई निच्चं ।**
**पकुणइ जिणाइभत्तो उच्चं नीयं इयरहा उ ॥५९॥**

गुण० ॥५९॥

जिणपूयाविग्घकरो हिंसाइपरायणो जयइ विग्घं ।
इय कम्मविवागोयं लिहिओ देविंदसूरीहिं ॥६०॥

जिण० जिनपूजाविघ्नकरः=सावद्यादिदोषोपेतत्वाद् गृहिणामपि जिनपूजा न विधेयेत्यादि-कुदेशनाभिः ॥६०॥

**इति श्रीगुणरत्नसूरिविरचिता कर्मविपाकावचूर्णिः ॥**

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

॥ नमोनमः श्रीगुरुप्रेमसूरये ॥

## श्रीगुणरत्नसूरिविरचित- अवचूर्ण्युपेतः

## श्रीदेवेन्द्रसूरिविरचितः

# कर्मस्तवनामा द्वितीयः कर्मग्रन्थः

**तह थुणिमो वीरजिणं जह गुणठाणेसु सयलकम्माइं ।**
**बंधुदओदीरणयासत्तापत्ताणि खवियाणि ॥१॥**

तह० गुणस्थानेषु मिथ्यात्वादिषु सकलकर्माणि 'बंधुदओ' इत्यादि, कर्मयोग्यवर्गणापुद्गलैरात्मनो वह्न्ययःपिण्डवदन्योऽन्यानुगमात्मकसम्बन्धो बन्धः, तेषां यथावस्थितिबद्धानां कर्मपुद्गलानामपवर्तनादिकरणविशेषकृते[1] स्वाभाविके वा स्थित्यपचये सत्युदयसमयप्राप्तानां विपाकवेदनमुदयः। कर्मपुद्गलानामकालप्राप्तानां करणविशेषजनिते स्थित्यपचये सत्युदयावलिकायां प्रवेशनमुदीरणा। तेषामेव कर्मपुद्गलानां बन्धसङ्क्रमाभ्यां लब्धात्मलाभानां निर्जरणसङ्क्रमणकृतस्वरूपप्रच्युत्यभावे सद्भावः सत्ता। ताः प्राप्तानि क्षपितानि *वीरजिनेन* भगवता ॥१॥

१. जीवसामर्थ्यविशेषः इति हे० प्रतौ पार्श्वभागे।

**मिच्छे सासण मीसे अविरय देसे पमत्त अपमत्ते ।**
**नियट्टि अनियट्टि सुहमुवसम खीण सजोगि अजोगि गुणा ॥२॥**

मिच्छे॰ प्रथमं मिथ्यादृष्टिगुणस्थानं, तत्र गुणाः=ज्ञानदर्शनचारित्ररूपाः, स्थानं पुनरत्र तेषां शुद्ध्यशुद्धिप्रकर्षाप्रकर्षकृतस्वरूपभेदस्ततो मिथ्यादृष्टिर्गुणस्थानं ज्ञानादिगुणानामविशुद्धिप्रकर्षविशुद्ध्यप्रकर्षकृतस्वरूपविशेषो मिथ्यादृष्टिगुणस्थानम् ।

ननु च दृष्टौ विपर्यस्तायां तदाधारत्वाद् गुणानामभाव एव, तदभावे च कुतस्तत्स्वरूपविशेषात्मकं मिथ्यादृष्टिगुणस्थानमित्यत्रोच्यते—यद्यपि मिथ्यात्वमोहनीयोदयाद् दृष्टिविपर्यासस्तथापि नैकान्तेनास्य निर्गुणत्वमजीवत्वप्रसङ्गात्, इत्यस्ति तस्यापि या च यावती च गुणमात्रा दृष्टिविपर्यासेन तु सापि विपर्यस्तस्वरूपैव । ननु गुणाः ज्ञानादिरूपाः, तत्कथं विपर्यस्तायां दृष्टौ स्युः ? उच्यते—इह यद्यपि प्रबलमिथ्यात्वोदयात् अर्हत्प्रणीतजीवादितत्त्वप्रतिपत्तिर्विपर्यस्ता स्यात्, तथाऽपि काचिन्मनुष्यपश्वादिप्रतिपत्तिरविपर्यस्ता, ततो निगोदावस्थायामपि तथाभूताऽव्यक्तस्पर्शमात्रप्रतिपत्तिरविपर्यस्तापि, एवमिहापि मिथ्यात्वोदयेऽपि काचिदविपर्यस्ता दृष्टिर्भवति, इति तदपेक्षया मिथ्यादृष्टेरपि गुणास्थानसंभवः, इति ***कर्मग्रन्थवृत्तौ***[१] ॥१॥

आयं सम्यक्त्वलाभं सादयतीत्यासादनमनन्तानुबन्धिकषायवेदनम्, सति हि तस्मिन्नौपशमिकसम्यक्त्वलाभो जघन्यतः समयेनोत्कृष्टतः षड्भिरावलिकाभिः सीदत्यपगच्छति । सहासादनेन वर्तत इति सासादनः । यद्वा सह सम्यक्त्वतत्त्वरसास्वादेन वर्त्तत इति सास्वादनः, स चासौ सम्यग्दृष्टिश्च, तस्य गुणस्थानम् । एतच्चैवं भवति → संसारवर्त्ती जन्तुरनाभोगनिर्वर्त्तितेन यथाप्रवृत्तकरणेन सम्पादितान्तःसागरोपमकोटाकोटीस्थितिकस्य मिथ्यात्वमोहनीयस्य कर्मणः स्थितेरन्तर्मुहूर्त्तमुदयक्षणादुपर्यतिक्रम्यापूर्वकरणाऽनिवृत्तिकरणसंज्ञिताभ्यां विशुद्धिविशेषाभ्यामन्तर्मुहूर्तकालप्रमाणमन्तरकरणं करोति, तस्मिन् कृते तस्य कर्मणः स्थितिद्वयं भवेदन्तरकरणादधस्तनी प्रथमस्थितिरन्तर्मुहूर्त्तमात्रा, तस्मादेवोपरितनी शेषा द्वितीयस्थितिः । प्रथमस्थितौ मिथ्यात्वदलिकवेदनादसौ मिथ्यादृष्टिरन्तर्मुहूर्तेन तु तस्यामपगतायामन्तरकरणप्रथमसमय एवौपशमिकं सम्यक्त्वमवाप्नोति, मिथ्यात्वदलिकवेदनाभावात्, तस्यामान्तर्मुहूर्त्तिक्यामुप-

---
१-स्वोपज्ञवृत्तौ ।

शान्ताद्धायां जघन्येन समयशेषायामुत्कर्षेण षडावलिकाशेषायां कस्यचिदनन्तानुबन्ध्युदयो भवति, तदुदये चासौ सासादनसम्यग्दृष्टिगुणस्थाने वर्त्तते । उपशमश्रेणिपतितो वा कश्चित्सासादनत्वं याति । तदुत्तरकालमवश्यं मिथ्यात्वोदयादसौ मिथ्यादृष्टिर्भवति ॥२॥

सम्यग्मिथ्यादृष्टिगुणस्थानं वर्णितविधिनौपशमिकसम्यक्त्वमौषधविशेषकल्पमासाद्य मदनकोद्रवस्थानीयं दर्शनमोहनीयमशुद्धं कर्म त्रिधा भवति, अशुद्धमर्द्धशुद्धं विशुद्धं च, त्रयाणां चैतेषां पुञ्जानां मध्ये यदाऽर्द्धविशुद्धः पुञ्ज उदेति, तदार्द्धविशुद्धमर्हद्दृष्टतत्त्वश्रद्धानं स्यात्, तत्तदाऽसौ सम्यग्मिथ्यादृष्टिगुणस्थानमन्तर्मुहूर्तं स्पृशति, तत ऊर्ध्वमवश्यं सम्यक्त्वं मिथ्यात्वं वा गच्छति ॥३॥

तथा विरतिर्विरतं, तत्पुनः सावद्ययोगप्रत्याख्यानं, तन्न जानाति नाभ्युपगच्छति न तत्पालनाय यतते इति त्रयाणां पदानामष्टौ भङ्गास्तत्र प्रथमेषु चतुर्षु मिथ्यादृष्टिरज्ञानित्वाल्लभ्यते, शेषेषु सम्यग्दृष्टिस्तस्य ज्ञानमेव भवति । सप्तसु भङ्गेषु नास्य विरतमित्यविरतश्चरमभङ्गे तु विरतिरस्ति, अष्टभङ्गी स्थापना → ऽऽऽ ऽऽ। ऽ।ऽ ऽऽ। ।ऽऽ ।ऽ। ।।ऽ ।।। अविरतश्चासौ सम्यग्दृष्टिश्च तस्य गुणस्थानम्, सम्यग्दृष्टित्वं पुनरौपशमिकसम्यक्त्वे वर्णितान्तरकरणकालसम्भवे विशुद्धदर्शनमोहपुञ्जकोदयकालसम्भवे वा क्षायोपशमिकसम्यक्त्वे, सर्वदर्शनमोहक्षयसम्भवे वा क्षायिकसम्यक्त्वे सति भवति, विरतः पुनरप्रत्याख्यानावरणकषायोदयवशान्न भवति ॥४॥

करणत्रययोगत्रयविषयसर्वसावद्ययोगस्य देशे विरतमस्यास्तीति देशविरतः ॥५॥

प्रमत्तः=प्रमादवान् स चासौ संयतश्च ॥६॥

अप्रमत्तो=विकथादिप्रमादरहितः, स चासौ संयतश्च ॥७॥

अपूर्वं करणं स्थितिघातरसघातगुणश्रेणिगुणसङ्क्रमस्थितिबन्धानां पञ्चानामर्थानां निर्वर्तनमस्याऽसावऽपूर्वकरणस्तथाहि →बृहत्प्रमाणाया ज्ञानावरणीयादिकर्मस्थितेरपवर्त्तनाकरणेन खण्डनमल्पीकरणं स्थितिघातो । रसस्यापि प्रचुरीभूतस्य सतोऽपवर्त्तनाकरणेन खण्डनं रसघातः । एतौ द्वावपि पूर्वगुणस्थानेषु विशुद्धेरल्पत्वादल्पावेव कृतवान्, अत्र पुनर्विशुद्धेः प्रकृष्टत्वाद्बृहत्प्रमाणतयाऽपूर्वाविमौ करोति । तथोपरितनस्थितेर्विशुद्धिवशादपवर्त्तनाकरणेनावतारितस्य दलिकस्यान्तर्मुहूर्त्तप्रमाणमुदयक्षणादुपरि

क्षिप्रतरक्षपणाय प्रतिक्षणमसंख्येयगुणवृद्ध्या विरचनं गुणश्रेणिरित्युच्यते । एतां च पूर्वगुणस्थानेष्वविशुद्धत-
रत्वात् कालतो द्राघीयसीं[१] दलिकरचनामाश्रित्य संकीर्णतरामल्पदलिकस्यापवर्त्तनाद् विरचितवानिह तु
विशुद्धतरत्वादपूर्वां कालतो ह्रसीयसीं[२] दलिकरचनामाश्रित्य पृथुतरां बहुतरदलिकापवर्त्तनाद्विरचयति । तथा
बध्यमानशुभप्रकृतिषु [अबध्यमान]अशुभप्रकृतिदलिकस्य प्रतिक्षणमसंख्येयगुणवृद्ध्या विशुद्धिवशान्नयनं
गुणसङ्क्रमस्तमिहासावपूर्वं करोति । तथा स्थितिं कर्मणां द्राघीयसीं प्राग् बद्धवानिह तु तामपूर्वां विशुद्धत्वादेव
ह्रस्वीयसीं बध्नाति । अयं चापूर्वकरणो द्विधा —>क्षपक उपशमकश्च, क्षपणोपशमनार्हत्वाद् राज्यार्हकुमार-
राजवन्न पुनरसौ क्षपयत्युपशमयति वा तस्य गुणस्थानमपूर्वगुणस्थानम् । अपूर्वकरणाद्धाया आन्तमौहूर्ति-
क्याः प्रथमसमये जघन्यादीन्युत्कृष्टान्तान्यध्यवसायस्थानान्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि, द्वितीयस
मये तदन्यान्यधिकतराणि, एवं यावच्चरमसमयः । प्रथमसमये जघन्यात् प्रथमसमयोत्कृष्टमनन्तगुणविशुद्धम्,
तस्माद् द्वितीयसमये जघन्यमनन्तगुणविशुद्धम्, तस्मात्तदुत्कृष्टमनन्तगुणविशुद्धमित्येवं यावच्चरमसमयो-
त्कृष्टम् । एकसमयगतानि तु परस्परं षट्स्थानपतितानि, युगपदेतद्गुणस्थानप्रविष्टानां बहूनां जीवानां
परस्परमध्यवसायस्थानस्य भेदलक्षणा निवृत्तिरप्यस्तीति निवृत्तिबादरगुणस्थानमपीदमुच्यते ॥८॥

युगपदेतद्गुणस्थानं प्रतिपन्नानां जीवानामन्योन्यस्य सम्बन्धिनोऽध्यवसायस्थानस्य व्या-
वृत्तिर्नास्त्यस्येत्यनिवृत्तिरन्येषां यदध्यवसायस्थानमसावपि कश्चित् तद्वर्त्तीत्यर्थः । सम्परायः=कषायोदयो,
बादरः स्थूलः सम्परायो यस्य स बादरसम्परायः । सूक्ष्मकिट्टीकृतसम्परायापेक्षया बादरत्वम् । अनिवृ-
त्तिश्चासौ बादरसम्परायश्चानिवृत्तिबादरसम्परायः । स च द्विविधः —> क्षपक उपशमको वा, क्षपयत्युप-
शमयति वा मोहनीयादि कर्मेति कृत्वा तस्य गुणस्थानमिदमप्यन्तर्मुहूर्त्तप्रमाणमेव । तत्र चान्तर्मुहूर्त्ते
यावन्तः समयास्तत्प्रविष्टानां तावन्त्येवाध्यवसायस्थानानि स्युरेकसमयप्रविष्टानामेकस्यैवाध्यवसायस्या-
नुवर्तनात् ॥९॥

किट्टीकृतलोभकषायोदयरूपो यस्य, सोऽपि द्विधा —> क्षपक उपशमको वा, क्षपयत्युप-
शमयति वा लोभमेकमपीति कृत्वा तस्य गुणस्थानम् ॥१०॥

उपशान्तकषायवीतरागच्छद्मस्थगुणस्थानम् । तत्राविरतसम्यग्दृष्टेः प्रभृत्यनन्तानुबन्धिनः
कषाया उपशान्ता भवन्ति, उपशमश्रेण्यारम्भे ह्यनन्तानुबन्धिकषायान् अविरतो देशविरतः प्रमत्तोऽप्रमत्तो

---

१०ह्रस्वीयसीम्-हे०, ला० । २०द्राघीयसीम्-हे० ला० ।

वा सन्नुपशमय्य दर्शनमोहत्रितयमुपशमयति, तदुपशमानन्तरं प्रमत्ताप्रमत्तगुणस्थानपरिवृत्तिशतानि कृत्वा ततोऽपूर्वकरणगुणस्थानोत्तरकालमनिवृत्तिबादरसम्परायगुणस्थाने चारित्रमोहनीयस्य प्रथमं नपुंसकवेदमुपशमयति, ततः स्त्रीवेदमित्यादि यावत् सूक्ष्मसंपरायगुणस्थाने सञ्ज्वलनलोभमुपशमयतीति, तदेवमन्येष्वपि गुणस्थानेषु क्वापि कियतां कषायाणामुपशान्तत्वसम्भवादतस्तद्व्यवच्छेदार्थं वीतरागग्रहणम् ॥११॥

क्षीणकषायवीतरागच्छद्मस्थगुणस्थानं । तत्रानन्तानुबन्धिकषायान् प्रथममविरतसम्यग्दृष्ट्याद्यप्रमत्तान्तगुणस्थानेषु क्षपयति, दर्शनत्रितयं चैतेष्वेव गुणस्थानकेषु क्षपयति । इत्येवं यावत् सञ्ज्वलनलोभं सूक्ष्मसंपरायगुणस्थाने, तदेवमन्येष्वपि सरागेषु क्षीणकषायव्यपदेशः सम्भवति, अतस्तद्व्यवच्छेदार्थं वीतरागग्रहणम् ॥१२॥

वीर्यान्तरायक्षयक्षयोपशमसमुत्थलब्धिविशेषप्रत्ययमात्मनो वीर्यं योगः । स द्विधा→सकरणोऽकरणश्च । तत्रालेश्यस्य केवलिनः कृत्स्नयोर्ज्ञेयदृश्ययोरर्थयोः केवलं ज्ञानं दर्शनं चोपयुञ्जानस्य योऽसावपरिस्पन्दोऽप्रतिमो वीर्यविशेषः सोऽकरणः, स च नेहाधिक्रियते । यस्तु मनोवाक्कायकरणसाधनः स सकरणस्तेनेहाधिकारः । तत्र कायिकः चङ्क्रमणनिमेषोन्मेषादौ, वाचिको देशनादौ, मानसो मनःपर्यायज्ञानिभिरनुत्तरसुरादिभिर्वा मनसा पृष्टस्य सतो मनसैव देशनायां, ते हि भगवत्प्रयुक्तानि मनोद्रव्याणि मनपर्यायज्ञानेनाऽवधिज्ञानेन च पश्यन्ति, ततस्तद्द्वारेण पृष्टमर्थमवगच्छन्ति । सह योगेन वर्त्तत इति सयोगः सयोगीति वा, स चासौ केवली च सयोगिकेवली, तस्य गुणस्थानम् ॥१३॥

नास्ति योगोऽस्येत्ययोगी, स त्रिविधोऽपि योगः प्रत्येकं द्विविधः सूक्ष्मो बादरश्च । तत्र केवलोत्पत्तेरुत्तकालमन्तर्मुहूर्तावशेषायुष्कः सयोगिकेवली प्रथमं बादरकाययोगेन बादरवाग्मनोयोगौ निरुणद्धि, ततः सूक्ष्मकाययोगेन बादरं काययोगं निरुणद्धि, ततश्च सर्वबादरयोगनिरोधनान्तरं सूक्ष्मक्रियमनिवृत्तिशुक्लध्यानं ध्यायन् सूक्ष्मकाययोगेन सूक्ष्मवाग्मनोयोगौ निरुणद्धि, ततस्तमेव सूक्ष्मकाययोगं स्वात्मनैव निरुणद्धि । ततः समुच्छिन्नक्रियमप्रतिपातिशुक्लध्यानं ध्यायन् ह्रस्वपञ्चाक्षरोच्चारणकालमात्रं शैलेशीकरणप्रविष्टो भवति, शीलस्य=योगलेश्याकलङ्कविप्रमुक्तस्य यथाख्यातचारित्रलक्षणस्य य ईशः स शैलेशः, तस्येयं शैलेशी=त्रिभागेन स्वदेहावगाहनायामात्मनोऽत्यन्तस्थिरावस्थितिरित्यर्थः, तस्यां करणं पूर्वरचितशैलेशीसमयसमानगुणश्रेणीकस्य वेदनीयनामगोत्राख्यस्याऽघातिकर्मत्रितयस्यासंख्येयगुणया श्रेण्यायुः-

शेषस्य तु यथास्वरूपस्थितया श्रेण्या निर्जरणं शैलेशीकरणम् ॥१४॥ एतानि गुणस्थानानि ॥२॥

**अभिनवकम्मग्गहणं बंधो ओहेण तत्थ वीससयं ।**
**तित्थयराहारदुगवज्जं मिच्छम्मि सत्तरसयं ॥३॥**

अभि० नवीनकर्माणुग्रहणं बन्धस्तत्र ओघेन=सामान्येन विंशत्युत्तरं प्रकृतिशतमधिक्रियते । तथाहि → ज्ञानावरणे पञ्च, दर्शनावरणे नव, वेदनीये द्वे, मोहनीये अष्टाविंशतिरायुषि चतस्रो, नाम्नि त्रिनवतिर्गोत्रे द्वे, अन्तराये पञ्च । एतत्पिण्डोऽष्टाचत्वारिंशं शतमेतेन सत्तायामधिकारः । उदयोदीरणयोश्चौदारिकादिबन्धनानां पञ्चानामौदारिकादिसंघातनानां च पञ्चानां यथास्वमौदारिकादिषु पञ्चसु शरीरेष्वन्तर्भावे वर्णगन्धरसस्पर्शानां चतुर्णामभिन्नानां ग्रहणे शेषेण द्वाविंशेन शतेनाधिकारो । बन्धे तु सम्यक्त्वसम्यग्मिथ्यात्ववर्जं शेषेण विंशेन शतेनाधिकारः । अधुना मिथ्यादृष्टयादिगुणस्थानेषु बन्धो दर्श्यते, तत्र तीर्थकराहारकद्विकवर्जं तीर्थकरनाम्न आहारकद्वयस्य च मिथ्यादृष्टेर्बन्धो नास्ति, तद्बन्धस्य यथासङ्ख्यं सम्यक्त्वसंयमप्रत्ययत्वात् । शेषं सप्तदशोत्तरशतं कर्मप्रकृतीनां मिथ्यादृष्टिगुणस्थाने [बन्धः] स्यात् ॥३॥

**नरयतिग जाइथावरचउ हुंडायवछिवट्ठनपुमिच्छं ।**
**सोलंतो इगहियसय सासणि तिरिथीणदुहगतिगं ॥४॥**

नर० नरकत्रिकं=नरकगति-नरकानुपूर्वी-नरकायूरूपम्, जातिचतुष्कमेकद्वि-त्रि-चतुरिन्द्रियजातयः, स्थावरचतुर्कं=स्थावर-सूक्ष्मापर्याप्तसाधारणलक्षणम्, हुण्डं संस्थानम्, आतपं, सेवार्त्तं संहननम्, 'नपु'त्ति नपुंसकवेदः, मिथ्यात्वमेतासां षोडशप्रकृतीनामन्तो=व्यवच्छेदो मिथ्यादृष्टौ, तत्र भावः तदुत्तरेषु चाऽभावो, मिथ्यात्वप्रत्ययत्वादेतत्प्रकृतिबन्धस्य, तस्य चोत्तरत्राभावात्, ततः सासादने प्रकृतिषोडशके सप्तदशोत्तरशतादपनीते शेषमेकोत्तरं शतम् । तीर्थकरनाम्नस्तु सत्यपि तत्प्रत्यये सम्यक्त्वे नास्तीह बन्धस्तस्य हि बन्धारम्भः शुद्धसम्यग्दृष्टेरेव, तत्कर्मा च सासादनत्वं न प्राप्नोति । तिर्यक्त्रिकं=तिर्यगति-तिर्यगानुपूर्वी-तिर्यगायुः, स्त्यानर्द्धित्रिकं=निद्रानिद्रा-प्रचलाप्रचला-स्त्यानर्द्धिः, दुर्भगत्रिकं=दुर्भग- दुःस्वरानादेयरूपम् ॥४॥

**अणमज्झागिइसंघयणचउ निउज्जोयकुखगइत्थि त्ति ।**
**पणवीसंतो मीसे चउसयरि दुआउयअबंधा ॥५॥**

अण० अनन्तानुबन्धिनश्चत्वारःक्रोधाद्याः, मध्यमाकृतिचतुष्कं=न्यग्रोधपरिमण्डलसादिवामनकुब्जरूपम्, मध्यमसंहननचतुष्कम्=ऋषभनाराच-नाराचार्द्धनाराचकीलिकारूपम्, नीचैर्गोत्रम्, उद्द्योतं, कुखगतिरप्रशस्तविहायोगतिः, स्त्रीवेद इति पञ्चविंशतेरन्तो, मिश्रे देव-मनुष्यायुषोरपि बन्धो नास्ति, आयुर्बन्धाध्यवसायस्थानविरहादतस्तत्सहितायां सासादनव्यवच्छिन्नपञ्चविंशतावेकोत्तरशतादपनीतायां शेषाश्चतुःसप्ततिर्बन्धे ॥५॥

**सम्मे सगसयरि जिणाउबंधि वइर नरतिग बियकसाया ।**
**उरलदुगंतो देसे सत्तट्ठी तिअकसायंतो ॥६॥**

सम्मे० सम्यग्दृष्टौ जिनायुर्बन्धे जिननामदेवमनुष्यायुष्केषु प्रक्षिप्तेषु सप्तसप्ततिः । 'वइर' त्ति वज्रऋषभनाराचसंहननम् । तत्र द्वितीयकषायचतुष्कं तदुदयाभावान्न बध्नाति देशविरतादिः, कषाया ह्यनन्तानुबन्धिवर्जा वेद्यमाना एव बध्यन्ते, अनन्तानुबन्धिनस्तु चतुर्विंशतिमोहसत्कर्माऽनन्तक्षपको मिथ्यात्वं गतो बन्धावलिकामात्रं कालमनुदितान् बध्नाति । नरत्रिकं त्वेकान्तेन मनुष्यवेद्यमेव, वज्रऋषभनाराचं औदारिकद्विकं च मनुष्यतिर्यगेकान्तवेद्यमेव, देशविरतादिस्तु देवगतिवेद्यमेव बध्नाति नान्यत्, तेनैतद्दशकस्य सम्यग्दृष्टावन्तः, सम्यग्मिथ्यादृष्टौ न कस्यचिद् बन्धव्यवच्छेदस्तस्याऽविरतसम्यग्दृष्टिना सह बन्धहेत्वविशेषात् । देशविरते सप्तषष्टिः, तत्र तृतीयकषायाणामन्तस्तदुत्तरेषु तेषामुदयाभावादनुदितानां च बन्धाभावात् । ॥६॥

**तेवट्ठि पमत्ते सोग अरइ अथिरदुग अजस अस्सायं ।**
**वुच्छिज्ज छच्च सत्त व नेइ सुराउं जया निट्ठं ॥७॥**

तेव० [सर्व]विरतो द्विधा ⟶ प्रमत्तोऽप्रमत्तश्च । तत्र प्रमत्ते त्रिषष्टिः, शोकादयः षट्प्रकृतयो व्यवच्छिन्नाः स्युः, सप्त वा नयति सुरायुर्यदा निष्ठां प्रमत्तः ॥७॥

**गुणसट्ठि अप्पमत्ते सुराउबंधं तु जइ इहागच्छे ।**
**अन्नह अट्ठावन्ना जं आहारगदुगं बंधे ॥८॥**

गुण० अप्रमत्ते प्रमत्तव्यवच्छिन्नासु षट्प्रकृतिषु त्रिषष्टिरपनीतासु शेषायां सप्तपञ्चाशति द्वयोराहारकशरीराङ्गोपाङ्गयोः प्रक्षिप्तयोरेकोनषष्टिः, सुरायुर्बध्नन् यदीहागच्छेत्, देवायुष्कबन्धं हि प्रमत्तः सन्नारभते, तद्बन्धाद्धायामेव कश्चिदप्रमत्तो भूत्वा समापयति, न त्वप्रमत्त एवारभते, तद्बन्धस्य तदुत्तरेष्वसंभवात्, तेषामत्यन्तशुद्धत्वाद्, अन्यथा प्रमत्त एव सुरायुर्बन्धव्यवच्छेदेऽप्रमत्तेऽष्टपञ्चाशत् ॥८॥

**अडवन्न अपुव्वाइम्मि निद्ददुगंतो छप्पन्न पणभागे ।**
**सुरदुग पणिंदि सुखगइ तसनव उरलविणु तणुवंगा ॥९॥**

अड० अपूर्वकरणाद्धायाः सप्तभागाः क्रियन्ते, तत्राद्ये भागेऽष्टपञ्चाशदेव, तत्र निद्राप्रचलयोरन्तस्तदुत्तरत्र तद्बन्धाध्यवसायाभावात्, पञ्चसु भागेषु षट्पञ्चाशत्, सुरद्विकं=देवगति-देवानुपूर्वीरूपम्, पञ्चेन्द्रियजातिः, 'सुखगइत्ति' शुभविहायोगतिः, त्रसनवकं त्रसबादरेत्यादिआदेयान्तम्, औदारिकं विना शरीरचतुष्कमङ्गोपाङ्गद्वयं च ॥९॥

**समचउर निमिण जिण वन्न अगुरुलघुचउ छलंसि तीसंतो ।**
**चरमे छवीसबंधो हासरईकुच्छभयभेओ ॥१०॥**

सम० समचतुरस्रं, निर्माणं, जिननाम, वर्णचतुष्कं=वर्ण-गन्ध-रस-स्पर्शरूपम्, अगुरु-लघुचतुष्कम्=अगुरुलघूपघातपराघातोच्छ्वासाख्यमिति त्रिंशत्प्रकृतीनामन्तोऽपूर्वकरणस्य षष्ठांशे, चरमे=सप्तांशे षड्विंशतेर्बन्धः । हास्यादिप्रकृतिचतुष्कस्य भेदोऽन्तः ॥१०॥

**अनियट्टिभागपणगे इगेगहीणो दुवीसविहबंधो ।**
**पुमसंजलणचउण्हं कमेण छेओ सतर सुहुमे ॥११॥**

अनियट्टि० अनिवृत्त्यद्धायाः[१] पञ्चसु भागेषु यथाक्रममेकैकस्मिन् भागे एकैकप्रकृतिहीनो

१. ०ट्टि० अनिवृत्तौ द्वाविंशतेर्बन्धः । अनि०-पा० ।

द्वाविंशतिबन्धो ज्ञेयः । पुरुषवेदादीनां मायासञ्ज्वलनान्तानामुत्तरत्र तद्बन्धाध्यवसायस्थानाभावाल्लोभ-सञ्ज्वलनस्य तु बादरसम्परायप्रत्ययो बन्धः । स चोत्तरत्र नास्तीत्यतो व्यवच्छेदस्तेनाद्ये भागे २२, द्वितीये २१, तृतीये २०, चतुर्थे १९, पञ्चमे १८, सूक्ष्मसंपराये सप्तदशबन्धः ॥११॥

**चउदंसणुच्चजसनाणविग्घदसगं ति सोलसुच्छेओ ।**
**तिसु सायबंध छेओ सजोगि बंधुणंतो अ ॥१२॥**

चउ० दर्शनावरणचतुष्कमुच्चैर्गोत्रं, यशःकीर्तिनाम, ज्ञानान्तरायदशकमिति षोडशप्रकृतीनां व्यवच्छेद, एतद्बन्धस्य साम्परायि[क]त्वात् । त्रिषूपशान्तमोहादिषु सातस्य बन्धः, सयोगिनि तद्बन्ध[व्यवच्छेदस्तदुत्तरस्मिन्नयोगिकेवलिनि तद्बन्धप्रत्ययस्य योगस्याभावात् । तदेवं प्रकृतीनां ज्ञेयो बन्धस्यान्तोऽनन्तश्च, यत्र हि गुणस्थाने यासां प्रकृतीनां बन्धहेतु]व्यवच्छेदस्तत्र तासां बन्धस्यान्तस्तत उत्तरेषु कारणवैकल्येन बन्धाभावादितरासां बन्धस्यानन्तः । ॥१२॥

**॥ इति बन्धाधिकारः ॥**

**उदओ विवागवेयणमुदीरण अपत्ति इह दुवीससयं ।**
**सतरसयं मिच्छे मीससम्मआहारजिणऽणुदया ॥१३॥**

उद० कर्मपुद्गलानां विपाकवेदनमुदयः । उदीरणा चाप्राप्ते विपाकवेदने । इहोदयोदीरणयोः प्रकृतीनां द्वाविंशशतमधिक्रियते, तच्च दर्शितमेव प्राक् । तत्र सम्यग्मिथ्यात्वसम्यक्त्वाहारकतनुतदङ्गोपाङ्गजिननाम्नामुदयो नास्ति मिथ्यादृष्टौ । शेषं सप्तदशोत्तरं शतमुदये ॥१३॥

**सुहुमतिगायवमिच्छं मिच्छंतं सासणे इगारसयं ।**
**निरयाणुपुव्विणुदया अणथावरइगविगलअंतो ॥१४॥**

सुहुम० सूक्ष्मत्रिकं सूक्ष्मापर्याप्तसाधारणरूपमातपं मिथ्यात्वं च मिथ्यात्वान्तं भवति । न चैतेषु स्थितो जीवः सासादनादित्वं लभते, नापि पूर्वप्रतिपन्नस्तेषूपपद्यते । सासादनास्तु यद्यपि बादरपर्याप्तैकेन्द्रियेषूत्पद्यन्ते तथापि न तस्यातपनामोदयासम्भवस्तत्रोत्पन्नमात्रस्याऽसमाप्तशरीरस्यैव सासादनत्ववमनात्, समाप्ते च शरीरे तत्रातपनामोदयस्तेनैतासां मिथ्यादृष्टौ व्यवच्छेद उदयस्य ।

सासादनभावस्थस्य नरकेषूत्पादो न भवति, तदपान्तरालगतिभाविनरकानुपूर्व्या नास्त्युदय इति तत्सहिते मिथ्यादृष्टिव्यवच्छिन्ने च पञ्चकोपनीते सासादने शेषमेकादशोत्तरं शतम् । 'अण'त्ति अनन्तानुबन्धिनः योऽपि पूर्वप्रतिपन्नसम्यक्त्वोऽनन्तानुबन्धिनामुदयं करोति सोऽपि सासादन एव [भवति, स्थावरैक-(केन्द्रिय)विकलेन्द्रियजातयस्तु यथास्वमेकेन्द्रियादिवेद्या एव, उत्तरगुणस्थानानि तु संज्ञिपञ्चेन्द्रिय एव प्रतिपद्यते पूर्वप्रतिपन्नोऽपि पञ्चेन्द्रियेष्वेव गच्छ]तीत्युत्तरेष्वासां प्रकृतीनामुदयाभावः ॥१४॥

**मीसे सयमणुपुव्वीणुदया मीसोदएण मीसंतो ।**
**चउसयमजए सम्माणुपुव्विखेवा बियकसाया ॥१५॥**

मीसे० मिश्रे विग्रहगतिभावी[1] नास्त्यानुपूर्वीचतुष्कस्योदयस्तत्र नरकानुपूर्वी पूर्वापनीतैव, शेषत्रयसहितं सासादनव्यवच्छिन्नं नवकमेकादशोत्तरशतादपनीतं, ततो नवनवतिः शेषाः, तस्यां मिश्रे प्रक्षिप्ते शतं स्यात् । मिश्रस्यान्तः सम्यक्त्वे आनुपूर्वीचतुष्के च प्रक्षिप्तेऽयतेऽविरते चतुरुत्तरशतम् ॥१५॥

**मणुतिरिणुपुव्वि विउवऽट्ठ दुहग अणाइज्जदुग सतरछेओ ।**
**सगसीइ देसि तिरिगइआउ निउज्जोय तिकसाया ॥१६॥**

मणु० वैक्रियाष्टकं=देवत्रिक-नरकत्रिक-वैक्रियशरीर-तदङ्गोपाङ्गरूपम् । नापि पूर्व-प्रतिपन्नदेशविरत्यादेर्जीवस्य द्वितीयकषायोदयसम्भवो, मनुजतिर्यगानुपूर्व्योः परभवादिसमयेषु त्रिष्वपान्त-रालगतावुदयः, स च यथायोगं मनुजतिरश्चां वर्षाष्टकादुपरिष्टात् सम्भविषु देशविरत्यादिगुणस्थानेषु न स्यात् । देवत्रिकं नरकत्रिकं च यथास्वं देवनारकवेद्यमेव । वैक्रियशरीरतदङ्गोपाङ्गनाम्नोर्देवनारकेषु उदयस्तिर्यग्मनुष्येषु तु प्राचुर्येणाविरतसम्यग्दृष्ट्यन्तेषु, यस्तूत्तरगुणस्थानेष्वपि केषाञ्चिद् आगमे *विष्णुकुमार-श्रीस्थूलभद्रादीनां* वैक्रियद्विकस्योदयः श्रूयते स *इहाचार्येण* न विवक्षितः, किमिति स्तोकत्वादाहोश्विदन्यः कोऽप्यभिप्राय इति न विद्मः । दुर्भगमनादेयमयशःकीर्त्तिरित्येतत्त्रयं देशविरतादीनां गुणप्रत्ययान्नोदेति, इति सप्तदशच्छेदः, सप्ताशीतिर्देशे, तिर्यग्गति-तिर्यगायुरुद्योतनामेत्येताः स्वभावतस्तिर्यग्वेद्या एव, तेषु

---

१. मिश्रे विग्रहगतिर्न सम्भवत्यतो विग्रह०-पा०।

च देशविरतान्तान्येव गुणस्थानानि । उद्योतनाम्नस्तु यतिवैक्रियेषूदयः सम्भवति, स ***त्विहाचार्येण*** न विवक्षितः । नीचैर्गोत्रं तु तिर्यक्षु गतिस्वाभाव्यात् ध्रुवोदयिकं न परावर्तते, ततश्च देशविरतस्यापि तिरश्चो नीचैर्गोत्रोदयोऽस्त्येव, मनुजेषु तु सर्वस्य देशविरतादेर्गुणप्रत्ययान्नोदेति, [प्रत्याख्यानावरणोदये चारित्र-लाभ एव न भवति, न पूर्वप्रतिपन्नचारित्रस्य तदुदयः] ॥१६॥

**अट्ठच्छेओ इगसी पमत्ति आहारजुगलपक्खेवा ।**
**थीणतिगाहारगदुगछेओ छस्सयरि अपमत्ते ॥१७॥**

अट्ठ० प्रमत्ते आहारजुगलशेषपदे [illegible] 'थीणतिगाहारगदुग' त्ति आहारकं कुर्वाणो यतिरवश्यं प्रमादवशगः स्यात् । यत्त्विद*मन्यत्र श्रूयते*→प्रमत्तयतिराहारकं विकृत्य पश्चाद् विशुद्धिवशात् तत्रस्थ एवाप्रमत्ततां याति तन्न विवक्षितम् ॥१७॥

**सम्मत्तंतिमसंघयणतिगच्छेओ बिसत्तरि अपुव्वे ।**
**हासाइछक्कअंतो छसट्ठि अनियट्टि वेयतिगं ॥१८॥**

सम्म० सम्यक्त्वे क्षपिते उपशमिते वा श्रेणिद्वयमारुह्यत इत्यपूर्वकरणादौ तदुदयाभावः । अन्तिमसंहननत्रयोदये तु श्रेणिमारोढुं न शक्यते, तथाविधविशुद्धेरभावादित्युत्तरेषु तदुदयाभावः ॥१८॥

**संजलणतिगं छच्छेओ सट्ठि सुहुमम्मि तुरियलोभंतो ।**
**उवसंतगुणे गुणसट्ठि रिसहनारायदुगअंतो ॥१९॥**

संज० 'रिसहनारायदुगअंतो' त्ति प्रथमसंहननेनैव[1] क्षपकश्रेण्यारोहणात् क्षीणमोहादौ ऋषभनाराचद्विकोदयाभावः । उपशमश्रेण्यां त्वाद्यसंहननत्रयेणाऽऽरुह्यते ॥१९॥

**सगवन्न खीण दुचरमि निद्दुगंतो य चरमि पणपन्ना ।**
**नाणंतरायदंसणचउ छेओ सजोगि बायाला ॥२०॥**

सग० क्षीणमोहस्य द्विचरमे=चरमसमयादर्वाक् समये निद्रा-प्रचलयोः चरमसमये तु क्षीणत्वादन्तो*ऽपरे* त्वाहुः → उपशान्तमोहे निद्राद्वि]कस्यान्तः । पञ्चानामपि निद्राणां घोलनापरिणामेन

१ ०संहनन एव-है० ।

स्यादुदयः । क्षपकाणां त्वतिविशुद्धत्वान्न निद्रोदयसम्भवः ॥२०॥

**तित्थुदया उरला थिरखगइदुग परित्ततिग छ संठाणा ।**
**अगुरुलहुवन्नचउ निमिणतेयकम्माइसंघयणं ॥२१॥**

तित्थु० अगुरुलघुचतुष्कमगुरुलघूपघातपराघातोच्छ्वासाख्यम् ॥२१॥

**दूसर सूसर सायासाएगयरं च तीस वुच्छेओ ।**
**बारस अजोगि सुभगाइज्जजसन्नयरवेयणियं ॥२२॥**

दूसर० सुस्वरदुःस्वरनाम्नोर्भाषापुद्गलविपाकित्वाद् वाग्योगिनामेवोदयः । शेषाणां शरीरपुद्गलविपाकित्वात् काययोगिनामेवोदयः । सातमसातं वा यदयोगिगुणस्थाने स वेदयिष्यते ॥२२॥

**तसतिग पणिंदि मणुयाउगइ जिणुच्चं ति चरमसमयंता ।**
**उदयव्वुदीरणा परमपमत्ताईसगगुणेसु ॥२३॥**

**॥ उदओ सम्मत्तो ॥**

तस० ॥२३॥

**एसा पयडितिगूणा वेयणियाहारजुगल थीणतिगं ।**
**मणुयाउ पमत्तंता अजोगि अणुदीरगो भगवं ॥२४॥**

**[उदीरणा सम्मत्ता]**

एसा० एषोदीरणा सातासातमनुष्यायूरूपप्रकृतित्रिकोना ज्ञेया, सातासातमनुजायुषां प्रमादसहितेनैव योगेनोदीरणा स्यादित्यप्रमत्तादिषु तदुदीरणाया अभावः ॥२४॥

**सत्ता कम्माण ठिई बंधाइलद्धअत्तलाभाणं ।**
**संते अडयालसयं जा उवसमु विजिणु बियतइए ॥२५॥**

सत्ता० बन्धादिभिर्लब्धात्मलाभानामादिशब्दात् संक्रमकरणोद्वर्त्तनापवर्त्तन-करणादिग्रहः । तत्र मिथ्यादृष्टेः १४८ सत्ता । [यदा प्राग्बद्धनरकायुष्कः क्षायोपामिकं सम्यक्त्वमवाप्य जिननाम्नो बन्धमारभते तदाऽसौ नरकेषूत्पद्यमानः सम्यक्त्वमवश्यं वमतीति मिथ्यादृष्टेर्जिननाम्नोऽपि

सत्ता, द्वितीये सासादने तृतीये मिश्रे जिननाम विना १४७ सत्ता,जिननामसत्कर्मणो जीवस्य तद्भावानवाप्तेः । अविरताद्यप्रमत्तान्तानामक्षपितदर्शनसप्तकानाम् १४८] सम्भवति ॥२५॥

**अपुव्वाइचउक्के अण तिरिनिरयाउ विणु बिआलसयं ।**
**सम्माइचउसु सत्तगखयम्मि इगचत्तसयमहवा ॥२६॥**

अपु० कश्चिद् वियोजितानन्तानुबन्धिचतुष्को बद्धदेवायुर्मनुजायुषि वर्तमान उपशमश्रेणिमारोहति, तस्यापूर्वादिचतुष्के अनन्तानुबन्धिचतुष्कादिप्रकृतिषट्कं विना १४२ सत्ता । आद्यकषायचतुष्कदर्शनमोहत्रिकरूपसप्तकक्षये अविरतादिगुणस्थानचतुष्के १४१ सत्ता । इयं चैतेषु गुणस्थानेषु सामान्यजीवानां सम्भवमधिकृत्य सत्ता वर्णिता । अधुनाऽधिकृतस्तुत्यस्य जिनस्योच्यते ॥२६॥

**खवगं तु पप्प चउसु वि पणयालं नरयतिरिसुराउ विणा ।**
**सत्तग विणु अडतीसं जा अनियट्टी पढमभागो ॥२७॥**

खव० चतुर्ष्वप्यविरतादिगुणस्थानेषु १४५ सत्ता, प्रागभवव्यवच्छिन्ननरकाद्यायुस्त्रयसत्ताकत्वात् । क्षपकजिनस्य दर्शनसप्तकं विना १३८ सत्ता, यावदनिवृत्त्यद्धायाः प्रथमो भागः ॥२७॥

**थावरतिरिनिरयायवदुग थीणतिगेग विगल साहारं ।**
**सोलखओ दुवीससयं बियंसि बियतियकसायंतो ॥२८॥**

थाव० तत्र च प्रथममेव द्वितीयतृतीयानष्टौ कषायान् क्षपयितुमारभते, तेषु चार्द्धक्षपितेषु स्थावरद्विकादिषोडशप्रकृतिक्षयः स्यात् १२२ सत्ता, द्वितीयांशेऽनिवृत्त्यद्धायास्ततः शेषमष्टकस्य क्षपयति ॥२८॥

**तइयाइसु चउदसतेरबारछपणचउतिहिय सय कमसो ।**
**नपुइत्थिहासछगपुंसतुरियकोहमयमायखओ ॥२९॥**

तइ० यावन्नवमे भागे १०३ सत्ता, तत्र मायाक्षयः ॥२९॥

**सुहुमि दुसय लोहंतो खीणदुचरिमेगसय दुनिद्दखओ ।**
**नवनवइ चरमसमए चउदंसणनाणविग्घंतो ॥३०॥**

सुहु० सूक्ष्मसंपराये १०२ सत्ता, लोभस्यान्तः । क्षीणमोहस्य द्विचरमे समये १०१

सत्ता, निद्राप्रचलाक्षयः । ततश्चरमसमये ९९ सत्ता, तत्र दर्शनचतुष्कादिचतुर्दशप्रकृतिक्षयः ॥३०॥

**पणसीइ सजोगि अजोगि दुचरिमे देवखगइगंधदुगं ।**
**फासट्ठ वन्नरसतणुबंधणसंघायपण निमिणं ॥३१॥**

पण० सयोगिकेवलिनि ८५ सत्ता । अयोगिन्यपि यावद्द्विचरमसमयस्तावत्पूर्वोक्तायाः पञ्चाशीतेः सत्ता ॥३१॥

**संघयणअथिरसंठाणछक्क अगुरुलहुचउ अपज्जत्तं ।**
**सायं व असायं वा परित्तुवंगतिग सुसर नियं ॥३२॥**

संघ० ॥३२॥

**बिसयरिखओ य चरिमे तेरस मणुयतसतिग जसाइज्जं ।**
**सुभगजिणुच्च पणिंदिय सायासाएगयरछेओ ॥३३॥**

बिस० देवद्विकं विहायोगतिद्विकं गन्धद्विकादि७२प्रकृतिक्षयोऽयोगिगुणस्थानस्य द्विचरमसमये, सर्वा अपि ह्येता अनुदयावस्थास्ततश्च यद्यपि सयोगिना योगनिरोधं कुर्वता सर्वासामघातिप्रकृतीनां कालतः समैव गुणश्रेणिरुपरचिता, तथाप्यनुदयावस्थप्रकृतीनां चरमसमये दलिकमुदयवतीषु स्तिबुकसङ्क्रमेण सङ्क्रान्तत्वादात्मानुभावतो नास्ति, तेन द्विचरसमये तत्सत्ताव्यवच्छेदः । चरमसमये त्रयोदशप्रकृतीनां सत्ता ॥३३॥

**नरअणुपुव्वि विणा वा बारस चरिमसमयम्मि जो खविउं ।**
**पत्तो सिद्धिं देविंदवंदियं नमह तं वीरं ॥३४॥**

नर० अपरेषां तु मतेन मनुजानुपूर्व्या द्विचरमसमये क्षय, उदयाभावादुदयवतीनां द्वादशानां स्तिबुकसङ्क्रमाभावात्स्वानुभावेन दलिकं चरमसमयेऽपि दृश्यत एवेति युक्तस्तासां चरमसमये व्यवच्छेदः ।

*'अनुदीर्णमुदीर्णान्तस्तुल्यकालं प्रतिक्षणं । दलिकं सङ्क्रमं याति तेन स स्तिबुको मतः'* ॥१॥

इति स्तिबुकस्वरूपम् ॥३४॥ [ ]

॥ इति कर्मस्तवावचूरिः ॥

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

॥ नमोनमः श्रीगुरुप्रेमसूरये ॥

## श्रीगुणरत्नसूरिविरचित-अवचूर्ण्युपेतः

# श्रीदेवेन्द्रसूरिविरचितः

# ॥ बन्धस्वामित्वाख्यस्तृतीयः कर्मग्रन्थः ॥

**बंधविहाणविमुक्कं वंदिय सिरिवद्धमाणजिणचंदं ।**
**गइयाईसुं वुच्छं समासओ बंधसामित्तं ॥१॥**

अथ अस्यैव[१] शास्त्रस्य 'सुरइगुणवीसवज्जं' [गाथा-४] इत्यादिषूपयोगित्वेनादौ कियतीनामपि प्रकृतीनां सङ्ग्रहमाह ॥१॥

---

१०नव्यबन्धस्वामित्वे किञ्चिद्विलिख्यते, अस्यैव-पा० ला०।

**जिण सुरविउवाहारदु देवाउ य नरयसुहुमविगलतिगं।**
**एगिंदि थावरायव नपु मिच्छं हुंड छेवट्ठं ॥२॥**

**अण मज्झागिइ संघयण कुखग निय इत्थि दुहगथीणतिगं।**
**उज्जोय तिरिदुगं तिरिनराउ नरउरलदुग रिसहं ॥३॥ ॥युग्मम्॥**

जिणसुर० गाहा ॥२॥ अणमज्झा० गाहा ॥३॥

**सुरइगुणवीसवज्जं इगसउ ओहेण बंधहिं निरया।**
**तित्थ विणा मिच्छि सयं सासणि नपुचउ विणा छनुई ॥४॥**

सुरइगुण० गाहा । 'जिणसुरविउव्वे' [गाथा-२] त्यादिगाथोक्ताः सुरद्विकाद्येकोनविंशतिप्रकृतीर्मुक्त्वा शेषमेकोत्तरशतं प्रकृतीनां सामान्यतो नारका बध्नन्ति, एकोनविंशतेस्तु तेषां भवप्रत्ययादेवाबन्धकत्वात् । इह क्वचित् क्वचित् काश्चित्प्रकृतीर्बध्नाति [नो वा, केवलं नरकत्रये(भवे) नानाजीवापेक्षया उद्यतः प्रकृत्येकोत्तरशतं बन्धे लभ्यते, एवमोघभावना सर्वत्र कार्या । अथ गुणस्थानकै]स्तेषामेव बन्धस्वामित्वमाह-'तित्थ विणे'त्यादि सुगमम् ॥४॥

**विणु अणछवीस मीसे बिसयरि सम्मम्मि जिणनराउजुया।**
**इय रयणाइसु भंगो पंकाइसु तित्थयरहीणो ॥५॥**

**अजिणमणुआउ ओहे सत्तमिए नरदुगुच्च विणु मिच्छे।**
**इगनवई सासाणे तिरिआउ नपुंसचउवज्जं ॥६॥**

विणु अण० गाहा । 'अणमज्झागिई' [गाथा-३] त्यादिगाथोक्तानन्तानुबन्ध्यादिनरायुरन्त्यप्रकृतिषड्विंशतिं मुक्त्वा शेषसप्ततिप्रकृतीनां मिश्रे बन्धः । 'बिसयरि' इतिपदं सुगमम् । एष सामान्यतो, विशेषतश्च रत्नप्रभादिनरकत्रये भङ्गः=क्रम इत्यर्थः, एष एकः क्रमः । पङ्कादिषु त्रिषु यत्र [न] तीर्थकृत्कर्मबन्धसम्भवस्तत्र तद्वर्जः, यथा[1] ओघे १००, मिथ्या०१००, [सासा० ९६], मिश्रे ७०,

---

१-०षड्विंशतिवर्जशेषसप्ततिप्रकृतीनां मिश्रगुणे नारकाणां बन्धः, यतः पञ्चविंशतिप्रकृतयः सास्वादनान्ते बन्धव्यवच्छिन्नाः, आयुस्तु मिश्रो न बध्नाति घोलनपरिणामाऽभावात्, जिननरायुःसहितां द्वासप्ततिं सम्यग्दृष्टयो नारका बध्नन्ति, आद्यपृथ्वीत्रितय एवं द्रष्टव्यं, पङ्कप्रभादिषु पुनस्तीर्थकृत्कर्मबन्धाऽभावात्तद्रहितमेव वाच्यम्, यथा-पा०।

अविरते '७१, *'तिसु तित्थं'* [प्र० सा० गा० १०८७] इति वचनादत्र सम्यग्दृशामपि भवप्रत्ययादेव तद्बन्धकत्वाऽयोगात् ॥५॥

अजिणमणुआउ० गाहा । सप्तम्यां नारका ओघतो जिननरायुर्वर्जां प्रकृतिनवनवतिं बध्नन्ति, त एव मिथ्यात्वे नरद्विकोच्चैर्गोत्रवर्जां षण्णवतिं, तेषां क्लिष्टत्वेन तिर्यग्गतियोग्यनीचैर्गोत्रस्यैव बन्धात् । 'इगनवई'त्यादि सुगमम् ॥६॥

**अणचउवीसविरहिया सनरदुगुच्चा य सयरि मीसदुगे ।**
**सतरसउ ओहि मिच्छे पज्जतिरिया विणु जिणाहारं ॥७॥**

अणचउवीस० गाहा । *'मीसे सम्मे सयरी विणु अणचउवीसनरदुगुच्चजुआ'* [ ] सप्तमपृथ्वीनारका एव बध्नन्ति मिश्रस्थाः सप्ततिप्रकृतिः, तामेव सप्ततिमविरता अपि, अत्रायुर्बन्धसम्भवेऽपि सप्तम्यां तिर्यगायुष एव केवलस्य बन्धात्तस्य च मिथ्यादृष्टि(ष्टौ) सास्वादने एव बध्यमानत्वादिह न तद्बन्धः । एतत्सूत्रे साक्षादनुक्तमप्यर्थतो ज्ञेयम् । अथ तिर्यग्गतौ बन्धस्वामिनः → सप्तदशोत्तरं शतमोघतो मिथ्यादृष्टयश्च पर्याप्ततिर्यञ्चो बध्नन्ति, तेषां सम्यग्दृशामपि भवप्रत्ययादेव जिन-नाम्नो बन्धाभावात्, आहारकद्विकस्याप्रमत्तेनैव बध्यमानत्वात् ॥७॥

**विणु नरयसोल सासणि सुराउ अण एगतीस विणु मीसे ।**
**ससुराउ सयरि सम्मे बीयकसाए विणा देसे ॥८॥**

विणुनरय० गाहा । सास्वादने नरकत्रिकादिषोडशप्रकृतीर्मुक्त्वा एकोत्तरं शतं । मिश्र सुरायुरनन्तानुबन्ध्याद्येकत्रिंशत्प्रकृतीश्च मुक्त्वा शेषामेकोनसप्ततिं, तत्र *'सम्मामिच्छदिट्ठी आउअबंधं पि न करेइ'* [ ] इति वचनात् सुरनरायुषोरबन्धः, पञ्चविंशतिप्रकृतयः सास्वादन एव व्यवच्छिन्नाः, तथा मनुष्यास्तिर्यञ्चश्च मिश्रगुणस्था अविरतसम्यग्दृष्टिवद् देवार्हमेव बध्नन्ति, तेन नरत्रि(द्वि)कौदारिकद्विक-वज्रऋषभानामपि बन्धाभावः । सुरायुर्बन्धाधिक्येन ते अविरताः सप्ततिम् । देशविरतिस्था द्वितीयकषा-यवर्जां षट्षष्टिम् ।

**इय चउगुणेसु वि नरा परमजया सजिण ओहु देसाई ।**
**जिणइक्कारसहीणं नवसउ अपजत्ततिरियनरा ॥९॥**

इय चउगुणेसु० गाहा । इत्येवं पर्याप्ततिर्यग्न्यायेन पर्याप्तनरा अपि चतुर्षु मिथ्यात्वादिगुणेषु बन्धस्वामिनो मन्तव्याः । यथा मिथ्यात्वे ११७, सास्वादने १०१, मिश्रे ६९, अविरते ७१, परं अयता=अविरता जिनकर्मणोऽपि बन्धकाः स्युरिति तिर्यग्बन्धयोग्यसप्ततेरेकाधिकत्वम्, ओघत एषां १२०, देशविरत्यादिषु पुनरोघः ***कर्मस्तवो***क्त एव । अपर्याप्ततिर्यग्नरास्तु जिनादिनरकत्रिकावसानैकादशप्रकृतिवर्जं शेषं नवोत्तरशतम् ओघतो मिथ्यात्वे च बध्नन्ति । यद्यपि करणापर्याप्तो देवो मनुष्यो वा जिनकर्म सम्यक्त्वप्रत्ययेन बध्नाति, तथापीह नराणां लब्ध्यपर्याप्तत्वेन विवक्षणान्न विरोधः ॥९॥

**निरय व्व सुरा नवरं ओहे मिच्छे इगिंदितिगसहिया ।**
**कप्पदुगे वि य एवं जिणहीणो जोइभवणवणे ॥१०॥**

निरयव्व० गाहा । सुरा अपि नारकवदोघतो विशेषतश्च तत्तद्बन्धस्वामिनोऽवगन्तव्याः । नवरमोघे मिथ्यात्वे च यावान् बन्धो नारकाणां स एव एकेन्द्रियादित्रिकयुतस्तथाहि → ओघतो देवानां १०४, मिथ्यात्वे १०३, जिनकर्मबन्धाभावात् । सास्वादनादौ नारकक्रम एव विशेषचिन्तया । कल्पद्विकेऽप्ययं देवानां बन्ध एवमेवेति । भवनपति-व्यन्तर-ज्योतिष्केषु तु यथासम्भवं जिनकर्मबन्धरहितो ज्ञेयः, जिनकर्मसत्ताकस्य तेषूत्पादाऽभावेन तत्र तद्बन्धासम्भवात्, तथाहि→भवनपत्यादीनामोघतो मिथ्यात्वे च १०३, सास्वादन-मिश्रयोस्तथैव, अविरते ७१ इति ॥१०॥

**रयणु व्व सणंकुमाराइ आणयाई उज्जोयचउरहिया ।**
**अपजतिरिय व्व नवसयमिगिंदिपुढविजलतरुविगले ॥११॥**

रयणु व्व० गाहा । सनत्कुमारादिषट्के रत्नप्रभाया भङ्गो, यथा-१०१, १००, ९६, ७०, ७२ । आनतादित्रयोदशके तूद्योततिर्यक्त्रयरहितः सः पूर्वोक्तो रत्नप्रभाभङ्गो यथासम्भवं वाच्यो, यथा- ओघे ९७, मिथ्यात्वे ९६, सास्वादने ९२, मिश्रे अविरते चोद्योतादिचतुष्कस्य सास्वादनान्तत्वेन संपूर्ण एव रत्नप्रभाभङ्गो, यथा-मिश्रे ७०, अविरते ७२, अनुत्तरपञ्चके तु मिथ्यात्व-स्वास्वादन-

मिश्राणामसम्भवादोघेऽविरते च ७२, एतत्सूत्रोक्तं न वर्तते तथाऽप्यर्थतो ज्ञेयम् । ''जिणइक्कारसहीणं' [गाथा-९] इत्यादिगाथावयवोक्तम्। अपर्याप्ततिर्यग्वत् १०९ एकेन्द्रिय-पृथ्वी-जल-तरु-विकला ओघतो मिथ्यात्वे च बध्नन्ति ।।११।।

**छनवइ सासणि विणु सुहुमतेर केइ पुण बिंति चउनवइं ।**
**तिरियनराऊहिं विणा तणुपज्जत्तिं न ते जंति ।।१२।।**

छनवइ० गाहा । एते एकेन्द्रिया[दयः] सास्वादनाः सूक्ष्मत्रिकादिप्रकृतित्रयोदशकं मिथ्यात्व एव व्यवच्छिन्नबन्धमिति कृत्वा षण्णवतिं बध्नन्ति, केचित् पुनश्चतुर्नवतिं ब्रुवते, तिर्यग्नरायुषो-स्तनुपर्याप्त्या पर्याप्तैरेव बध्यमानत्वात्, ते च सास्वादनत्वादपर्याप्ता एवोच्यन्ते ।।१२।।

**ओहु पणिंदि तसे गइतसे जिणिक्कार नरतिगुच्च विणा ।**
**मणवयजोगे ओहो उरले नरभंगु तम्मिस्से ।।१३।।**

**आहारछग विणोहे चउदससउ मिच्छि जिणपणगहीणं ।**
**सासणि चउनवइ विणा नरतिरिआऊ सुहुमतेर ।।१४।।**

ओहु पणिंदि० गाहा । आहारछग० गाहा । पञ्चेन्द्रियेषु च ***कर्मस्तवोक्तः*** स्वस्वगुण-स्थानके ओघो, यथा → सामान्यतो १२०, मिथ्यात्वे ११७, सास्वादने १०१, मिश्रे ७४, अविरते ७७, देशे ६७, प्रमत्ते ६३, अप्रमत्ते ५९-[५८], अपूर्वस्य प्रथमभागे ५८, तत परं भागपञ्चके ५६, सप्तमे भागे २६, अनिवृत्तिबादरे प्रथमभागे २२, द्वि० २१, तृ० २०, चतु० १९, पञ्च० १८, सूक्ष्मे १७, शेषत्रये सातस्यैकस्य बन्धः। गतित्रसेषु=तेजोवायुषु जिनैकादशकनरत्रिकोच्चरूपाः १५ प्रकृतीर्विना पञ्चोत्तरं शतं बन्धे लभ्यते। सास्वादनादिभावस्तु नैषाम्, यतः ***'न हु किंचि लभिज्ज सुहुमतसा'*** [          ]इत्यादि । चतुर्विधमनोयोगे [च ओघः ***कर्मस्तवोक्तो*** विंशत्युत्तरशतादिरूपः। मनोवाग्योगपूर्वके औदारिककाययोगे तु नरभङ्गो, 'इय चउगुणेसु वि नरा' [गाथा ९] इत्यत्रोक्तरूपो, यथा→ओघः १२०, मिथ्यात्वे ११७, सा० १०१, मिश्रे ६९, अविरते ७१ इत्यादि। मनोरहित]वाग्योगे विकलेन्द्रियभङ्गः । केवलकाययोगे त्वेकेन्द्रियभङ्गः। 'तम्मिसे'त्ति औदारिकमिश्रयोगे।।१३।।

आहारकषट्कं विना शेषम् ११४ ओघतो बन्धः प्राप्यते, स ह्यपर्याप्तावस्थायां स्यात् तदानीं च नैतत्प्रकृतिषट्कं बध्यते । औदारिकमिश्रकाययोगी मिथ्यात्वे जिनपञ्चकहीनं नवोत्तरं शतं बध्नाति । स एव सास्वादने ९४ बध्नाति, नरतिर्यगायुषोरपर्याप्तत्वेन सूक्ष्मत्रिकादि-सेवार्तान्तप्रकृतित्रयोदशकस्य तु मिथ्यात्वे एव व्यवच्छिन्नबन्धतया च । मिश्रं पुनर्नात्र [भवति], यत औदारिकमिश्रस्यापर्याप्तावस्थायां [समुद्घातावस्थायां] च भावात् । एवमविरतसयोगिवर्जदेशविरत्यादीन्यपि तत्र न स्युः ॥१४॥

**अणचउवीसाइ विणा जिणपणजुय सम्मि जोगिणो सायं ।**
**विणु तिरिनराउ कम्मे वि एवमाहारदुगि ओहो ॥१५॥**

अणचउ० गाहा । तत्रौदारिकमिश्रस्थोऽविरत उत्पत्तिसमयेऽनन्तानुबन्ध्यादितिर्यग्द्वि-कावसानचतुर्विंशतिप्रकृतीर्विना जिनसुरद्विक[वैक्रियद्विक]रूपप्रकृतिपञ्चकक्षेपे पञ्चसप्ततिप्रकृतिबन्धः रचयति । सयोगिनस्तु समुद्घातावस्थायां सप्तषष्ठद्वितीयसमयेष्वौदारिकमिश्रस्थस्य सातस्यैव बन्धः । अन्तरालगतौ समुद्घातावस्थाभाविनि च कार्मणयोगेऽप्येवम्, यथौदारिकमिश्रे बन्धविधिरोघतो विशेष-तश्चोक्तस्तथेहापि, नवरं तिर्यग्नरायुषी वर्जयित्वा, कार्मणकाययोगे तद्बन्धाभावात्, ततः कार्मणकाययोगे ओघतः ११२, मिथ्यात्वे १०७, सास्वादने ९४, अविरते ७५, सयोगिनि १ । 'आहारदुगि ओहु' त्ति आहारके आहारकमिश्रे च *कर्मस्तवोक्त* ओघः प्रमत्तगुणस्थानकवर्त्ती त्रिषष्टिरूप, एतत्काययोगद्वयं हि लब्ध्युपजीवनात्प्रमत्तस्यैव, न त्वप्रमत्तस्येति न तदोघबन्धसम्भवः ॥१५॥

**सुरओहो वेउव्वे तिरियनराउरहिओ य तम्मिस्से ।**
**वेयतिगाइम बिय तिय कसाय नव दु चउ पंच गुणा ॥१६॥**

सुरओहो० गाहा । वैक्रियकाययोगे सुराणां सुरगतौ प्रागुक्त ओघस्तथैव, यथा→ओघे १०४, मिथ्यात्वे १०३, सास्वादने ९६, मिश्रे ७०, अविरते ७२, 'तम्मिस्सि' त्ति वैक्रियमिश्रे तिर्यग्नरायुर्बन्धरहितः सुरौघः, वैक्रियमिश्रं ह्यपर्याप्तावस्थायां देवनारकाणां लभ्यते, तदानीं च तेषामायुर्ब-न्धाभावात्, तथा च तत्रौघे १०२, मिथ्यात्वे १०१, सास्वा० ९४, अविरते ७१, देशविरत्यादिषु वैक्रियमिश्रस्य सम्भवो नास्ति, यद्यपि देशविरत*स्याम्बडादेः* प्रमत्तस्य तु *विष्णुकुमारादे* वैक्रियं कुर्वतस्त-

त्सम्भवः श्रूयते, सोऽपि स्वल्पत्वादन्यतो वा कुतोऽपि हेतोः ***पूर्वाचार्यै*** र्नोक्तः । 'वेयतिगाइम'त्ति वेदत्रिके आदिमे द्वितीये तृतीये च कषायचतुष्के यथाक्रमेण 'नवदुचउपंचगुण' त्ति नव-द्वि-चतुः-पञ्चगुणस्थानकेषु यः ***कर्मस्तवो***क्त ओघः स ज्ञेयः, यथा→वेदत्रिके मिथ्यात्वादौ अनिवृत्तिबादरान्तगुणस्थाननवके ***कर्मस्तवो***क्त ओघः ११७, सामान्यतस्तु नानाजीवापेक्षया १२०, [मिथ्यात्वे ११७, सास्वादने १०१, मिश्रे ७४, अवि० ७७, दे० ६७, प्र० ६३, अ० ५९-५८, अपूर्व० ५८, ५६, २६, अनि० २२ ।] अनन्तानुबन्धिषु ओघतो मिथ्यात्वे च ११७, सास्वा० १०१ । अप्रत्याख्यानेष्वोघतो ११८, मिथ्यात्वे ११७, सास्वा० १०१, मिश्रे ७४, अविरते ७७ । प्रत्याख्यानावरणेष्वप्येवं, केवलं मिथ्यात्वे देशविरतौ ६७ ॥१६॥

**संजलणतिगे नव दस लोभे चउ अजइ दु ति अनाणतिगे ।**
**बारस अचक्खुचक्खुसु पढमा अहक्खाइ चरमचऊ ॥१७॥**

संजलण० गाहा । सञ्ज्वलनत्रिके क्रोधमानमायारूपे ***कर्मस्तव*** प्रथमनवगुणस्थानोक्त ओघः । तत्र सामान्यबन्धान्निवृत्तिबादरं यावद्वेदत्रिकन्यायेन विंशत्युत्तरशतादिकः प्राग्वत् । अनिवृत्तिबादरभागपञ्चकेषु प्रथमभागे २२, द्वितीये पुंवेदरहिता २१, तृतीये सञ्ज्वलनक्रोधरहिता २०, तुर्ये सञ्ज्वलनमानरहिता १९, पञ्चमे सञ्ज्वलनमायारहिता १८, सञ्ज्वलनलोभे तु सूक्ष्मसम्परायेऽपि सम्भवाद् दशगुणस्थानकोक्त ओघः । अयताभिधे मार्गणास्थाने मिथ्यात्वादिगुणस्थानचतुष्कौघः, यथा—सामान्यतोऽविरतसम्यग्दृष्टेरपि संगृहीतत्वाज्जिननामक्षेपे ११८, मिथ्या० ११७, सास्वा० १०१, मिश्रे ७४, अविरते ७७ । अज्ञानत्रिके 'दुति'त्ति, मिथ्यात्वसास्वादनद्वयौघो, मिश्रेण सह तत्त्रयौघो वा, यथा ओघे ११७, [मि० ११७], सास्वादने १०१, मिश्रे ७४ - शून्यं वा, अयमाशयः-मिश्रे ज्ञानांश[श्चास्ति यदा ज्ञानांश]प्राधान्यविवक्षा तदाऽज्ञानत्रिके गुणद्वयमेव, अज्ञानांशप्राधान्ये तु तृतीयं मिश्रमपि । चक्षुरचक्षुर्दर्शनयोर्मिथ्यात्वादिद्वादशगुणौघः, तत्रौघतः १२०, मिथ्या० ११७, यावत्क्षीणमोहे सातबन्धः, परतस्तु चक्षुरचक्षुषोः सतोरप्यनुपयोगित्वेनाव्यापारात् । यथाख्याते उपशान्तादिचतुर्गुणस्थानौघो, यथा→ओघतः १, उप० १, क्षीण० १, सयोगि० १, अयोगिनि-० ॥१७॥

**मणनाणि सग जयाई समइय छेय चउ दुन्नि परिहारे ।**
**केवलदुगि दो चरमाजयाइ नव मइसुओहिदुगे ॥१८॥**

मणनाणि० गाहा । मनःपर्यायज्ञाने प्रमत्तादिक्षीणमोहान्तानामोघः, तत्र सामान्यत आहारकसहिताः ६५, विशेषतः प्रमत्ते ६३, इत्यादि । सामायिके छेदोपस्थापनीये च प्रमत्तादिगुणचतुष्कस्यैवौघः, यथा सामान्यतः ६५, प्रमत्ते ६३ इत्यादि । सूक्ष्मसम्परायादिचारित्रस्य सूक्ष्मादौ सम्भवात् । परिहारविशुद्धिके द्वे प्रमत्ताप्रमत्ते, तयोरोघबन्ध इत्यर्थः । केवलद्विकेऽन्त्यद्वयमेव, तदुक्तो बन्ध इत्यर्थः, तद्यथौघे सातस्य बन्धः, सयोगिन्यपि तस्यैव, अयोगिनि शून्यम् । तथा मतिश्रुतयोरवधिद्विके चाविरतादीनि क्षीणमोहान्तानि नवगुणस्थानानि, तदुक्तो बन्ध इत्यर्थः, तत्परतः केवलोत्पत्त्या मत्यादेरभावात् । तत्रौघतोऽप्रमत्तादेर्मत्यादिमत आहारकद्विकस्यापि बन्धसम्भवादेकोनाशीतिः, विशेषचिन्तायां विरतादौ ***कर्मस्तव***मतः सप्तसप्तत्यादिर्बन्धः ॥१८॥

**अड उवसमि चउ वेयगि खइए इक्कार मिच्छतिगि देसे ।**
**सुहुमि सठाणं तेरस आहारगि नियनियगुणोहो ॥१९॥**

अड० औपशमिकसम्यक्त्वेऽष्टौ गुणस्थानानि, यथास्थानं तदुक्तो बन्ध इत्यर्थः, तत्र सामान्यत औपशमिकेऽविरते च 'परमुवसमि वट्टंता' [गा. २०] इत्याद्युक्तहेतोर्देवमनुजायुषोर्बन्धाभावात् ७५, देशविरतौ सुरायुरबन्धात् ६६, प्रमत्ते ६२, अप्रमत्ते ५८ इत्यादि यावदुपशान्ते एकस्य सातस्य बन्धः । वेदके क्षायोपशमिकाऽपरपर्यायेऽविरतादिचतुर्गुणस्थानोक्तो बन्धविधिरोघतः ७९, अविरते ७७, देशे ६६, प्रमत्ते ६३, अप्रमत्ते ५९ - ५८, अतः परमुपशमश्रेणौ औपशमिकं क्षपकश्रेणौ क्षायिकम् । क्षायिके अविरतादीन्येकादश, यथौघे ७९, अविरते ७७ यावदयोगिनि शून्यम् । मिथ्यात्वसास्वादनमिश्ररूपे त्रिके, देशे, सूक्ष्मसंपराये च स्वस्वगुणस्थानीयो बन्धो, यथा→मिथ्यात्वे ओघे स्वस्थाने च ११७, एवं सास्वादने द्विधाऽपि १०१, मिश्रे ७४, देशे ६७, सूक्ष्मे १७ । आहारके जीवे त्रयोदश गुणस्थानानि, अयोगिवर्जत्रयोदशगुणस्थानोक्तो बन्धो, अयोगी त्वनाहारकः, अत्रौघतो बन्धः १२०, मिथ्यात्वादौ स्वस्वगुणस्थानीयो बन्धः ॥१९॥

**परमुवसमि वट्टंता आउ न बंधंति तेण अजयगुणे ।**
**देवमणुआउहीणो देसाइसु पुण सुराउ विणा ॥२०॥**

परमु० 'अड उवसमि' [गा० १९] इत्यत्र विशेषमाह→परं = केवलमौपशमिके सम्यक्त्वे वर्तमाना जन्तव आयुरेकमपि न बध्नन्ति तेनाऽविरते देव-नरायुर्बन्धाभ्यां हीन ओघबन्धः पञ्चसप्ततिरूपो ज्ञेयः । देशादिषु पुनर्नरायुर्बन्धस्याऽविरते व्यवच्छिन्नत्वेन देवायुष एव केवलस्य बन्धात्तदेकप्रकृतिहीनः षट्षष्ट्यादिः । तच्चाङ्कतः प्राक् स्वस्थाने दर्शितमेव ॥२०॥

**ओहे अट्ठारसयं आहारदुगूण आइलेस तिगे ।**
**तं तित्थोणं मिच्छे साणाइसु सव्वहिं ओहो ॥२१॥**

ओहे० ओघत आद्यलेश्यात्रिके आहारकद्विकवर्जं ११८ बध्यते, आहारकद्विकस्य शुभलेश्याभिः बध्यमानत्वात्, विशेषचिन्तायां मिथ्यात्वे जिननामवर्जम् ११७, सास्वादनादिषु त्रिषु 'ओहु'त्ति स्वस्वगुणस्थानीय ओघबन्धः ॥२१॥

**तेऊ नरयनवूणा उज्जोयचउ नरयबार विणु सुक्का ।**
**विणु नरयबार पम्हा अजिणाहारा इमा मिच्छे ॥२२॥**

तेऊ नरय० तेजोलेश्यायां नरकत्रिकादिप्रकृतिनवकोनमोघत एकादशोत्तरं शतं बध्यते, कृष्णादिलेश्याप्रत्ययत्वान्नरकत्रिकादीनां न बन्धः । मिथ्यात्वे सप्तदशोत्तरशतादस्यैव प्रकृतिनवकस्यापसारे शेषम् १०८, सास्वादनादिषट्सु स्वौघबन्धः । 'उज्जोअतिरिदुगं तिरि'त्ति [गा०३] गाथोक्तम् उद्योततिर्यग्द्विकतिर्यगायुर्लक्षणं प्रकृतिचतुष्कं 'नरयसुहुमविगलतिग' [गा०२]ति गाथोक्तं नरकत्रिकादिप्रकृतिद्वादशकं च मुक्त्वा शेषं चतुरुत्तरशतमोघतः शुक्ललेश्यायां बध्यते, उद्योतादिप्रकृतीनां तिर्यग्नरकप्रायोग्यत्वेन देव नरयोग्यबन्धकैः शुक्ललेश्यावद्भिरबध्यमानत्वान्मिथ्यात्वे १०१, सप्तदशोत्तरशतरूपत्वान्मिथ्या- त्वौघबन्धात् प्रकृतप्रकृतिषोडशकापहारेण सास्वादने तदीयैकाधिकशतरूपौघबन्धादुद्योतादिप्रकृतिचतुष्ट- यापसारे शेषाः ९७, मिश्रादिषु तदवस्थ स्वस्वगुणस्थानीयो बन्धः । नरकत्रिकादिप्रकृतिद्वादशकं विना शेषम् १०८ पद्मलेश्यायामोघतो लभ्यते, तल्लेश्यावतां सनत्कुमारादिदेवानां तिर्यक्प्रायोग्यं बध्नता-

मुद्योतादिप्रकृतिचतुष्कस्य बन्धसम्भवात् । मिथ्यात्वे १०५, तदोघबन्धात्सप्तदशोत्तरशतरूपाद् यथोक्त-१२ प्रकृतीनामपसारात् । सास्वादनादौ तु यथास्थित एकोत्तरशतादिकः स्वस्वौघबन्धः । 'अजिणे'त्यादि-प्रथमलेश्यात्रिकस्य 'ओहे' [गा०२१] इत्यादिना निर्धारितत्वेनेमास्तेजःशुक्लपद्मलेश्या मिथ्यात्वे जिनाहार-कद्विकवर्जाः शेषसप्तदशोत्तरशतप्रकृतिबन्धसहिता इत्यर्थः । [तेजोलेश्यादिषु नरकनवकाद्यूनो यः सामा-न्यबन्धः प्रतिपादितः स मिथ्यात्वगुणस्थानके जिनादिप्रकृतित्रयरहितो विधेयः] ॥२२॥

**सव्वगुणभव्वसन्निसु ओहु अभव्वा असन्नि मिच्छसमा ।**
**सासणि असन्नि सन्नि व्व कम्मभंगो अणाहारे ॥२३॥**

सव्वगुण० भव्यसंज्ञिनि च मार्गणास्थाने यथास्वस्थानं ***कर्मस्तवो***क्त ओघबन्धस्तयोः सर्वगुणस्थानभावात् । अभव्या असंज्ञिनश्च चिन्त्यमाना ओघबन्धं प्रतीत्य मिथ्यात्वसत्कौघबन्धसमाः, अयमर्थो→यथा मिथ्यात्वे ११७ ओघतो बध्यते, तथाऽभव्योऽसंज्ञी चौघतो मिथ्यात्वे च ११७, अभव्यस्य सास्वादनादिगुणाभावादसंज्ञी तु सास्वादने संज्ञिवत् १०१ बन्धकः । अनाहारके तु मार्गणस्थाने कार्मणकाययोगभङ्गः, तद्योगस्थस्यैव संसारिणोऽनाहारकत्वात्, कार्मणभङ्गश्चायमुक्तयुक्त्या ओघे ११२, मिथ्यात्वे १०७, सास्वा० ९४, अविरते ७५, सयोगिनि सातस्यैक[स्य] बन्धः । उक्तं मार्गणास्थानेषु बन्धस्वामित्वम् ।

**तिसु दुसु सुक्काइ गुणा चउ सग तेर त्ति बंधसामित्तं ।**
**देविंदसूरिलिहियं नेयं कम्मत्थयं सोउं ॥२४॥**

अथ यस्यां लेश्यायां यावन्ति गुणस्थानानि स्युस्तदाह→ 'तिसु दुसु' तिसृष्वाद्यासु कृष्ण-नील-कापोतलेश्यासु 'चउ' इत्यादिना यथाक्रमं सम्बन्धान्मिथ्यात्वादीनि चत्वारि गुणस्थानानि प्राप्यन्ते, तेषु परिणामविशेषतः षण्णामपि लेश्यानां भावात् । तथा 'दुसु' त्ति द्वयोस्तेजःपद्मयोर्मिथ्यात्वादीनि सप्त, तयोस्तदन्तमपि यावद्भावात् । शुक्लायां त्रयोदश मिथ्यात्वादीनि सयोग्यन्तानि । अयोगिनोऽले-श्यत्वात् ॥२४॥

**॥ इति बन्धस्वामित्वावचूरिः ॥**

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

॥ नमोनमः श्रीगुरुप्रेमसूरये ॥

## श्रीगुणरत्नसूरिविरचित-अवचूर्ण्युपेतः

# श्रीदेवेन्द्रसूरिविरचितः

# ॥ षडशीतिनामा चतुर्थः कर्मग्रन्थः ॥

नव्यषडशीतिकस्य किञ्चिल्लिख्यते —

**नमिय जिणं जियमग्गणगुणठाणुवओगजोगलेसाओ ।**
**बंधप्पबहूभावे संखिज्जाई किमवि वुच्छं ॥१॥**

**इह सुहुमबायरेगिंदिबितिचउअसन्निसन्निपंचिंदी ।**
**अपज्जत्ता पज्जत्ता कमेण चउदस जियट्ठाणा ॥२॥**

प्रथमगाथाद्वयं सुगमम् ॥१॥२॥

बायरअसन्निविगले अपज्ज पढमबिय सन्निअपज्जत्ते ।
अजयजुय सन्निपज्जे सव्वगुणा मिच्छ सेसेसु ॥३॥

बायर० तेजोवायुषु सास्वादनाभावात् तान् मुक्त्वा शेषबादरभूम्यम्बुवनस्पतिषु ***कार्मग्रन्थिक*** मतेन मिथ्यात्वसास्वादनरूपगुणद्वयम्, अथ तेजोवायुवर्जनम् किं ? तेजोवायूनां मध्ये सम्यक्त्वलेशवतामप्युत्पादाभावादतस्तेषां सास्वादनाभावः । एवमपर्याप्तविकलत्रिकेऽपर्याप्तसंज्ञिनि चो-भयमतेनाद्यगुणद्वयं स्यादपर्याप्तसंज्ञिनि तु तृतीयमविरतमपि । पर्याप्तसंज्ञिनि तु सर्वाण्यपि सयोग्ययोगि-नोऽपि द्रव्यमनोभावेन संज्ञित्वाऽव्यभिचारात् । शेषजीवसप्तके मिथ्यात्वमेव ॥३॥

अथ जीवस्थानेषु योगानाह —

**अपजत्तछक्कि कम्मुरलमीस जोगा अपज्जसन्निसु ते ।**
**सविउव्वमीस एसुं तणुपज्जेसुं उरलमन्ने ॥४॥**

अपज्जत्त० आद्येऽपर्याप्तषट्के भवं सङ्क्रामतः प्रथमं कार्मणयोगस्तत उत्पत्तिदेशं गत्वौदारिकं कुर्वतः कार्मणेन मिश्रत्वादौदारिकमिश्रः । अपर्याप्तसंज्ञिनो देवनारकेषूत्पन्नस्य वैक्रियमि-श्रोऽपि, असंज्ञ्यपि तत्रोत्पद्यते, केवलं तत्रासौ संज्ञ्येव स्यादिति संज्ञिग्रहणम् । एषु सप्तसु तनुपर्याप्त्या पर्याप्तेषु औदारिककाययोगमपि मन्यन्ते ***केचित्*** ॥४॥

**सव्वे सन्निपज्जत्ते उरलं सुहुमे सभासु(स) तं चउसु ।**
**बायरि सविउव्विदुगं पज्जसन्निसु बार उवओगा ॥५॥**

सव्वे० संज्ञिनि पर्याप्ते सर्वेऽपि योगाः । तत्र सत्यादिमनोयोगाः ४, एवं वाग्योगाः, औदारिकवैक्रियाहारकास्त्रयः प्रतीताः, औदारिकेन वैक्रियं कुर्वतो वैक्रियमिश्रः, पुनरत्यक्तवौदारिकं गच्छतः औदारिकमिश्रः, आहारकं कुर्वाणस्याहारकमिश्रः । समुद्घातावस्थायां तृतीयतुर्यपञ्चमसमयेषु कार्मण-योगी । पर्याप्तसूक्ष्मेष्वौदारिकमेव । तच्च वाग्योगयुतं विकलाऽसंज्ञिपञ्चेन्द्रियेषु । वायुषु वैक्रियस्यापि सम्भवात् पर्याप्तबादरेषु औदारिकं वैक्रियद्विकं च । अथ जीवेषूपयोगाः—→पर्याप्तसंज्ञिषु ज्ञानपञ्चकाऽज्ञान-त्रयदर्शनचतुष्करूपाः सर्वेऽप्युपयोगाः ॥५॥

**पज्जचउरिंदिअसन्निसु दुदंस दुअनाण दससु चक्खु विणा ।**
**सन्निअपज्जे मणनाणचक्खुकेवलदुगविहूणा ॥६॥**

पज्जचउ० पर्याप्तचतुरिन्द्रिये असंज्ञिनि च मतिश्रुताज्ञाने चक्षुरचक्षुर्दर्शने च ४, दशसु पर्याप्तापर्याप्तसूक्ष्मबादर४द्वीन्द्रिय४त्रीन्द्रियाऽपर्याप्तचतुरिन्द्रियाऽसंज्ञिषु चक्षुर्वर्जाः ३, पर्याप्ते[1] चतुरिन्द्रियाऽसंज्ञिसंज्ञिष्विन्द्रियपर्याप्तौ सत्यां *पञ्चसंग्रहमतेन* चक्षुर्दर्शनमपि । 'सन्नि अपज्जे' त्यर्द्धं सुगमम् ॥६॥

अथ जीवेषु लेश्याः —

**सन्निदुगि छ लेस अपज्जबायरे पढम चउ ति सेसेसु ।**
**सत्तट्ठबंधुदीरण संतुदया अट्ठ तेरससु ॥७॥**

सन्निदुग० पर्याप्तापर्याप्तरूपसंज्ञिद्वये स्वपरभवापेक्षया *'जल्लेसे मरइ तल्लेसे उववज्जइ'* [ ] इति षडपि लेश्याः, अपर्याप्तबादरे आद्याश्चतस्रः, तद्गतां भवनपत्यादीशानान्तदेवानामपि[2] तत्रोत्पादात् । शेषेषु आद्यास्तिस्रः । अथ गुणेषु बन्धादिविधिः—>[मिश्ररहित]अप्रमत्तं यावदायुर्बन्धेऽष्टानामन्यत्र सप्तानाम्, सूक्ष्मे षण्णाम्, उपशान्तादिगुणत्रये एकस्यैव सातस्य बन्धः । सत्ता तूपशान्तमोहं यावदष्टानाम्, क्षीणे सप्तानां, सयोगिन्ययोगिनि च चतसृणाम्, उदयः सूक्ष्मं यावदष्टानाम्, उपशान्तक्षीणयोः सप्तानाम्, सयोग्ययोगिनोश्चतसृणामनुभूयमानमायुर्यदावलिकाशेषं न स्यात् किन्त्वधिकं तदाष्टानामप्युदीरणा, तस्मिन्नावलिकाशेषे सप्तानाम्, वेदनीयायुषोः प्रमादसहितेनैव योगेनोदीरणा स्यान्नान्येनेत्यप्रमत्तात्सूक्ष्मसंपरायं यावद्वेदनीयायुर्वर्जानां षण्णामुदीरणा यावन्मोहनीयमावलिकाशेषं न स्यादावलिकाशेषे तु पञ्चानां, उपशान्ते मोहवर्जानां पञ्चानां, क्षीणेऽपि तेषामेव यावज्ज्ञानदर्शनावरणान्तरायाणि आवलिकाशेषाणि न स्युरावलिकाशेषेषु तेषु क्षीणे सयोगिनि च द्वयोर्नामगोत्रयोरेवायोगी त्वनुदीरकः ॥७॥

अथ जीवस्थानेषु बन्धादिविधिः —

---

१-०ज्ञिपञ्चेन्द्रियलक्षणेषु पूर्वोक्ताश्चत्वार उपयोगाश्चक्षुर्दर्शनं विना त्रयो भवन्ति, पर्याप्त०-पा० । २-०भवनेशादिदेवा० हे० ला० ।

**सत्तट्ठछेगबंधा संतुदया सत्त अट्ठ चत्तारि ।**
**सत्तट्ठ छ पंच दुगं उदीरणा सन्निपज्जत्ते ॥८॥**

सत्तट्ठ० संज्ञिपर्याप्तवर्जे १३जीवस्थानेषु आयुर्बन्धेऽष्टानां बन्धस्तदभावे सप्तानाम् । उदीरणाऽप्यावलिकाधिकशेषे आयुषि अष्टानाम्, आवलिकामात्रे तु सप्तानाम् । सत्तोदयौ त्वष्टानाम् । पर्याप्तसंज्ञिनि तु प्रागुक्तगुणस्थानक्रमेण सप्ताष्टषडेकविधबन्धादिभावना कार्या ॥८॥

ग्रन्थलाघवार्थं क्रमोल्लङ्घनादिदानीं मार्गणस्थानानि —

**गइइंदिए य काए जोए वेए कसायनाणेसु ।**
**संजमदंसणलेसा भवसम्मे सन्निआहारे ॥९॥**

**सुरनरतिरिनिरयगई इगबियतियचउपणिंदि छक्काया ।**
**भूजलजलणानिलवणतसा य मणवयणतणुजोगा ॥१०॥**

**वेय नरित्थिनपुंसा कसाय कोहमयमायलोभ त्ति ।**
**मइसुयवहिमणकेवलविभंगमइसुअनाणसागारा ॥११॥**

**सामाइय छेय परिहार सुहुम अहक्खाय देस जय अजया ।**
**चक्खु अचक्खू ओही केवलदंसण अणागारा ॥१२॥**

**किण्हा नीला काऊ तेऊ पम्हा य सुक्क भव्वियरा ।**
**वेयग खइगुवसम मिच्छ मीस सासाण सन्नियरे ॥१३॥**

गाथापञ्चकं सुगमम् । नवरं वेदके क्षायोपशमिकस्याप्यन्तर्भावः । एवं गत्यादिचतुर्दशद्वारैर्द्वाषष्टिस्तदुत्तरभेदाः ॥९॥१०॥११॥१२॥१३॥

अथ मार्गणास्थानेषु जीवस्थानानि —

**आहारेयर भेया सुरनिरयविभंगमइसुओहिदुगे ।**
**सम्मत्ततिगे पम्हासुक्कासन्नीसु सन्निदुगं ॥१४॥**

आहारेयर० 'सम्मत्ततिग'त्ति क्षायिकक्षायोपशमिकवेदकरूपे । *केचिदौ* पशमिकेऽप्य-पर्याप्तसंज्ञिनमिच्छन्ति, तन्नावगम्यते, प्रथमं हि सम्यक्त्वमत्राऽपर्याप्तस्य तथाविशुद्धेरभावान्न घटते, उपशमश्रेणावपि मृत्वा सुरेषूत्पद्यमानस्याद्यसमय एव सम्यक्त्वपुद्गलवेदनात् तन्नोपपद्यते, यदुक्तं *शतकबृहच्चूर्णौ* '*जो उवसमसेढीए कालं करेइ सो पढमसमये एव उदयावलियाए छोढूण सम्मत्तपुग्गलं वेएइ, तेण उवसमसम्मदिट्ठी अपजत्तगो न लब्भई* ।' [ ]ततः सुरनारकादौ मार्गणास्थानोत्तरभेदत्रयोदशके पर्याप्तापर्याप्तसंज्ञिरूपं जीवस्थानद्वयम् ॥१४॥

**तमसन्निअपज्जजुयं नरे सबायरअपज्ज तेऊए ।**
**थावर इगिंदि पढमा चउ बार असन्नि दु दु विगले ॥१५॥**

तमसन्नि० तदेव पूर्वोक्तं संज्ञिद्विकं नरगतावपर्याप्ताऽसंज्ञिमनुष्ययुतं जीवस्थानत्रयं असंज्ञिनृणां, लब्ध्यपर्याप्तत्वात् । तदेव संज्ञिद्विकमपर्याप्तबादरैकेन्द्रिययुतं तेजोलेश्यायाम् । पृथ्व्यादिस्थावरपञ्चके पर्याप्तापर्याप्तसूक्ष्मबादरसत्कं जीवस्थानचतुष्कम् । एवमेकेन्द्रियेऽप्यसंज्ञिनि पर्याप्तापर्याप्तसंज्ञिवर्जशेषजीवस्थानानि १२ । द्वीन्द्रियादिषु प्रत्येकं पर्याप्तापर्याप्तरूपे द्वे द्वे ॥१५॥

**दस चरम तसे अजयाहारग तिरि तणु कसाय दु अनाणे ।**
**पढमतिलेसा भवियर अचक्खु नपु मिच्छि सव्वे वि ॥१६॥**

दस० त्रसकाये आद्यचतुष्करहितानि दश, अयतादिष्वष्टादशसु मार्गणास्थानेषु सर्वव्यापित्वेन सर्वजीवस्थानानि ॥१६॥

**पजसन्नी केवलदुगे संजय मणनाण देस मण मीसे ।**
**पण चरम पज्ज वयणे तिय छ व पज्जियर चक्खुम्मि ॥१७॥**

पज्जसन्नी० केवलद्विकसंयमपञ्चकाद्येकादशके एक एव पर्याप्तसंज्ञी । 'वयण'त्ति वाग्योगे द्वि-त्रि-चतुरिन्द्रियाऽसंज्ञिसंज्ञिनः पञ्च पर्याप्ताः । चक्षुर्दर्शने पर्याप्तचतुरिन्द्रियाऽसंज्ञिसंज्ञिरूपाणि त्रीणि, *मतान्तरेणे* न्द्रियपर्याप्त्या पर्याप्तानां तान्येवापर्याप्तसहितानि षट् ॥१७॥

**थीनरपणिंदि चरमा चउ अणहारे दु सन्नि छ अपज्जा ।**
**ते सुहुमअपज्ज विणा सासणि इत्तो गुणे वुच्छं ॥१८॥**

थीनर० स्त्री-पुंवेदयोः पञ्चेन्द्रिये च पर्याप्तापर्याप्तसंज्ञ्यसंज्ञिरूपाणि चत्वारि । *सैद्धान्तिकमतेना*ऽसंज्ञिनो नपुंसका एव । अनाहारके पर्याप्तापर्याप्तसंज्ञिरूपे द्वे [षडपर्याप्ताश्चेत्यष्टौ], अपर्याप्तसंज्ञी अनाहारको विग्रहगतौ, पर्याप्तस्तु केवलिसमुद्घातावस्थायां, शेषाः षट् अपर्याप्ता विग्रहगतौ । सास्वादने पूर्वोक्ता अष्टौ अपर्याप्तसूक्ष्मरहिताः सप्त, सूक्ष्मेषु सास्वादनाऽभावात् ॥१८॥

मार्गणास्थानेषु गुणान् वक्ष्ये —

**पण तिरि चउ सुरनरए नर सन्नि पणिंदि भव्व तसि सव्वे ।**
**इग विगल भू दग वणे दु दु एगं गइतस अभव्वे ॥१९॥**

पण तिरि० तिर्यग्गतौ देशविरतान्तानि पञ्च । सुरनारकयोरविरतान्तानि चत्वारि । नरसंज्ञ्यादिपञ्चके सर्वाणि । एकेन्द्रियादिसप्तके मिथ्यात्व-सास्वादनरूपे द्वे द्वे । 'गइतस' त्ति गतित्रसेषु तेजोवायुष्वभव्येषु चैकं मिथ्यात्वमेव ॥१९॥

**वेय तिकसाय नव दस लोभे चउ अजइ दु ति अनाणतिगे ।**
**बारस अचक्खुचक्खुसु पढमा अहखाइ चरम चऊ ॥२०॥**

वेय ति० वेदत्रिके आद्यकषायत्रये चानिवृत्त्यन्तानि नव, सूक्ष्मादौ तेषामनुदयात् । लोभे सूक्ष्मान्तानि दश । अयते सामान्यतो विरतिहीने आद्यानि चत्वारि । अज्ञानत्रिके आद्ये द्वे द्वे । मिश्रे तु ज्ञानांशतया मिश्रतया न केवलाज्ञानतया, *मतान्तरेण* मिश्रेऽपि तथाविधतत्त्वनिश्चयाभावादज्ञानमेवेति त्रीणि । अचक्षुश्चक्षुषोराद्यानि १२, सयोगिद्वये सतोरपि तयोर्व्यापाराभावात् । यथाख्याते उपशान्तादिचतुष्कम् ॥२०॥

**मणनाणि सग जयाई समइय छेय चउ दुन्नि परिहारे ।**
**केवलदुगि दो चरमाजयाइ नव मइ सुओहिदुगे ॥२१॥**

मणनाणि० मनःपर्याये 'जयाइ'त्ति प्रमत्तादीनि सप्त, सयोग्यादौ तदव्यापारात् । सामायिकच्छेदयोः प्रमत्तादीनि चत्वारि । परिहारविशुद्धे प्रमत्ताप्रमत्ते द्वे । केवलद्विकेऽन्त्यगुणद्वयम् । मति-श्रुतावधिद्विकेऽविरतादीनि नव ॥२१॥

**अड उवसमि चउ वेयगि खइगे इक्कार मिच्छतिगि देसे ।**
**सुहुमे य सठाणं तेर जोग आहार सुक्काए ॥२२॥**

अड० औपशमिकेऽविरतादीन्येवाष्टौ, क्षीणमोहे क्षायिकभावात् । वेदके क्षायोपशमिकेऽविरतादीनि चत्वारि । क्षायिकेऽविरतादीन्येकादश । मिथ्यात्व-सास्वादन-मिश्र-देशविरति-सूक्ष्मेषु निजनिजं गुणस्थानं वाच्यम् । योगत्रिकाहारकशुक्ललेश्यासु त्रयोदशायोगिनि तेषामभावात् ॥२२॥

**असन्निसु पढमदुगं पढमतिलेसासु छच्च दुसु सत्त ।**
**पढमंतिमदुगअजया अणहारे मग्गणासु गुणा ॥२३॥**

असन्निसु० असंज्ञिष्वाद्यद्वयम् । प्रथमलेश्यात्रये षट् प्रमत्तान्तानि । तेजः-पद्मयोरप्रमत्तान्तानि सप्त । आद्यद्वयं=मिथ्यात्व-सास्वादनरूपम्, अन्तिमद्वयं=सयोग्ययोगिरूपम्, अविरतश्चेति पञ्चानाहारके, सयोगी समुद्घातावस्थायामनाहारकः, अयोगी योगरहितत्वेनौदारिकादिशरीर-परिपोषकपुद्गलग्रहणाऽभावादनाहारकः, शेषाणि तु विग्रहगताविति ॥२३॥

अथ मार्गणास्थानेषु योगाः ---

**सच्चेयर मीस असच्चमोस मणवय विउव्वियाहारा ।**
**उरलं मीसा कम्मण इय जोगा कम्ममणहारे ॥२४॥**

सच्चेयर० सत्यादिमनांसि ४, सत्यादिवचांसि ४, औदारिकौदारिकमिश्रौ २, वैक्रियं तन्मिश्रम् २, आहारकं तन्मिश्रम् २, कार्मणं चेति । तत्रानाहारके एकः कार्मणयोगो विग्रहगति-भावी ॥२४॥

**नरगइ पणिंदि तस तणु अचक्खु नर नपु कसाय सम्मदुगे ।**
**सन्नि छलेसाहारग भव्व मइ सुओहिदुगि सव्वे ॥२५॥**

नर० नरगत्यादिषड्विंशतिस्थानेषु सर्वेऽपि योगाः । तत्र 'सम्मदुगे' क्षायिकक्षायोपशमिकरूपे, शेषेष्वाहारकद्विकाभावात् । [आहारकमार्गणायामपि कार्मणयोगोऽवाप्यते, उत्पत्तिप्रथमसमये कार्मणयोगसद्भावात् । *'जोएणं कम्मएणं आहारेई अणंतरं जीवो तेण परं मीसेणं'* [ ][1] इति *परममुनि*[2] वचनप्रामाण्यादिति ज्ञेयम्] ॥२५॥

**तिरि इत्थि अजय सासण अनाण उवसम अभव्व मिच्छेसु ।**
**तेराहारदुगूणा ते उरलदुगूण सुरनरए ॥२६॥**

तिरि० तिर्यग्गत्यादिदशसु आहारकतन्मिश्रवर्जाः १३, ते त्रयोदशौदारिकतन्मिश्रवर्जा देवनरकगतावेकादश ॥२६॥

**कम्मुरलदुगं थावरि ते सविउव्विदुग पंच इगि पवणे ।**
**छ असन्नि चरमवइजुय ते विउविदुगूण चउ विगले ॥२७॥**

[कम्मु० वायोरग्रे भणिष्यमाणत्वात् स्थावरे=क्ष्माजलतेजोवनस्पतिरूपे औदारिकं तन्मिश्रं कार्मणं चेति त्रयम्, कार्मणमन्तरालगतौ, औदारिकं पर्याप्तावस्थायाम्, तन्मिश्रं त्वपर्याप्तानाम् । ते पूर्वोक्तास्त्रयो वैक्रियतन्मिश्रसहिता एकेन्द्रिये वायौ च पञ्च, तत्र वैक्रियकरणस्यापि सम्भवात् । ते पूर्वोक्ताः पञ्चासत्यामृषावाग्युता असंज्ञिनि षट् । ते षट् वैक्रियतन्मिश्रवर्जा विकलेषु चत्वारः] ॥२७॥

**कम्मुरलमीस विणु मण वइ समइय छेय चक्खु मणनाणे ।**
**उरलदुग कम्म पढमंतिम मणवइ केवलदुगंमि ॥२८॥**

कम्मु० मनोवाग्योगादिस्थानषट्के कार्मणौदारिकमिश्रवर्जास्त्रयोदश योगाः । कार्मणौदारिकमिश्रयोः समुद्घातेऽपर्याप्तावस्थायामेव च सम्भवात् । केवलद्विके औदारिक-तन्मिश्र-कार्मण-सत्याऽसत्यामृषामनोवाग्योगरूपाः सप्त ॥२८॥

१- जोएण कम्मएणं, आहारेई अणंतरं जीवो । तेण परं मीसेणं, जाव सरीरस्स निप्फत्ती ॥ २- परममुनयः= श्रीभद्रबाहु स्वामिनः ।

**मणवइउरला परिहारि सुहुमि नव ते उ मीसि सविउव्वा ।**
**देसे सविउव्विदुगा सकम्मुरलमिस्स अहक्खाए ॥२९॥**

मणवइ० परिहार-सूक्ष्मयोः ४ मनोयोगाः, ४ वाग्योगाः, औदारिकं चेति नव । मिश्रे ते नव वैक्रियसहिता दश, मिश्रस्याल्पकालभावितया वैक्रियारम्भत्यागाद्यसम्भवेन वैक्रियमिश्रासम्भवः । देशविरतौ त एव नव वैक्रियतन्मिश्रसहिता एकादश । ते पूर्वोक्ता नव यथाख्याते समुद्घातावस्थाभाविकार्मणौदारिकमिश्रसहिताः ११ ॥ २९ ॥

अथ मार्गणास्थानेषूपयोगाः —

**तिअनाण नाण पण चउ दंसण बार जिय लक्खणुवओगा ।**
**विणु मणनाण दुकेवल नव सुरतिरिनिरयअजएसु ॥३०॥**

तिअनाण० तत्राऽज्ञानत्रिकं ज्ञानपञ्चकं दर्शनचतुष्कं चेति द्वादश जीवलक्षणरूपा उपयोगाः । तत्र सुरतिर्यग्नरकाविरतेषु मनःपर्याय-केवलद्विकरहिता नवोपयोगाः, एषु मनःपर्यायाद्यभावात् ॥३०॥

**तस जोय वेय सुक्काहार नर पणिंदि सन्नि भवि सव्वे ।**
**नयणेयर पण लेसा कसाइ दस केवलदुगूणा ॥३१॥**

तस० त्रसयोगत्रयवेदत्रयादिके संज्ञिभव्यावसाने स्थानत्रयोदशके सर्वेऽप्युपयोगाः । 'नयणेयर'त्ति चक्षुरचक्षुः, शेषलेश्यापञ्चककषायचतुष्केषु केवलद्विकवर्जा दश ॥३१॥

**चउरिंदि सन्नि दुअनाणदंस इग बि ति थावरि अचक्खू ।**
**तिअनाण दंसणदुगं अनाणतिग अभवि मिच्छदुगे ॥३२॥**

चउ० चतुरिन्द्रियोऽसंज्ञिनि वाऽज्ञानद्वयं चक्षुरचक्षुर्दर्शनद्वयं चेति ४ । त एव चक्षुर्दर्शनरहितास्त्रयः- एक-द्वि-त्रीन्द्रियेषु स्थावरपञ्चके वा । अज्ञानत्रिकाऽभव्यमिथ्यात्वसास्वादनेष्वज्ञानत्रिकं दर्शनद्विकं चेति पञ्च ॥३२॥

**केवलदुगे नियदुगं नव तिअनाण विणु खइयअहखाए ।**
**दंसणनाणतिगं देसि मीसि अन्नाणमीसं तं ॥२३॥**

केवल० केवलद्विके निजद्विकं केवलज्ञान-दर्शनरूपमुपयोगद्वयम् । क्षायिके यथाख्याते चाऽज्ञानत्रिकवर्जा नव । देशविरतौ मत्यादिज्ञानत्रयं चक्षुरचक्षुरवधिदर्शनं चेति षट् । मिश्रे पुनस्तदेव दर्शनज्ञानत्रिकमज्ञानमिश्रम् ॥२३॥

**मणनाणचक्खुवज्जा अणहारे तिन्नि दंसण चउ नाणा ।**
**चउनाणसंजमोवसम वेयगे ओहिदंसे य ॥२४॥**

मणनाण० अनाहारके मनःपर्यायचक्षुर्दर्शनवर्जा दश, अन्तरालगतिसमुद्घातावस्थाभाविनोऽनाहारकस्य मनःपर्याय-चक्षुरुपयोगाभावात् । दर्शनत्रयं ज्ञानचतुष्कं चेति सप्तोपयोगाः केवल[ज्ञानवर्ज]ज्ञानचतुष्टये, यथाख्यातवर्जसंयमचतुष्के औपशमिके वेदकेऽवधिदर्शने चेति ॥२४॥

अथ मतान्तरेण मनोयोगादिषु जीवस्थानगुणस्थानयोगोपयोगाश्चिन्त्यन्ते ---

**दो तेर तेर बारस मणे कमा अट्ठ दु चउ चउ वयणे ।**
**चउ दु पण तिन्नि काए जियगुणजोगोवओगन्ने ॥२५॥**

दो तेर० प्राधान्येन विवक्षिते केवल मनोयोगे पर्याप्तापर्याप्तसंज्ञिरूपं जीवस्थानद्वयं, यद्यप्यपर्याप्ते मनोयोगो नास्ति तथापि तस्य तल्लब्धिकत्वाद् *'भाविनि भूतवदुपचार'* [न्याय०९]न्यायेन तद्विवक्षा । एवमुत्तरत्रापि । गुणस्थानानि त्रयोदशाऽयोगिनि मनोयोगाभावात् । कार्मणौदारिकमिश्रवर्जा योगास्त्रयोदश, कार्मणौदारिकमिश्रयोरपर्याप्तावस्थायां समुद्घातावस्थायां च सम्भवस्तदानीं च मनसोऽभावः, समुद्घातमपि यदा विधत्ते तदा मनोवचसी न व्यापारयति, प्रयोजनाभावादिति तदापि मनोयोगे कार्मणौदारिकमिश्राभावः । उपयोगास्तु द्वादशापि । मनोरहिते वाग्योगे तु पर्याप्तापर्याप्तद्वि-त्रि-चतुरन्द्रियासंज्ञिनामष्टौ जीवस्थानानि । संज्ञिजीवस्थानद्वयं तु केवलवाग्योगे न सम्भवति, संज्ञिनां मनःपूर्वकत्वाद् वाग्योगस्य । तथा मिथ्यात्व-सास्वादनरूपं गुणस्थानद्वयं । योगाः कार्मणौदारिकमिश्रौदारिकासत्यामृषावाग्रूपा

योगाः । अज्ञानद्वयं चक्षुरचक्षुर्दर्शने चेत्युपयोगाश्चत्वारः । केवलकाययोगे पर्याप्तापर्याप्तसूक्ष्मबादरसत्कं जीवस्थानचतुष्कम्, आद्यं गुणस्थानद्वयं, योगाः कार्मणौदारिकौदारिकमिश्रवैक्रियवैक्रियमिश्ररूपाः पञ्च, अज्ञानद्वयमचक्षुर्दर्शनं चेति त्रय उपयोगाः ॥३५॥

अथ मार्गणास्थानेषु लेश्याः —

**छसु लेसासु सठाणं एगिंदि असन्नि भूदगवणेसु ।**
**पढमा चउरो तिन्नि उ नारयविगलग्गि पवणेसु ॥३६॥**

छसु० षट्सु लेश्यासु स्वस्वस्थानम्, यथा कृष्णायां कृष्णा इत्यादि । असंज्ञिग्रहणेन संज्ञिवर्जानां सर्वेषामपि संगृहीतत्वात्, यथा देवादिप्राग्भवलेश्यैकेन्द्रियाणां तेजोलेश्या तथाऽसंज्ञिष्वपि, नारकेषु यल्लेयात्रयमुक्तं तद्द्रव्यलेश्यापेक्षया, भावपरावृत्त्या तु तेषां षड्लेश्यत्वमप्येवमन्यत्रापि यथासम्भवं वाच्यम् ॥३६॥

**अहखाय सुहुम केवलदुगि सुक्का छावि सेसठाणेसु ।**
**नरनिरयदेवतिरिया थोवा दु असंखऽणंतगुणा ॥३७॥**

अह० शेष ४१मार्गणास्थानेषु षडपि लेश्याः । अथ मार्गणास्थानेष्वल्पबहुत्वम्—→ सर्वस्तोका मनुष्या, उत्कर्षतोऽपि तेषां गर्भजानां संख्येयत्वात्, तेभ्यो नारका असंख्येयगुणाः, तेभ्योऽपि देवा असंख्येयगुणाः, ततोऽपि तिर्यञ्चोऽनन्तगुणाः ॥३७॥

**पण चउ ति दु एगिंदी थोवा तिन्नि अहिया अणंतगुणा ।**
**तस थोव असंखऽग्गी भूजलनिल अहिय वणऽणंता ॥३८॥**

पण चउ० अत्रोक्तम् —

*'थोवा तसा य तत्तो तेऊ [अ] संखा तओ विसेसहिआ ।*
*कमसो भूदगवाऊ अकायहरिआ अणंतगुणा'* । [जीव० गा० २७६]

अकायाः=सिद्धाः ॥३८॥

**मणवयणकायजोगी थोवा असंखगुण अनंतगुणा ।**
**पुरिसा थोवा इत्थी संखगुणाऽणंतगुण कीवा ॥३९॥**

मण० सुगमा ॥३९॥

**माणी कोही माई लोही अहिय मणनाणिनो थोवा ।**
**ओहि असंखा मइसुय अहिय सम असंख विब्भंगा ॥४०॥**

माणी० सर्वस्तोका मानिनः, तत्परिणामकालस्य क्रोधपरिणामकालापेक्षयाऽतिस्तोकत्वात्[१] । मनःपर्यवज्ञानिनोऽतिस्तोका विशिष्टयतीनामेव तदुत्पादात् । तेभ्योऽवधिज्ञानिनोऽसंख्येयगुणास्तत्र तद्वतां देवनारकाणामपि क्षेपात् । तेभ्यो मतिश्रुतज्ञानिनो विशेषाधिकाः, मतिश्रुतयोरवधिवत्सु तद्रहितेषु च भावात्, स्वस्थाने तु परस्परं तद् द्वयेऽपि तुल्याः । तेभ्यो विभङ्गज्ञानिनोऽसंख्यगुणाः, तद्वतां मिथ्यादृष्ट्यादीनां तेभ्योऽसंख्येयत्वात् ॥४०॥

**केवलिणो णंतगुणा मइसुयअन्नाणि णंतगुण तुल्ला ।**
**सुहुमा थोवा परिहार संख अहखाय संखगुणा ॥४१॥**

**छेय समईय संखा देस असंखगुण णंतगुण अजया ।**
**थोव असंख दु णंता ओहि नयण केवल अचक्खू ॥४२॥**

केव० छेय० केवलिनोऽनन्तगुणाः सिद्धानामपि तत्र क्षेपात् । तेभ्योऽपि मतिश्रुताऽज्ञानिनोऽनन्तगुणास्तद्वतः शेषजीवानन्तकस्य तत्र क्षेपात् । स्वस्थाने द्वावपि समौ । सर्वस्तोकाः सूक्ष्मसम्परायिणः । ततः परिहारविशुद्धिकयथाख्यातच्छेदोपस्थापनीयसामायिकवन्तः प्रत्येकं संख्येयगुणाः, यथोत्तरं शत-सहस्र-कोटि-कोटिशत-कोटिसहस्र पृथक्त्वेन प्राप्यमाणत्वात् । ततो देशविरता असंख्येयगुणास्तद्वतामसंख्येयतिरश्चां भावात् । तेभ्योऽप्यविरता अनन्तगुणा, मिथ्यादृष्ट्यादीनामविरतानामनन्तगुणत्वात् । अवधिदर्शनिनः स्तोकास्तेभ्योऽपि चक्षुर्दर्शनिनोऽसंख्येयगुणास्तद्वतां चतुरिन्द्रियादी-

१. क्रोधादिपरि० -पा० ।

नामसंख्येयगुणत्वात् । ततोऽपि केवलदर्शनिनोऽचक्षुर्दर्शनिनश्च प्रत्येकमनन्तगुणाः, सिद्धानां संसारिणां च तद्वतां यथोत्तरमनन्तगुणत्वात् ॥४१॥४२॥

**पच्छाणुपुव्वि लेसा थोवा दो संख णंत दो अहिया ।**
**अभवियर थोव णंता सासण थोवोवसम संखा ॥४३॥**

**मीसा संखा वेयग असंखगुण खइय मिच्छ दु अणंता ।**
**सन्नियर थोव णंताऽणहार थोवेयर असंखा ॥४४॥**

पच्छा० मीसा० शुक्ललेश्यावन्तः स्तोका, लान्तकाद्यनुत्तरान्तदेवानां [केषाञ्चिन्मनुष्यतिरश्चां च] तद्भावात् । ततः पद्मलेश्यावन्तः तेजोलेश्यावन्तश्च[१] प्रत्येकमसंख्येयगुणास्तद्वतामधोऽधोवर्तिदेवानामसंख्येयगुणत्वात् । ततः कापोतलेश्यावन्तोऽनन्तगुणाः, अनन्तकायेष्वपि तस्या भावात् । ततोऽपि नीललेश्यावन्तो विशेषाधिका नारकक्षेपात् ।[२] ततोऽपि भूयस्त्वेन कृष्णलेश्यावन्तोऽधिकाः । अभव्याः स्तोकाः जघन्ययुक्तानन्तकतुल्यत्वात् तेषां, ततो भव्या अनन्तगुणा बृहत्तरानन्तकतुल्यत्वात् । स्तोकाः सास्वादनाः केषाञ्चिदेवौपशमिकसम्यक्त्वात् प्रतिपततां तद्भावात्, ततोऽप्यौपशमिकसम्यग्दृष्टयः संख्येयगुणाः, उपशमश्रेणिकु(व)र्तां[३] औपशमिकसम्यक्त्वाच्छुद्धपुञ्जगामिनां च बहुत्वात् ॥४३॥

ततोऽपि मिश्राः संख्येयगुणाः,[४] ततोऽपि वेदका असंख्येयगुणाः, ततोऽपि सिद्धक्षेपात्क्षायिका अनन्तगुणास्ततोऽपि मिथ्यादृष्टयोऽनन्ताः, अनन्तवनस्पतिक्षेपात् । तथा संज्ञिनः स्तोकास्तेभ्योऽप्यनन्तवनस्पतिक्षेपादसंज्ञिनोऽनन्तगुणाः । तथाऽनाहारकाः स्तोकाः, सिद्धादीनामनाहारकत्वेनाहारकाद्यनन्तवनस्पत्यपेक्षया स्तोकत्वात्, तेषामितरे=आहारका असंख्येयगुणा, न पुनरनन्तगुणा, एकैकनिगोदात्प्रतिसमयमसङ्ख्येयभागस्य विग्रहगत्यापन्नतयाऽनाहारकत्वेन लभ्यमानत्वात् ॥४४॥

अथ गुणेषु जीवस्थानानि —

१-०ततस्तेजोलेश्यावन्तः पद्मलेश्यावन्तश्च-हे०ला० । २-०नारकादिक्षेपात्-पा० । ३-०उपशमसम्यक्त्ववताम्-पा० ।
४-०तेभ्यश्चौपशमिकसम्यग्दृष्टिभ्यो मिश्रा असङ्ख्यातगुणाः-वृ० ।

**सव्वजियट्ठाण मिच्छे सग सासणि पण अपज्ज सन्निदुगं ।**
**सम्मे सन्नी दुविहो सेसेसुं सन्निपज्जत्तो ॥४५॥**

सव्व० मिथ्यात्वे सर्वजीवस्थानानि, सर्वव्यापकत्वात्तस्य । सास्वादनेऽपर्याप्तबाद-रैकेन्द्रिय-द्वि-त्रि-चतुरिन्द्रियासंज्ञिपर्याप्तापर्याप्तसंज्ञिरूपाणि सप्त । सम्यक्त्वे पर्याप्तापर्याप्तसंज्ञिरूपं द्वयं । शेषेषु पर्याप्तसंज्ञी त्वेक एव तदन्येषां तेष्वसम्भवात् ॥४५॥

अथ गुणेषु योगाः—

**मिच्छदुग अजइ जोगाहारदुगूणा अपुव्वपणगे उ ।**
**मणवइउरलं सविउव्व मीसि सविउव्वदुग देसे ॥४६॥**

मिच्छ० मिथ्यात्वसास्वादनाविरतेषु आहारकद्विकोना योगास्त्रयोदश । अपूर्वादिक्षीण-मोहान्तपञ्चके 'मणवय' त्ति चतुर्द्धा मनश्चतुर्धा वागौदारिकरूपा नव । त एव सवैक्रिया मिश्रे दश । त एव दश सवैक्रियमिश्रा देशविरतावेकादश ॥४६॥

**साहारदुग पमत्ते ते विउवाहारमीस विणु इयरे ।**
**कम्मुरलदुगंताइमममणवयण सजोगि न अजोगी ॥४७॥**

साहा० त एव देशविरत्युक्ता एकादशाहारकद्विकसहिताः प्रमत्ते त्रयोदश, तत्र वैक्रियाहारककरणस्यापि सम्भवात् । ते पूर्वोक्तास्त्रयोदश वैक्रियमिश्राहारकामिश्रवर्जा अप्रमत्ते ११, तत्र हि तदारम्भकत्वं न स्याल्लब्ध्युपजीवनेन प्रमत्तत्वापत्तेः, पूर्वकृततद्द्वयभावस्तु स्यादपीति । समुद्घातावस्था-भाविकार्मणौदारिकमिश्रावौदारिकाद्यन्तमनोवाग्योगरूपाः सप्त सयोगिनि । अयोगस्त्वयोगीति ॥४७॥

अथ गुणेषूपयोगाः —

**तिअनाण दुदंसाइमदुगे अजइ देसि नाणदंसतिगं ।**
**ते मीसि मीस समणा जयाइ केवलिदुगंतदुगे ॥४८॥**

तिअ० मिथ्यात्वे सास्वादने च मतिश्रुताज्ञानविभङ्गरूपमज्ञानत्रयं चक्षुर्दर्शनमचक्षुर्दर्शनं

चेति पञ्चोपयोगाः । अविरते देशविरते च मतिश्रुतावधिज्ञानचक्षुरचक्षुरवधिदर्शनरूपाः षट् । ते षडपि मिश्रे व्यामिश्रा, अत्र हि ज्ञानांशस्याज्ञानमिश्रत्वात् । प्रमत्तादौ क्षीणमोहान्ते[षु] ते पूर्वोक्ताः षट् मनःपर्यायसहिताः सप्त । सयोगिन्ययोगिनि च केवलज्ञानं केवलदर्शनं चेति द्वयम् ॥४८॥

साम्प्रतं सूत्रेऽभिहितमपि यदिह नोपात्तं तदाह —

**सासणभावे नाणं विउव्वगाहारगे उरलमिस्सं ।**
**नेगिंदिसु सासाणो नेहाहिगयं सुयमयंपि ॥४९॥**

सासण० *'बेंदिआणं भंते किं नाणी अन्नाणी? गोअमा! नाणी वि अन्नाणी वि जे नाणी ते नियमा दोनाणी-मइनाणी सुअनाणी । जे अन्नाणी ते वि निअमा दुअन्नाणी-मइअनाणी सुअअनाणी'*[१] । [वि०प०श० ८ । उ०२ । सू०३३ [१]

तथा *'बेंदिअस्स दो नाणा कहं लब्भंति? सासायणं पडुच्च भन्नइ'*[२] [ ] इत्यादिना *सिद्धान्तोक्त*मपि सास्वादनभावे ज्ञानं नाधिकृतं, तस्य मिथ्यात्वाभिमुखतया तत्सम्यक्त्वस्य मलीमसत्वेन ज्ञानस्यापि मलीमसत्वादज्ञानतेति हेतोः *कार्मग्रन्थिकै*रिति सम्भाव्यते । 'विउव्वगाहारगे उरलमिस्सं'ति वैक्रिये आहारके चारम्भमाणौदारिकस्य तन्मिश्रतयौदारिकमिश्रयोग इति *सूत्रे* प्रोच्यते, *कार्मग्रन्थिकै*स्तु तयोरारम्भ-त्यागकाले च तयोरेव प्राधान्यविवक्षया मिश्रत्वं, नौदारिकस्येति युक्त्यौदारिकमिश्रं सूत्रोक्तमपीह नाधिक्रियते । तथा *'एगिंदियाणं पुच्छा । गोअमा! नो नाणी नियमा अन्नाणी'*[३] [वि०प०श० ८ । उ०२ । सू०४५] इत्यादिना सूत्रे एकेन्द्रियाणां सास्वादनभावो निषिध्यते, *कार्मग्रन्थिकै*स्त्विह तन्निषेधो नाधिकृत इति ॥४९॥

अथ गुणेषु लेश्याः —

---

१- बेइंदियाणं पुच्छा। गोयमा! णाणी वि, अण्णाणी वि। जे नाणी ते नियमा दुण्णाणी, तं जहा-आभिणिबोहियनाणी य सुयणाणी य। जे अण्णाणी ते नियमा दुअण्णाणी-आभिणिबोहियअण्णाणी य सुयअण्णाणी य। इति श्रीमहावीरजैनविद्यालयप्रकाशित-विवाहपण्णत्तिसुत्तपुस्तके प्रथमे भागे पृ.३३८ मध्ये।

२- उक्तं च प्रज्ञापनाटीकायाम्-'बेइंदियस्स दो नाणा कहं लब्भंति? सासायणं पडुच्च तस्सापज्जत्तयस्स दो नाणा लब्भंति इति। इति बृहद्वृत्ती।

३-एगिंदिया णं भंते! जीवा किं नाणी० ? जहा पुढविक्काइया। इति श्रीमहावीरजैनविद्यालयप्रकाशित-विवाहपण्णत्तिसुत्तपुस्तके प्रथमे भागे पृ.३३९ मध्ये ।

**छसु सव्वा तेउतिगं इगि छसु सुक्का अजोगि अल्लेसा ।**
**बंधस्स मिच्छअविरइकसायजोग त्ति चउ हेऊ ।।५०।।**

छसु० षट्सु प्रमत्तान्तेषु गुणेषु सर्वा अपि कृष्णादयो लेश्याः । तथैकस्मिन्नप्रमत्ते तेजोलेश्यादित्रयम् । षट्सु अपूर्वादिषु सयोग्यन्तेषु शुक्लैव । अयोगिनस्त्वलेश्याः ।।५०।।

अथ बन्धस्य मिथ्यात्वाविरतिकषाययोगा इति चत्वारो हेतवः प्रोच्यन्ते —

**अभिगहियमणभिगहियाभिनिवेसिय संसइयमणाभोगं ।**
**पण मिच्छ बार अविरइ मणकरणानियमु छजियवहो ।।५१।।**
**नव सोल कसाया पन्नर जोग इय उत्तरा उ सगवन्ना ।**

अभि० नव० आद्यं सौगतादीनाम्, द्वितीयं गोपालादीनाम्, तृतीयमभिनिविष्टानां ***गोष्ठामाहिलाद***ीनामिव, सांशयिकं सन्देहजनितम्, अनाभोगमेकेन्द्रियाणाम् । अविरतिर्मनसः पञ्चेन्द्रियाणां चानिग्रहात् षड्जीववधाच्च द्वादशधा । शेषं स्पष्टमेव ।।५१।।

उत्तरभेदाः ५७ ।

अथ गुणेषु बन्धस्य मूलहेतवः —

**इगचउपणतिगुणेसुं चउतिदुइगपच्चओ बंधो ।।५२।।**

**इगत्ति । एकस्मिन् मिथ्यात्वगुणे चतुःप्रत्ययो बन्धः, मिथ्यात्वादीनां चतुर्णामपि प्रत्ययानां तत्र भावात् । सास्वादनादिचतुष्के तु त्रिप्रत्ययः, तत्र मिथ्यात्वस्य मिथ्यात्व एवावस्थितत्वात् । प्रमत्तादिपञ्चके द्विप्रत्ययो, मिथ्यात्वाविरत्यभावात् । उपशान्तादित्रिके कषायाणामप्यभावात्केवलयोग- प्रत्ययः ।।५२।।**

**चउमिच्छमिच्छअविरइपच्चइया सायसोलपणतीसा ।**
**जोग विणु तिपच्चइयाऽऽहारगजिणवज्ज सेसाओ ।।५३।।**

चउ० एका सातलक्षणा प्रकृतिर्मिथ्यात्वाविरतिकषाययोगैर्बध्यमानत्वाच्चतुःप्रत्यया,

मिथ्यात्वसयोगिगुणं यावत् तद्बन्धात् । नरकत्रिकादिषोडशप्रकृतयो मिथ्यात्वप्रधानप्रत्ययाः, मिथ्यात्वाभावे तद्बन्धाभावात् । सास्वादनव्यवच्छिन्नपञ्चविंशतिरविरतव्यवच्छिन्नदशप्रकृतयश्च मिथ्यात्वाविरतिप्रधानप्रत्ययाः, तयोरुदये तद्बन्धादनुदये चाबन्धात् । उक्तव्यतिरिक्ता आहारकद्विकजिनवर्जाः शेषाः ६५प्रकृतयो मिथ्यात्वाविरतिकषायरूपत्रिप्रत्ययाः, मिथ्यात्वात्सूक्ष्ममपि यावत् तद्बन्धात्, परतस्त्वेतत्त्रयाभावे योगसद्भावेऽपि तदबन्धात्, उपशान्तमोहादिषु केवलयोगवत्सु योगसद्भावेऽप्यासां बन्धो नास्तीति योगप्रत्ययो न विवक्ष्यते । *'सम्मत्तगुणनिमित्तं तित्थयरं संजमेण आहारं'* [बृ०श० गा०४५] इति वचनादेतत्प्रकृतित्रयं विशेषगुणप्रत्ययमिति तद्वर्जनम् । एतेनोत्तरप्रकृतिषु मूलबन्धप्रत्ययाश्चिन्तिताः ॥५३॥

अथ गुणेषु तदुत्तरभेदाश्चिन्त्यन्ते —

**पणपन्न पन्न तियछहिय चत्त गुणचत्त छचउदुगवीसा ।**
**सोलस दस नव नव सत्त हेउणो न उ अजोगिम्मि ॥५४॥**

**पणपन्न मिच्छि हारगदुगूण सासाणि पन्न मिच्छ विणा ।**
**मिस्सदुगकम्मअण विणु तिचत्त मीसे अह छचत्ता ॥५५॥**

**सदुमिस्सकम्म अजए अविरयकम्मुरलमीसबिकसाए ।**
**मुत्तु गुणचत्त देसे छवीस साहारदु पमत्ते ॥५६॥**

**अविरइ इगार तिकसायवज्ज अपमत्ति मीसदुगरहिया ।**
**चउवीस अपुव्वे पुण दुवीस अविउव्वियाहारा ॥५७॥**

**अछहास सोल बायरि सुहुमे दस वेयसंजलणाति विणा ।**
**खीणुवसंति अलोभा सजोगि पुव्वुत्त सग जोगा ॥५८॥**

पणपन्न० इत्यादि गाथापञ्चकम् । सर्वसंख्यया ५७, बन्धप्रत्ययोत्तरभेदानां मध्यान्मिथ्यात्वे आहारकद्विकोना ५५ । मिथ्यात्वपञ्चकवर्जाः सास्वादने ५०, मिथ्यात्वस्य मिथ्यात्व एव स्थितत्वात् । औदारिकमिश्रवैक्रियमिश्रकार्मणानन्तानुबन्धिचतुष्कवर्जाः शेषा मिश्रे ४३, मिश्रस्य कालकर-

णनिषेधात्, तद्भावभाविनां मिश्रद्विककार्मणानां सास्वादनान्तबन्धोदयानां चाऽनन्तानुबन्धिनां तत्रासम्भवात् । तथाऽविरते सैव ४३, प्राग्वर्जितमिश्रद्वयकार्मणयुता: ४६, अविरतस्यान्तरालगतावपर्याप्तावस्थायां च यथासम्भवं तदुपपत्तेः । एकां त्रसवधरूपामविरतिं कार्मणौदारिकमिश्रौ द्वितीयकषायांश्चेति सप्त मुक्त्वा देशविरतौ शेषाः ३९ । 'अविरइइगारतिकसायवज्ज' त्ति उत्तरगाथावयवस्येह सम्बन्धादेकादशाऽविरतीर्द्वितीयकषायांश्च मुक्त्वाऽऽहारकद्विकसहिताः प्रमत्ते २६ । अप्रमत्ते सैवाहारकमिश्र-वैक्रियमिश्रवर्जाः, लब्ध्युपजीवनेन त्वाहारकवैक्रियकरणासम्भवात् पूर्वकृलतद्भावाच्च २४ । अपूर्वे पूर्वकृतयोरपि तयोरभावात् २२ । अनिवृत्तिबादरे हास्यषट्काऽनुदयात् तद्वर्जाः १६, वेदत्रयसंज्वलनत्रयानुदयात्सूक्ष्मे १० । उपशान्तक्षीणयोस्त एव लोभवर्जाः ९ । सयोगिनि औदारिकतन्मिश्रकार्मणाद्यन्तिमसमनोवाग्योगरूपाः ७ । अयोगिनि सर्वबन्धप्रत्ययाभावः ॥५४॥५५॥५६॥५७॥५८॥

अथ गुणेषु बन्धोदयादिविधिः —

**अपमत्तंता सत्तट्ठ मीसअपुव्वबायरा सत्त ।**
**बंधइ छस्सुहुमो एगमुवरिमाऽबंधगाऽजोगी ॥५९॥**

**आसुहुमं संतुदए अट्ठ वि मोह विणु सत्त खीणम्मि ।**
**चउ चरिमदुगे अट्ठ उ संते उवसंति सत्तुदए ॥६०॥**

**उइरंति पमत्तंता सगट्ठ मीसट्ठ वेयआउ विणा ।**
**छग अपमत्ताइ तओ छ पंच सुहुमो पणुवसंतो ॥६१॥**

**पण दो खीण दु जोगी णुदीरगु अजोगि**

अप० आसु० उइ० मिथ्यात्वादयोऽप्रमत्तान्ता आयुर्बन्धकालेऽष्टौ, शेषकालं सप्त कर्माणि बध्नन्ति । मिश्रोऽपूर्वानिवृत्तिबादरौ चाऽऽयुषोऽबन्धात् सप्त । सूक्ष्मे मोहस्याप्यबन्धात् षट् । उपरितनाः सयोग्यन्तास्त्रय एकं सातमेव बध्नन्ति । अबन्धकस्त्वयोगी । सूक्ष्मं यावदष्टावपि कर्माणि सत्तायामुदये च प्राप्यन्ते । क्षीणे मोहवर्जानि सप्त । चरमगुणद्वये सयोग्ययोगिरूपे वेदनीयायुर्नामगोत्रलक्षणानि चत्वारि । उपशान्तेऽष्टौ नियमात् सत्तायां, मोहवर्जानि सप्तोदये । मिथ्यात्वादयः प्रमत्तान्ता आवलिका-

धिके आयुष्यष्टौ, तस्मिन्नावलिकामात्रे तु सप्त कर्माण्युदीरयन्ति । मिश्रेऽष्टावेव तत्र मरणाभावादावलिकाधिकस्यैवायुषः सम्भवात् । अप्रमत्तादयस्त्रयो गुणा वेद्यायुर्वर्जानि षट्, वेद्यायुरुदीरणायाः प्रमत्तान्तत्वात् । सूक्ष्मः षट् पञ्च वा । मोहनीये आवलिकाशेषे पञ्चान्यदा षट् । उपशान्तमोहो मोहवर्जानि पञ्चैव । क्षीणमोहः पञ्च द्वे वा, तत्र ज्ञानावरणदर्शनावरणान्तरायेष्वावलिकाशेषेषु द्वे, तदधिकेषु तु पञ्च । सयोगी तु द्वे नाम-गोत्रे । अयोगी त्वनुदीरकः ॥५९॥६०॥६१॥

अथ गुणवर्त्तिनामल्पबहुत्वम् —

**थेव उवसंता ।**
**संखगुण खीण सुहुमा नियट्टिअपुव्व सम अहिया ॥६२॥**
**जोगि अपमत्त इयरे संखगुणा देससासणामीसा ।**
**अविरय अजोगिमिच्छा असंख चउरो दुवे णंता ॥६३॥**

थेव उव० इति समधिकगाथा । सर्वस्तोका उपशान्ता, उत्कर्षतोऽपि विवक्षितसमये प्रतिपद्यमानानां तेषां चतुःपञ्चाशत एव लभ्यमानत्वात् । तेभ्यः क्षीणमोहाः संख्येयगुणाः, उत्कर्षतस्तेषां प्रतिपद्यमानानां [एकस्मिन्]समयेऽष्टोत्तरशतसंख्यत्वात्, उत्कृष्टपदापेक्षमेतदन्यथा विपर्ययोऽपि, यथा सर्वस्तोकाः क्षीणमोहाः, संख्येयगुणा उपशान्ता इति । तेभ्यः सूक्ष्मानिवृत्त्यपूर्वककरणास्त्रयोऽपि विशेषाधिकाः स्वस्थाने मिथस्तुल्याः । तेभ्यः सयोग्यप्रमत्तप्रमत्तास्त्रयः प्रत्येकं संख्येयगुणा यथोत्तरं कोटीकोटीशत-कोटीसहस्रपृथक्त्वेन प्राप्यमाणत्वात् । तेभ्यो देशविरताः सास्वादना मिश्रा अविरताश्च प्रत्येकमसंख्येयगुणाः, देशविरतिभाजां तिरश्चामसंख्येयत्वात्, सास्वादनास्तु कदाचिन्न भवन्त्येव यदि स्युस्तदा जघन्यत एको द्वावुत्कर्षतो देशविरतेभ्योऽसंख्येयगुणाः । सास्वादनस्य षडावलिकारूपाद्धाया आन्तर्मुहूर्त्तिकमिश्राद्धाया असंख्येयगुणत्वात्, तेभ्यो मिश्रा असंख्येयगुणाः, तेभ्योऽविरता असंख्येयगुणास्तेषां चतुर्गतिकानामपि भावात् । अविरतेभ्योऽयोगिनोऽनन्तगुणाः, अयोगिषु सिद्धानां क्षेपात् । तेभ्योऽपि मिथ्यादृष्टयोऽनन्तगुणाः, तत्र वनस्पत्यानन्त्यक्षेपात् ॥६२॥६३॥

अथ भावानाह —

**उवसमखयमीसोदयपरिणामा दु नव ठार इगवीसा ।**
**तियभेय सन्निवाइय सम्मं चरणं पढम भावे ॥६४॥**
**बीए केवलजुयलं सम्मं दाणाइलद्धि पण चरणं ।**
**तइए सेसुवओगा पण लद्धी सम्म विरइदुगं ॥६५॥**
**अन्नाणमसिद्धत्तासंजमलेसाकसायगइवेया ।**
**मिच्छं तुरिए भव्वाभव्वत्तजियत्तपरिणामे ॥६६॥**

उव० बीए० अन्ना० औपशमिकक्षायिकक्षायोपशमिकौदयिकपारिणामिकास्तावत् पञ्च भावाः क्रमेण द्विनवाष्टादशैकविंशतित्रिभेदाः । तेषां द्व्यादिसंयोगे षष्ठः सान्निपातिको भावः । तत्राद्ये औपशमिके भावे प्रथमसम्यक्त्वोत्पत्तिकाले उपशमश्रेण्यां वा औपशमिकं सम्यक्त्वं चारित्रं चेति भेदद्वयम् । द्वितीये क्षायिके केवलद्विकं क्षायिकं सम्यक्त्वं दानादिलब्धिपञ्चकं चारित्रं क्षायिकं चेति नव भेदाः । तृतीये शेषोपयोगाः मतिश्रुतावधिमनःपर्यायरूपाः ४, अज्ञानत्रय३दर्शनत्रय३रूपाः १०, दानादिलब्धिपञ्चकं सम्यक्त्वं देश-सर्वविरती चेति १८ । एषां कर्मक्षयोपशमवैचित्र्येण विचित्रतया कस्यापि कथञ्चिदुत्पादात् । तथाऽज्ञानमसिद्धत्वमविरतिरूपोऽसंयमो लेश्याषट्कं कषायचतुष्कं गतिचतुष्कं वेदत्रयं मिथ्यात्वं चेत्येकविंशतिरूपास्त्वौदयिके भावे भवन्ति । एषां ह्युदयेन जीवानां तथा तथा परिणमनात् । तथा भव्यत्वमभव्यत्वं जीवत्वं चेति त्रयो भेदाः पारिणामिके भावे । एषामित्थमेव सदा परिणामात् । न हि भव्योऽभव्यत्वमभव्यो भव्यत्वं जीवोऽजीवत्वमजीवो जीवत्वं कदाचित् परिणमति ॥६४॥६५॥६६॥

अथैषामेवैक-द्विकादिसंयोगतो निष्पन्नानां सर्वसंख्यया २६ सान्निपातिकभेदानां सम्भवासम्भवमाह —

**चउ चउगईसु मीसगपरिणामुदएहिं चउ सखइएहिं ।**
**उवसमजुएहिं वा चउ केवलि परिणामुदयखइए ॥६७॥**
**खयपरिणामे सिद्धा नराण पणजोगुवसमसेढीए ।**
**इय पनर सन्निवाइयभेया वीसं असंभविणो ॥६८॥**

चउ० गतिचतुष्टयापेक्षया चत्वारः सान्निपातिकभेदाः । 'मीसग'त्ति क्षायोपशमिका-

नीन्द्रियाणि, पारिणामिकं जीवत्वम्, औदयिकी नरकादिगतिरित्येवंरूपो मूलभेदापेक्षयैकस्त्रिकसंयोगः । तत्रैव त्रिके क्षायिकौपशमिकसम्यक्त्वैकतरक्षेपेण मूलभेदतश्चतुष्कसंयोगद्वये गत्यपेक्षया चत्वारश्चत्वारो भेदाः, त्रयोऽपि गतिचतुष्टयेन गुणिताः १२ सान्निपातिकभेदास्तथा क्षायिकाणि ज्ञानादीनि, पारिणामिकं जीवत्वम्, औदयिकी मनुजगतिरित्येवंरूपोऽपरस्त्रिकसंयोगो भवस्थकेवलिनाम् । क्षायिके ज्ञानदर्शने, पारिणामिकं जीवत्वं चेत्ययं द्विकसंयोगः सिद्धानाम् । तथा क्षायोपशमिकानीन्द्रियाणि, औदयिकी मनुजगतिः, पारिणामिकं जीवत्वं, क्षायिकं सम्यक्त्वम्, औपशमिकं चारित्रं चेत्येकः पञ्चसंयोग उपशमश्रेण्यां नृणामित्येवं मूलभेदाः षष्ठभावस्य षट् । गतिपञ्चकापेक्षया[1] तु १५ । एते पञ्चदशापि सम्भविनो भेदा यथा यत्र येषां सम्भवन्ति तथा दर्शितमेव । शेषास्तु विंशतिरसम्भविनो ज्ञेयाः ॥६७॥६८॥

अथ यत्र कर्मादौ यो भावो घटते तदाह —

**मोहेव समो मीसो चउघाइसु अट्ठकम्मसु य सेसा ।**
**धम्माइ पारिणामियभावे खंधा उदइए वि ॥६९॥**

मोहे० मोहे औपशमिकोऽपि न शेषेषु, अयमाशयः—मोहस्यौपशमिकौदयिकादयश्च सर्वेऽपि सम्भवन्ति भावाः । 'मीस'त्ति क्षायोपशमिकश्चतुर्षु घातिष्वेव, औपशमिकवर्जाश्चत्वारोऽपि भवन्तीत्यर्थः । शेषा क्षायिकौदयिकपारिणामिका अष्टस्वपि कर्मसु । 'धम्माइ'त्ति धर्मास्तिकायादयः पारिणामिके, स्कन्धास्तु द्व्यणुकत्र्यणुकादय औदयिकेऽपि ॥६९॥

अथ गुणस्थानेषु भावाः —

**सम्माइचउसु तिग चउ भावा चउ पणुवसामगुवसंते ।**
**चउ खीणापुव्वि तिन्नि सेसगुणट्ठाणगेगजिए ॥७०॥**

सम्मा० अविरत्यादिषु चतुर्षु क्षायोपशमिकसम्यग्दृष्टेस्त्रयो भावाः, यथौदयिकी गतिः, पारिणामिकं जीवत्वं, क्षायोपशमिकानीन्द्रियाणि सम्यक्त्वं च । क्षायिकौपशमिकसम्यक्त्वान्यतरभावे चत्वारः । तथा चत्वारः पञ्च वौपशमिकानिवृत्तिबादरसूक्ष्मसम्पराययोः उपशान्तमोहे च तत्र त्रयः प्राग्वच्च-

---

१-०षट् । गतिचतुष्कं सिद्धं चेति गति०-पा० ।

तुर्यमौपशमिकचारित्रमिति ४ । क्षायिकदृष्टेस्त्वौपशमिकचारित्रसहिताः पञ्च, *शास्त्रान्तरे*ऽनिवृत्तिबादरसूक्ष्मसम्परराययोरौपशमिकचारित्रस्यापि प्रतिपादनात् । क्षीणमोहेऽपूर्वे च चत्वारो भावास्तत्र त्रयः पूर्ववत्, तुर्यः क्षायिकसम्यक्त्वचारित्ररूपो [भवति] । अपूर्वेऽपि त्रयः पूर्ववत्, चतुर्थस्तु क्षायिकौपशमिकान्यतरसम्यक्त्वरूपः । शेषेषु गुणेषु त्रय एव, तत्र मिथ्यात्वादित्रिके औदयिक - क्षायोपशमिक - पारिणामिकरूपाः । सयोग्ययोगिद्वये औदयिकपारिणामिकक्षायिकात्मानः । एते सर्वेऽपि एकजीवे=एकजीवापेक्षयेत्यर्थः ॥७०॥

अथ संख्येयादिविचारः —

**संखिज्जेगमसंखं परित्तजुत्तनियपयजुयं तिविहं ।**
**एवमणंतं पि तिहा जहन्नमज्झुक्कसा सव्वे ॥७१॥**

संखि० संख्यातं मूलभेदापेक्षया एकमेव । असंख्येयं तु परीत्तासंख्येयं युक्तासंख्येयमसंख्येयासंख्येयमिति त्रिधा । एवमनन्तमपि । इति सर्वेऽपि सप्त भेदाः । तत एकैकं जघन्योत्कृष्टमध्यमभेदतस्त्रिधा ॥७१॥

तत्र संख्येयत्रैविध्यमाह—

**लहु संखिज्जं दुच्चिय अओ परं मज्झिमं तु जा गुरुयं ।**
**जंबूद्दीवपमाणयचउपल्लपरूवणाइ इमं ॥७२॥**

लहु० एकस्य संख्यातीतत्वाद् द्वावेव जघन्य संख्यातं, ततः परं यावदुत्कृष्टं संख्यातं न स्यात् तावत् सर्वत्र मध्यमं संख्येयम्, उत्कृष्टं तु जम्बूद्वीपप्रमाणचतुःपल्यप्ररूपणया इदं च वक्ष्यमाणम् ॥७२॥

**पल्लाऽणवट्ठियसलागपडिसलागमहासलागक्खा ।**
**जोयणसहसोगाढा सवेइयंता ससिहभरिया ॥७३॥**

**ता दीवुदहिसु इक्किक सरिसवं खिविय निट्ठिए पढमे ।**
**पढमं व तदंतं चिय पुण भरिए तम्मि तह खीणे ॥७४॥**

खिप्पइ सलागपल्लेगु सरिसवो इय सलागखवणेण ।
पुन्नो बीओ य तओ पुव्वं पिव तम्मि उद्धरिए ॥७५॥
खीणे सलाग तइए एवं पढमेहिं बीययं भरसु ।
तेहिं य तइयं तेहि य तुरियं जा किर फुडा चउरो ॥७६॥
पढमतिपल्लुद्धरिया दीवुदही पल्लचउसरिसवा य ।
सव्वो वि एस रासी रूवूणो परमसंखिज्जं ॥७७॥

पल्ला० इत्यादिगाथापञ्चकं सुगमम् । नवरं 'सहसोगाढ'त्ति अधस्ताद् योजनसहस्रमवगाढा इत्यर्थः, उपरिष्टादष्टयोजनोच्छ्रित-चतुरष्टद्वादशोपरिमध्याधोविस्तृतप्राकारस्तदुपरि पञ्चधनुःशतविस्तृत-द्विगव्यूतोच्छ्रितवेदिकान्तसहिताश्चत्वारोऽप्येवंविधाः पल्याः कल्प(ल्प्य)न्ते[1] । तत्राद्योऽनवस्थितपल्यो, द्वितीयः शलाकापल्यः, तृतीयः प्रतिशलाकापल्यः तुर्यो महाशलाकापल्यः । आद्यपल्यश्चानवस्थितनामा सशिखाकः सर्षपैरापूर्यते यावदेकोऽपि तत्रान्यः सर्षपः प्रक्षिप्तः सन्नावस्थातुं शक्नोति, ततोऽसत्कल्पनया कश्चनापि देवो दानवो वा तमनवस्थितपल्यं वामकरे धृत्वैकं सर्षपं द्वीपे प्रक्षिपेदेकं समुद्रे एवं तावत्प्रक्षेपो वाच्यो यावदसावनवस्थितपल्योऽशेषो निष्ठितः स्यात् ।

तत एकोऽनवस्थितपल्यसत्कसर्षपेभ्योऽन्य एव सर्षपः शलाकापल्ये प्रक्षिप्यते । ततो यत्र द्वीपे समुद्रे वाऽसावनवस्थितपल्यो निष्ठां गतस्तदन्ता ये द्वीपसमुद्रास्तावत्प्रमाणः पुनरन्यः पल्यः प्रकल्प्यते । सोऽप्यधोयोजनसहस्रमवगाढ उपरिष्टाद् यथोक्तजगतीवेदिकापरिकलितः सशिखाकः सर्षपैरापूर्यते, ततस्तं समुत्पाट्य यस्मिन् द्वीपसमुद्रे वा प्रथमपल्यो निष्ठितस्ततःपरतो[2] द्वीपसमुद्रेष्वेकैकं सर्षपं प्रक्षिपेत्, यावदसौ निर्लेपः स्यात्ततः शलाकापल्ये[3] द्वितीया सर्षपरूपा शलाका प्रक्षिप्यते । *अन्ये* त्वाहुरेषैव प्रथमशलाकेति । ततो यस्मिन् द्वीपे समुद्रे वा स एष द्वितीयो पल्यो निष्ठितस्तदन्ता मूलतः सर्वेऽपि ये द्वीपसमुद्रास्तावत्प्रमाणः पुनरन्यः पल्य कल्प्यते, पूर्ववत्सर्षपैरापूर्यते, ततस्तं तावत्प्रमाणं पल्यमुत्पाट्य

१-०पल्याः पल्यन्ते-पा० ला०। २-०ष्ठ्य निष्ठितस्थानात्परतो-पा० ला०। ३-०यावदसौ निष्ठितः स्यात्ततः तृतीया सर्षपरूपा शलाका शलाकापल्ये प्रक्षिप्य यस्मिन् द्वीपे समुद्रे वा प्रथमः पल्यो निष्ठितस्ततः परतो द्वीपसमुद्रेष्वेकैकं सर्षपं प्रक्षिपेत् तावद् यावदसौ निर्लेपः स्यात्, ततः शलाका०-पा० ला०।

ततो निष्ठितस्थानात् परतो द्वीपसमुद्रेष्वेकैकं सर्षपं क्षिपेत्, यावदसौ निष्ठितः स्यात्, ततः तृतीया सर्षपरूपा शलाका शलाकापल्ये प्रक्षिप्यते । एवमनेन क्रमेण पुनः पुनरनवस्थितपल्यः सर्षपापूरणरिक्तीकरणलब्धैकैकरूपाभिः शलाकाभिः शलाकापल्यो यथोक्तप्रमाणः सशिखाकस्तावदापूरणीयो यावत् तत्रैकोऽप्यन्यः सर्षपो न मातीति ।

ततः पूर्वपरिपाट्या यतोऽनवस्थितपल्यः सर्षपैरापूरणीयस्ततः शलाकापल्यं वामकरतले धृत्वा पूर्वानवस्थितपल्यचरमसर्षपाक्रान्ताद् द्वीपात् समुद्राद्वा परतः पूर्वक्रमेण द्वीपसमुद्रेष्वेकैकं सर्षपं प्रक्षिपेत् [तावद्] यावदसौ निष्ठितः स्यात्, ततः प्रतिशलाकापल्ये सर्षपरूपा प्रतिशलाका प्रक्षिप्यते । ततोऽनन्तरोक्ताऽनवस्थितपल्य उत्पाट्यते । ततः शलाकापल्यचरमसर्षपाक्रान्ताद् द्वीपात्समुद्राद्वा परतः प्रतिद्वीपं प्रतिसमुद्रं च एकैकं सर्षपं प्रक्षिपेद् यावदसौ निष्ठितः स्यात्, ततः शलाकापल्ये पुनरपि सर्षपरूपा एका शलाका प्रक्षिप्यते । ततोऽनन्तरोक्तानवस्थितपल्यचरमसर्षपाक्रान्तो यो द्वीपः समुद्रो वा तदन्तमनवस्थितपल्यं सर्षपैर्भृत्वा ततः परतः पुनरप्येकैकं सर्षपं प्रतिद्वीपं प्रतिसमुद्रं च प्रक्षिपेद्यावदसौ निष्ठितः स्यात्, ततो द्वितीया शलाकापल्ये प्रक्षिप्यते । एवमपराऽपराऽनवस्थितपल्यापूरणरिक्तीकरणलब्धैकैकसर्षपैर्यदा शलाकापल्य आपूरितः स्यात्, पूर्वपरिपाट्या चाऽनवस्थितपल्यस्तदा शलाकापल्यमुत्पाट्य प्राक्तनाऽनवस्थितपल्यचरमसर्षपाक्रान्ताद् द्वीपात् समुद्राद्वा परतः प्रतिद्वीपं प्रतिसमुद्रं चैकैकं सर्षपं प्रक्षिपेद्यावदसौ निर्लेपः स्यात्, ततः प्रतिशलाकापल्ये द्वितीया शलाका प्रक्षिप्यते । ततोऽनवस्थितपल्यमुत्पाट्यानन्तररिक्तीकृतशलाकापल्यचरमसर्षपाक्रान्ताद् द्वीपात् समुद्राद् वा परतः पूर्वक्रमेण द्वीपसमुद्रेष्वेकैकं सर्षपं प्रक्षिपेद् यावदसौ निष्ठितः स्यात्, ततः पुनरपि शलाकापल्ये सर्षपरूपा शलाका प्रक्षिप्यते । यत्र चासौ द्वीपे समुद्रे वा निष्ठितस्तावत्प्रमाणविस्तरात्मकमनवस्थितपल्यं सर्षपैरापूर्य ततः परतः पूर्वक्रमेण द्वीपसमुद्रेष्वेकैकं सर्षपं प्रक्षिपेद् यावदसौ निष्ठितः स्यात्, ततः शलाकापल्ये द्वितीया शलाका प्रक्षिप्यते । एवमनेन क्रमेण तावद्वक्तव्यं यावत्त्रयोऽपि प्रतिशलाकापल्यः शलाकापल्योऽनवस्थितपल्यश्च परिपूर्णमापूरिताः स्युः ।

ततः प्रतिशलाकापल्यमुत्पाट्य निष्ठितस्थानात्परतः प्रतिद्वीपं प्रतिसमुद्रं चैकैकं सर्षपं प्रक्षिपेद् यावदसौ निष्ठितः स्यात्, ततो महाशलाकापल्ये एका सर्षपरूपा शलाका प्रक्षिप्यते । ततः शलाकापल्यमुत्पाट्य प्रतिशलाकापल्यगतचरमसर्षपाक्रान्ताद् द्वीपात् समुद्राद् वा परतः प्रतिद्वीपं प्रतिसमु-

द्वमेकैकं सर्षपं प्रक्षिपेद् यावदसौ निष्ठितः स्यात्, ततः प्रतिशलाकापल्ये एका शलाका प्रक्षिप्यते। ततोऽनवस्थितपल्यमुत्पाट्येदुत्पाट्य च शलाकापल्यगतचरमसर्षपाक्रान्ताद् द्वीपात् समुद्राद् वा परतो द्वीप-समुद्रष्वेकैकं सर्षपं प्रक्षिपेद् यावदसौ रिक्तः स्यात्, ततः शलाकापल्ये प्रथमा शलाका प्रक्षिप्यते। ततोऽनन्तरोक्तोऽनवस्थितपल्यगतचरमसर्षपाक्रान्तो यो द्वीपः समुद्रो वा तत्पर्यन्तविस्तरात्मकमनवस्थितपल्यं सर्षपैरापूर्य तत उत्पाट्य निष्ठितस्थानादग्रतो द्वीप-समुद्रेष्वेकैकं सर्षपं प्रक्षिपेद् यावदसौ निष्ठितः स्यात्, ततो द्वितीया शलाका शलाकापल्ये प्रक्षिप्यते। एवं शलाकापल्यः पूरणीयः। एवमापूरणोत्पाटनप्रक्षेपपरम्परया तावद्वक्तव्यं यावन्महाशलाकापल्यादयश्चत्वारोऽपि समापूरिताः स्युरत्र च यावन्तोऽनवस्थितपल्य-शलाकापल्य-प्रतिशलाकापल्यसर्षपप्रक्षेपव्याप्ता द्वीप-समुद्रा, यावन्तश्चतुष्पल्यसर्षपा एतावत्प्रमाणो राशिरेकरूपोन उत्कृष्टं संख्यातं स्यात्। *सिद्धान्ते* च यत्र कुत्रचित् सङ्ख्यातग्रहणं तत्र सर्वत्रापि जघन्योत्कृष्टान्तरालवर्त्तिमध्यमं संख्यातं द्रष्टव्यम् ॥७३॥७४॥७५॥७६॥७७॥

अधुनाऽसंख्यातकमुच्यते। तत् तु त्रिधा→परीत्तासंख्यातम्, युक्तासंख्यातकम्, असंख्याता-संख्यातं च। पुनरप्येकैकं त्रिधा→जघन्यं मध्यममुत्कृष्टं चेति। तत्र जघन्यपरीत्तासंख्यातकमुच्यते—

**रूवजुयं तु परित्तासंखं लहु अस्स रासि अब्भासे।**
**जुत्तासंखिज्जं लहु आवलियासमयपरिमाणं ॥७८॥**

रूव० उत्कृष्टसंख्यातके रूपे क्षिप्ते जघन्यपरीत्तासंख्येयं स्यात्। 'अस्स रासि-अब्भास'त्ति, अस्य जघन्यपरीत्ताऽसंख्येयस्य राशेरभ्यासे=परस्परगुणने जघन्यं युक्तासंख्येयम्, यथाऽसत्कल्पनया पञ्च पञ्चवारं स्थाप्यन्ते तद्यथा→५।५।५।५।५।, ततः पञ्च पञ्चभिर्गुण्यन्ते जाताः २५, साऽपि पञ्चभिर्गुणिता जातम् १२५, यावच्चतुर्थवारायां जातानि ३१२५, एवं जघन्यपरीत्ताऽसंख्येयराशिस्तन्मितवाराः संस्थाप्य परस्पराभ्यासतोऽन्त्यवेलायां यावान् राशिर्भवति तावत्प्रमाणं जघन्यं युक्तासंख्येयकम्। तावन्तश्चावलिकायाः समया इति ॥७८॥

**बितिचउपंचमगुणणे कमा सगासंख पढमचउसत्त।**
**णंता ते रूवजुया मज्झा रूवूण गुरु पच्छा ॥७९॥**

बिति० द्वितीयस्य युक्तासंख्येयकस्य तथा तृतीयस्य जघन्यासंख्येयासंख्येयस्य चतुर्थस्य जघन्यपरीत्तानन्तकस्य पञ्चमस्य जघन्ययुक्तानन्तकस्य पूर्वोक्तक्रमेणाभ्यासरूपे गुणने क्रमेण जघन्यमसंख्येयासंख्येयकं जघन्यं परीत्तानन्तकं तथा जघन्यं युक्तानन्तकं जघन्यमनन्तानन्तकं भवतीति । ते 'रूवजुअ'त्ति तानि जघन्यपरीत्तासंख्येयकादीनि जघन्यानन्तकावसानानि सर्वाण्येकादिरूपवृद्ध्या यावत् स्वस्वोत्कृष्टतां न लभन्ते तावन्मध्यमानि । तथा 'रूवूण गुरुपच्छा'त्ति वाक्येन जघन्यपरीत्तासंख्येयकादीनि प्रत्येकमेकैकरूपहीनानि पाश्चात्यान्युत्कृष्टानि भवन्ति ॥७९॥

**इय सुत्तुत्तं अन्ने वग्गियमिक्कसि चउत्थयमसंखं ।**
**होइ असंखासंखं लहु रूवजुयं तु तं मज्झं ॥८०॥**

**रूवूणमाइमं गुरु**

इय० इत्येवं सूत्रोक्तो विधिरुक्तोऽन्ये पुनश्चतुर्थमसंख्येयं जघन्ययुक्तासंख्येयरूपमेकवारं वर्गितं तद्गुणो वर्ग इति विधिना, यथा—पञ्च पञ्चभिर्गुण्यन्ते जाताः २५ इत्यादिवत् । यावान् जघन्ययुक्तासंख्येयकराशिस्तावतैव गुणितः सन्नित्यर्थः, किम् ? इत्याह- 'होइ असंखासंखं लहु'त्ति जघन्यमसंख्येयासंख्येयं भवतीति । तदेवैकादिरूपयुक्तं यावदुत्कृष्टतां न लभते तावन्मध्यमं परीत्तासंख्येयासंख्येयं[1] (असंख्येयासंख्येयं) ॥८०॥

रूपोनं त्वादिमं=पाश्चात्यमुत्कृष्टं युक्तासंख्येयं भवति ।

अथ मतेन जघन्यं परीत्तानन्तकमाह—

**तिवग्गिउं तं इमं दस क्खेवे ।**
**लोगागासपएसा धम्माधम्मेगजियदेसा ॥८१॥**

**ठिइबंधज्झवसाया अणुभागा जोगछेयपलिभागा ।**
**दुण्ह य समाण समया पत्तेयनिगोयए खिवसु ॥८२॥**

**पुण तम्मि ति वग्गियए परित्तणंत लहु तस्स रासीणं ।**
**अब्भासे लहु जुत्ताणंतं अभव्वजियमाणं ॥८३॥**

---
१- मध्यमं परीत्तासंख्येयासंख्येयम्- ला० । मध्यममसंख्येयम्- पा० ।

तव्वग्गे पुण जायइ णंताणंत लहु तं च तिक्खुत्तो ।
वग्गसु तह वि न तं होइ णंतखेवे खिवसु छ इमे ॥८४॥
सिद्धा निगोयजीवा वणस्सई काल पुग्गला चेव ।
सव्वमलोगनहं पुण ति वग्गिउं केवलदुगम्मि ॥८५॥
खित्ते णंताणंतं हवेइ जिट्ठं तु ववहरइ मज्झं ।
इय सुहुमत्थवियारो लिहिओ देविंदसूरीहिं ॥८६॥

तिव० तत्पूर्वोक्तं जघन्यमसंख्येयासंख्येयं त्रीन् वारान् वर्गयित्वैतान् दश क्षेपान् क्षिप, तथाहि→लोकाकाश १ धर्मा२ऽधर्मै ३ कजीवप्रदेशाः ४, स्थितिबन्धाध्यवसायाः ५, अनुभागाध्यावसायाः ६, मनोवाक्कायवीर्यरूपयोगसत्कपलिच्छेदाः ७, उत्सर्पिण्यवसर्पिणीरूपसमाद्वयसत्कसमयाः ८, प्रत्येकपृ-थिव्यादिजीवाः ९, निगोदाः सूक्ष्मबादरानन्तकायशरीररूपाः १० प्रत्येकं सर्वेऽसंख्येयाः । एतान् दशापि पूर्वराशौ क्षिप्त्वा पुनस्तस्मिन् राशौ त्रिवर्गिते जघन्यं परीत्तानन्तकं भवति । अस्य राशेः पूर्वोक्तपञ्च[क]दृ-ष्टान्तेन परस्परताडनेऽभ्यासे कृते जघन्यं युक्तानन्तकं भवति, तावत्प्रमाणा एवाभव्या अपि । तस्य युक्तानन्तकस्य जघन्यस्य तद्गुणो वर्ग इति विधिना वर्गे कृते जघन्यमनन्तानन्तकं भवति । तच्च जघन्यमनन्तानन्तं वारत्रयं वर्ग्यते, तथापि तत् स्तोकतया ज्येष्ठनन्तानन्तकं न भवति, अतस्तस्य त्रिवर्गितस्य मध्ये इमान् वक्ष्यमाणान् षडनन्तक्षेपान् क्षिप, तथाहि→एकेऽनन्तरूपाः सिद्धाः १, तथा सूक्ष्मबादररूपा निगोदजीवाः २, प्रत्येकामन्तरूपा वनस्पतिजीवाः ३, तथा कालः सर्वोऽप्यतीतानागतवर्त्तमानसमयराशिरूपः ४, पुद्गलाः परमाणवः ५, 'सव्वमलोगनहं' ति उपलक्षणत्वात्सर्वं लोकालोकाकाशप्रदेशाग्रं च ६ एतान् षडप्यनन्तान् तत्र क्षिप्त्वा पुनस्तत्सर्वं वारत्रयं वर्गयित्वा केवलज्ञानस्य केवलदर्शनस्य चानन्त्ये क्षिप्ते सति ज्येष्ठमनन्तानन्तं भवति । केवलमिदं भणितिमात्रमनेन व्यवहाराभावात् । मध्यं पुनर्व्यवहरति, तेनैवानन्तवस्तूनां सर्वेषामपि व्यवह्रियमाणत्वात् ॥८१॥८२॥८३॥८४॥८५॥८६॥

## ॥ इति षडशीतिकावचूरिः ॥

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

॥ नमोनमः श्रीगुरुप्रेमसूरये ॥

# श्रीगुणरत्नसूरिविरचित-अवचूर्ण्युपेतः

## श्रीदेवेन्द्रसूरिविरचितः

# शतकनामा पञ्चमः कर्मग्रन्थः

नमिय जिणं धुवबंधोदयसत्ताघाइपुन्नपरियत्ता ।
सेयर चउहविवागा वुच्छं बंधविह सामी य ॥१॥

नमि० घातिन्यस्त्रिधा—→सर्व-देशघातिन्योर्घातिन्यश्च२, क्षेत्र१जीव२भव३ पुद्गलविपाकिन्यः ४, चशब्दात् क्षपकोपशमश्रेण्यादि ॥१॥

**वन्नचउतेयकम्मा ऽगुरुलहुनिमिणोवघायभयकुच्छा ।**
**मिच्छकसायावरणा विग्घं धुवबंधि सगचत्ता ॥२॥**

वन्न० *'नियहेउसंभवे वि हु भयणिज्जो जाण होइ पयडीणं । बंधो ता अधुवाओ धुवा अभयणिज्जबंधाओ ॥'* [पं०सं०गा० १५३] ॥२॥

**तणुवंगागिइसंघयणजाइगइखगइ पुव्वि जिणसासं ।**
**उज्जोयायवपरघातसवीसा गोय वेयणियं ॥३॥**

तणु० तनुत्रिकं, तैजसकार्मणयोर्ध्रुवबन्धिनीषूक्तत्वात् ॥३॥

**हासाइजुयलदुगवेयआउ तेवुत्तरी अधुवबंधा ।**
**भंगा अणाइसाई अणंतसंतुत्तरा चउरो ॥४॥**

हासा० अनाद्यनन्त१अनादिसान्त२साद्यनन्त३सादिसान्त४रूपाः भङ्गाः ४ ॥४॥

अथ यत्रोदये बन्धे वा ये भङ्गाः घटन्ते तानाह–

**पढमबिया धुवउदइसु धुवबंधिसु तइयवज्ज भंगतिगं ।**
**मिच्छम्मि तिन्नि भंगा दुहावि अधुवा तुरियभंगा ॥५॥**

पढम० प्रथमोऽभव्यस्य, द्वितीयो भव्यस्य, ध्रुवोदयत्वेन सादित्वाभावाच्छेषयोरसम्भवः । 'तइयवज्जत्ति' सादित्वेऽनन्तत्वाभावात् तृतीयवर्जनम् । मिथ्यात्वे भङ्गाः ३, साद्यनन्तस्याभावात् । 'दुहावि अधुव' त्ति, द्विधाऽपि बन्धमुदयं चाश्रित्याऽध्रुवत्वात् सादिसान्ताः ॥५॥

**निमिण थिरअथिर अगुरुय सुहअसुहं तेय कम्म चउवन्ना ।**
**नाणंतराय दंसण मिच्छं धुवउदय सगवीसा ॥६॥**

**थिरसुभियर विणु अधुवबंधी मिच्छ विणु मोहधुवबंधी ।**
**निद्दोवघाय मीसं सम्मं पणनवइ अधुवुदया ॥७॥**

निमिण० थिर० स्थिरास्थिरशुभाशुभचतुष्कं विनाऽध्रुवाः ६९ । कषायाः १६, भयं

१, जुगुप्सा २; मिथ्यात्वं विना मोहध्रुवाः १८ । *'अव्वुच्छिन्नो उदओ पयडीणं जाण ता धुवोदईया । वुच्छिन्नो वि हु संभवइ जाण अधुवोदया ताओ'* [पं० सं० गा० - १५५] ॥६॥७॥

**तसवन्नवीस सगतेयकम्म धुवबंधि सेस वेयतिगं ।**
**आगिइतिग वेयणियं दुजुयल सग उरल सास चऊ ॥८॥**

**खगईतिरिदुग नीयं धुवसंता सम्म मीस मणुयदुगं ।**
**विउविक्कार जिणाऊ हारसगुच्चा अधुवसंता ॥९॥**

तस० खग० 'सगतेअकम्म'त्ति तैजसशरीर१कार्मणशरीर२तैजससंघातन३कार्मणसंघातन४तैजसतैजसबन्धन५कार्मणकार्मणबन्धन६तैजसकार्मणबन्धन७, वर्ण४ तैजस-कार्मणयोरुक्तत्वाच्छेषाः ४१, 'आगिइ तिग'त्ति 'आगिइसंघयणजाइ' १७ [गाथा-३], 'दुजुयल'त्ति हास्य-रत्यरति-शोक४, 'सग उरल'त्ति औदारिकशरीर१औदारिकाङ्गोपाङ्ग२औदारिकसङ्घातन३औदारिकौदारिकबन्धन४औदारिकतैजसबन्धन५औदारिककार्मणबन्धन६औदारिकतैजसकार्मणबन्धनानि ७, 'सास चऊ' 'सासं उज्जोआयवपरघा' [गाथा-३] ध्रुवसत्ता १३० ।[१] 'विउव्विकार' त्ति देवद्विकं नरकद्विकं वैक्रियसप्तकमौदारिकवत्, एवमाहारकसप्तकमपि, अध्रुवसत्ता २८ । इह वैक्रियैकादशमुच्चैर्गोत्रं चाऽप्राप्तत्रसभावानामनाद्येकेन्द्रियाणां प्राप्तत्रसत्वानामपि विसंहितैतत्सत्तानां[२] स्थावरभावगतानां सत्तायां न लभ्यते, तदन्येषां समस्ति । तथा जिनकर्माऽपि सम्यक्त्वसम्भवेऽपि केषाञ्चित्तिर्यगादीनां सत्तायां नास्ति, परेषामस्ति । एवं सम्यक्त्वमिश्रे अप्यभव्यानामनादिमिथ्यादृशां शेषाणामप्युद्वलिततत्पुञ्जानां न स्तः, शेषाणां तु भवतः । नरद्विकं तेजोवायूनां न लभ्यते । आहारकसप्तकं संयमिनामपि केषाञ्चिदेव । देवनारकायुषी न स्थावराणां । तिर्यगायुस्तु नाहमिन्द्रदेवानाम् । नरायुर्न तेजोवायुसप्तमक्ष्मानारकाणाम् । सर्वथैवैतेष्वेतद्बन्धाभावादित्यासामध्रुवसत्ताकता, शेषास्तु स्वस्वसत्ताच्छेदं यावत्सर्वजीवानां सदा लभ्यमानतया ध्रुवसत्ताकाः ॥८॥९॥

---

१. ०परघा'त्ति उच्छ्वासोद्योताऽऽतपपराघातरूपोच्छ्वासचतुष्कं ध्रुवसत्ताकाः १३० - पा०। २. ०विसंयोजिततत्स० -पा०।

**पढमतिगुणेसु मिच्छं नियमा अजयाइअट्ठगे भज्जं ।**
**सासाणे खलु सम्मं संतं मिच्छाइदसगे वा ॥१०॥**

पढम० मिथ्यात्वे तावन्मिथ्यात्वं सत्तायामस्त्येव । सास्वादनेऽपि नियमादष्टाविंशतिसत्कर्मणि, तत्सत्ता । एवं मिश्रेऽपि २८ सत्कर्मणि, उद्वलितसम्यक्त्वपुञ्जतया २७ सत्कर्मणि वा तत्सत्ता । अयताद्यष्टके तत्सत्ताभजना, भजना त्वेवं—यदा अविरतादिरुद्वलितानन्तानुबन्धिमिथ्यात्वादितया क्रमेण २३।२२।२१। सत्कर्मा सन् एतद्गुणस्थानाष्टकमारोहति तदा न मिथ्यात्वसत्ता । यदा तु २८।२४। वा सत्कर्मा वा स्यात् तदा तस्य सत्तेति । एवं सास्वादनस्य नियमात्सम्यक्त्वं सत्, तस्याष्टाविंशतिसत्कर्मत्वात् । तद्रहितमिथ्यात्वादिदशके तत् सम्यक्त्वं वेति वैकल्प्यं भाज्यमित्यर्थः । तत्राऽनादिमिथ्यादृष्टौ षड्विंशतिसत्कर्मत्वेन सादि, मिथ्यादृष्टौ मिश्रे चोद्वलितसम्यक्त्वपुञ्जतया क्षीणसप्तकेऽविरतादौ च नास्ति पौद्गलिकं सम्यक्त्वमितरस्य पुनरस्तीति भावः ॥१०॥

**सासणमीसेसु धुवं मीसं मिच्छाइनवसु भयणाए ।**
**आइदुगे अण नियया भइया मीसाइनवगंमि ॥११॥**

सासण० सदैवाष्टाविंशतिसत्कर्मणि सास्वादने एवं मिश्रेऽपि, कदाचिच्चोद्वलितसम्यक्त्वपुञ्जतया २७ सत्कर्मणि ध्रुवसत्ताकं मिश्रम् । एतद्द्वयरहितमिथ्यात्वादिनवके तु मिश्रसत्ता भाज्या, २६ सत्कर्मणि अनादिमिथ्यादृष्टौ क्षीणसप्तकेऽविरतादौ नास्ति सत्ता, इतरस्य त्वस्तीत्यर्थः । आदिगुणद्वयेऽनन्तानुबन्धिनो नियतसत्ताकास्तयोर्नियमेन तद्बन्धकत्वात्, मिश्रादिनवके तु भाज्याः, विसंयोजितानन्तानुबन्धितया चतुर्विंशतिसत्कर्मणि सम्यग्मिथ्यादृष्टौ क्षीणसप्तकस्य विसंयोजितानन्तानुबन्धिनो वाऽविरतादेर्न सन्त्यनन्ताः सत्तायामितरस्य सन्ति । अयं ***शेषकर्मग्रन्थाभिप्रायः, कर्मप्रकृतिपञ्चसंग्रहा***भिप्रायेण तु मिश्रादिपञ्चके एव तेषां भजना, उपरितनचतुष्के तु नियमात् तदभावः । विसंयोजितानन्तानुबन्धिन एव तन्मतेनोपशमश्रेण्यधिरोहात् । यदुक्तम् — ***'संजोयणा उ नियमा दुसु पंचसु हुंति भइयव्वा'*** त्ति [क० प्र० गाथा ८२३] । 'संजोयणा' त्ति अनन्तानुबन्धिनः ॥११॥

**आहारगसत्तगं वा सव्वगुणे बितिगुणे विणा तित्थं ।**
**नोभयसंते मिच्छो अंतमुहुत्तं भवे तित्थे ॥१२॥**

आहारग० आहारकसप्तकं सर्वगुणेषु सत्तायां 'वा' विकल्पेन स्यादस्ति स्यान्नास्तीत्यर्थः,

यदाऽप्रमत्तावस्थायां तद्बध्वा विशुद्धिवशादुपरितनगुणेषु कश्चिदारोहति, अविशुद्ध्या तु प्रतिपतन्नधस्तनगुणेष्ववरोहति तदा सर्वत्राऽपि तत्सत्ता, यदाऽप्रमत्तोऽपि तन्न बध्नाति तदारोहतोऽवरोहतश्च सर्वगुणेषु न तत्सत्ता । एवं जिनकर्मापि, यदाऽविरतादिरपूर्वकरणषड्भागं यावत् कश्चिद् बध्वा विशुद्ध्यारोहत्यविशुद्ध्यावरोहति च तदा सर्वगुणेषु सत्तायां लभ्यते, यदि पुनर्न बध्नाति बद्धमपि स्थितिक्षयेण वा क्षीणं तदा नास्तीति, सास्वादनमिश्रयोस्तु नियमान्नास्ति तत्सत्तेति तद्वतस्तद्भावागमनात् । तीर्थंकराहारकसप्तक- रूपोभयं सत्तायां न मिथ्यादृग् । केवलजिनकर्मणि सत्यपि यो नरके बद्धायुः सोऽन्तर्मुहूर्तं मिथ्यात्वं गत्वा नरके गच्छति, उत्पत्तिमनन्तरमन्तर्मुहूर्तादूर्ध्वमवश्यं सम्यक्त्वं प्रतिपद्यते ॥१२॥

**केवलजुयलावरणा पण निद्दा बारसाइमकसाया ।**
**मिच्छं ति सव्वघाई चउनाणतिदंसणावरणा ॥१३॥**

**संजलण नोकसाया विग्घं इय देसघाइओ अघाई ।**
**पत्तेयतणुट्ठाऽऽऊ तसवीसा गोयदुगवन्ना ॥१४॥**

केवल० संज० प्रत्येकाष्टकं *'परघाउस्सासआयवुज्जोयं'* [क० वि० गाथा २५] इति गाथोक्तं, तन्वष्टकं 'तणुवंगागिइ' [गाथा ३] इति गाथोक्तं तनुपञ्चकादिप्रकृतिपञ्चत्रिंशद्रूपम्, गोअदुर्ग= 'गोअवेअणीयं' [गाथा ३]४ सर्वघातिनी २० देशघातिनी २५ अघातिन्यः ७५, एता***श्चौरमिलितसाधुन्यायेन*** सर्वदेशघातिप्रकृतिमिलिताः सत्यस्तदनुरूपं तत्तद्घातं कुर्वाणा अपि स्वकीयरूपेण कस्याप्यघातनशीलतयाऽघातिन्यः ॥१३॥१४॥

**सुरनरतिगुच्च सायं तसदस तणुवंग वइर चउरंसं ।**
**परघासग तिरिआउं वन्नचउ पणिंदि सुभखगई ॥१५॥**

सुर० 'परघासग' त्ति परघाउसासायवउज्जोअनिम्माणतित्थागुरुलहु[१] ७ ॥१५॥

**बायाल पुन्नपगई अपढमसंठाणखगइसंघयणा ।**
**तिरिदुग असाय नीयोवघाय इग विगल निरयतिगं ॥१६॥**

---

१- ०लंहु पराघातोच्छ्वासाऽऽतपोद्योतनिर्माणतीर्थाऽगुरुलघुरूपं पराघातसप्तकम् -पा०

**थावरदस वन्नचउक्क घाइपणयालसहिय बासीई ।**
**पावपयडि त्ति दोसु वि वन्नाइगहा सुहा असुहा ॥१७॥**

बायाल० थाव० [सर्व]देशघातिन्यः ४५, वर्णचतुष्कं [पुण्य]प्रकृतिषु शुभं, पापप्रकृतिष्वशुभम् ॥१६॥१७॥

**नामधुवबंधिनवगं दंसण पण नाण विग्घ परघायं ।**
**भय कुच्छ मिच्छ सासं जिण गुणतीसा अपरियत्ता ॥१८॥**

नाम० 'वन्नचउतेअकम्मा' [गाथा-२] इत्यादि प्रकृतिनवकम् ॥१८॥

**तणुअट्ठ वेय दुजुयल कसाय उज्जोयगोयदुग निद्दा ।**
**तसवीसाऽऽउ परित्ता खित्तविवागाणुपुव्वीओ ॥१९॥**

तणु० 'तणुवंगागिइ' [गाथा-३] इति गाथोक्तप्रकृतिः ३३, तैजसकार्मणयोरपरावर्तमानात् । 'दुजुअल'त्ति हास्यरत्यरतिशोक ४ । उद्द्योतद्वयमुद्योतातपे । 'गोअदुगं'= 'गोअवेअणीअं' [गाथा-३] ४ परावर्तमान ९१ । अपरावर्तमानाः प्रतिपक्षरहितत्वान्निजहेतुसद्भावे याः सदैव बध्यन्ते, उक्तं च→ *'विणिवारिय जा गच्छइ बंधं उदयं च अन्नपगईए । सा हु परियत्तमाणी अणिवारंती अपरियत्ता'* [पं० सं० गाथा १६१] ॥१९॥

जीवविपाकिनीराह –

**घणघाइ दुगोय जिणा तसियरतिग सुभगदुभगचउ सासं ।**
**जाइतिग जियविवागा आऊ चउरो भवविवागा ॥२०॥**

घण० ज्ञान ५, दर्शन ९, मोहनीय २८, अन्तराय ५, एवं ४७, 'गोअवेअणीअं' [गाथा-३] ४, त्रसत्रिकं, स्थावरत्रिकं सुभगदुर्भगयोश्चतुष्कम्, 'जाइ गइ खगइ' [गाथा-३] ११ एवं जीवविपाकिनीः ७८ ॥२०॥

**नामधुवोदय चउतणुवघायसाहारणियर जोयतिगं ।**
**पुग्गलविवागि बंधो पयइठिइरसपएस त्ति ॥२१॥**

'नामधुवोदय' त्ति 'निमिण थिरअथिर अगुरुअ सुहअसुहं तेअ कम्म चउवन्ना' [गाथा-६] इति १२, 'चउतणु' त्ति 'तणुवंगागिइ संघयण' [गाथा-३] इति १८, 'जोयतिगं'= 'उज्जोआयवपरघा' [गाथा-३] ३, पुद्गलविपाकि ३६, आसां शरीरपुद्गलेषु विपाकदर्शनात् ॥२१॥

अथ भूयस्कारादीन् मूलप्रकृतिष्वाह —

**मूलपयडीण अडसत्तछेगबंधेसु तिन्नि भूगारा ।**
**अप्पतरा तिय चउरो अवट्ठिया न हु अवत्तव्वो ॥२२॥**

मूल० उपशान्तादावेकं बद्ध्वा पतितस्य षड्विधबन्धे प्रथमसमये प्रथमो भूयस्कारो, द्वितीयादिसमयेष्ववस्थितः । ततोऽपि सप्तविधं बध्नत आद्यसमये द्वितीयो भूयस्कारो, द्विसमयादिष्ववस्थितः । ततोऽप्यष्टविधं बध्नत आद्यसमये तृतीयो, द्विसमयादिष्ववस्थितः । [तथाऽऽयुर्बन्धकाले]ऽष्टविधं बध्वा सप्तविधबन्धे आद्यसमये प्रथमोऽल्पतरो, द्वितीयादिष्ववस्थितः । एवं सप्तविधबन्धात् षड्विधे बन्धे द्वितीयः । षड्विधादेकविधे तृतीयः । एकविधमेव बध्नतो द्वितीयादिषु समयेषु चतुर्थोऽप्यवस्थित बन्धो लभ्यते । अवक्तव्यो मूलप्रकृतीनां नास्ति, तासां सर्वथाऽबन्धको भूत्वा पुनर्बन्धाभावात् ॥२२॥

**एगादहिगे भूओ एगाईऊणगम्मि अप्पतरो ।**
**तम्मत्तोऽवट्ठियओ पढमे समए अवत्तव्वो ॥२३॥**

एगा० 'पढमे समए अवत्तव्वो' त्ति उत्तरप्रकृतीनां बन्धव्यवच्छेदं कृत्वा पुनः प्रतिपाते मरणे वा बन्धमारभमाणस्याद्यसमयेऽवक्तव्यः ॥२३॥

**नव छ च्चउ दंसे दु दु ति दु मोहे दु इगवीस सत्तरस ।**
**तेरस नव पण चउ ति दु इक्को नव अट्ठ दस दुन्नि ॥२४॥**

नव० अपूर्वकरणद्वितीयादिभागेषु चतुर्विधं बध्वा पतितस्य मिश्रं यावत् षड्विधं बध्नतो दर्शनावरणे प्रथमसमये प्रथमो भूयस्कारो, द्वितीयादिष्ववस्थितः । ततोऽपि सास्वादनमिथ्यात्वयोर्नवविधं बध्नतस्तथैव द्वितीयः । एवं नवविधबन्धात् षड्विधबन्धे आद्योऽल्पतरः । षड्विधबन्धाच्चतुर्विधबन्धे द्वितीयोऽल्पतरः । त्रिष्वपि बन्धस्थानेषु द्व्यादिसमयेषु त्रयोऽवस्थिताः । उपशान्ते दर्शनावरणीयस्याबन्धको भूत्वा पतितस्य चतुर्विधं बध्नतः प्रथमसमये प्रथमोऽवक्तव्यः, तस्यैवायुःक्षये देवलोकं गतस्य षड्विधं बध्नतो द्वितीयोऽवक्तव्यः ।

हास्यरत्यरतिशोकानामन्यतरद्विकस्य वेदत्रयेऽन्यतरवेदयोर्मिश्रसम्यक्त्वयोश्च बन्धाभावादुत्कर्षतोऽपि मोहनीयस्य द्वाविंशतिरेव बध्यते । सास्वादने मिथ्यात्वबन्धाभावात् २१, मिश्रेऽविरते चानन्तानुबन्धिनामबन्धात् पुंवेदस्यैव केवलस्य बन्धाच्च १७, देशेऽप्रत्याख्यानवर्जाः १३, प्रमत्ते प्रत्याख्यानवर्जाः ९, एवमप्रमत्तापूर्वयोरपि, परं हास्यद्विकबन्ध एवानयोर्वाच्यः, अनिवृत्तिबादराद्यभागे पुंवेदं सञ्ज्वलनचतुष्कं च, स एव द्वितीयांशे पुंवेदवर्जं सञ्ज्वलनचतुष्कम्, त्र्यंशे क्रोधवर्जा ३, चतुर्थांशे मानवर्जा(र्जौ) २, स एव पञ्चमांशे मायावर्जं लोभैकम्, सूक्ष्मे [नैकस्यापि बन्धः । ततोऽवरोहणे] मोहस्यैकविधं बध्वा पतितस्य द्विविधं बध्यत आद्यसमये आद्यो भूयस्कारः । एवं त्रिविधादिबन्धे शेषा अष्टौ भूयस्काराः । एवं द्वाविंशतिबन्धादारभ्य एकविधबन्धं यावदेकविंशतिबन्धरहिता अष्टौ अल्पतरबन्धाः । एकविंशतिः सास्वादनस्यैव योग्यत्वेन द्वाविंशतिविधबन्धकस्य मिथ्यादृष्टेः सास्वादनगमनाभावादौपशमिकसम्यग्दृष्टिरेव सास्वादनो भवतीति भावः । दशस्वपि बन्धस्थानेषु द्वितीयादिसमयेष्ववस्थितबन्धा दश । उपशान्ते मोहस्याबन्धको[1] भूत्वा एकविधं बध्नत आद्योऽवक्तव्यः । स एवायुःक्षये देवेषूत्पन्नः सप्तदशविधं बध्नन् द्वितीयमवक्तव्यबन्धं लभते ॥२४॥

**तिपणछअट्ठनवहिया वीसा तीसेगतीस इग नामे ।**
**छस्सगअट्ठतिबंधा सेसेसु य ठाणमिक्किक्कं ॥२५॥**

तिपण० नाम्न्यष्टौ बन्धस्थानानि । तद्यथा → 'वन्नचउतेयकम्मा' [गाथा-२] इत्यादिनवकं तिर्यग्द्विकैकेन्द्रियजात्यौदारिकशरीरहुण्डस्थावरापर्याप्ताऽस्थिराऽशुभानादेयाऽयशोदुर्भगानि, बादरसूक्ष्मयोरेकं प्रत्येकसाधारणयोरेकमित्येषां त्रयोविंशतिरपर्याप्तैकेन्द्रिययोग्या एक-द्वि-त्रि-चतुःपञ्चेन्द्रियान्यतरेण मिथ्यादृष्टिना बध्यते । सैव पर्याप्ततत्प्रायोग्यात् तेनैव पराघातोच्छ्वाससहिता २५, केवलमपर्याप्तस्थाने पर्याप्तं वाच्यम् । स्थिरास्थिरादीनां परावृत्तिश्च वाच्या । पञ्चविंशतिरेवातपोद्योतैकतरक्षेपे २६ । अष्टाविंशतिस्तु देवगतियोग्या तिर्यग्मनुष्यै[रेव] बध्यते । तथाहि → देवद्विक-वैक्रियद्विक-पञ्चेन्द्रियजाति-समचतुरस्रोच्छ्वासपराघातशुभखगतित्रसचतुष्क-सेतरस्थिरशुभयशःकीर्तीनामन्यतरत्रिकसुभगसुस्वरादेयानि नव ध्रुवबन्धिन्यश्च । अस्यां जिनक्षेपेण एकोनत्रिंशत्, तां च सम्यग्दृशो नरा एव बद्धजिननामानो बध्नन्ति, एषा च पर्याप्ततिर्यक्पञ्चेन्द्रियप्रायोग्याऽपि बध्यते । पूर्वोक्तपञ्चविंशतौ औदारिकाङ्गोपाङ्गान्यतरसंहननस्वरविहायोगतीनां क्षेपात् २९, नवरं पञ्चेन्द्रियजातित्रसाद्यभिलापः कार्यः । देवाद्यष्टाविंशतिरेवा-

---

१. दश । सूक्ष्मे उपशान्ते न मोह०- पा० ।

हारकद्विकक्षेपे ३०, केवलं स्थिरशुभयशःकीर्तिरूपानि शुभान्येव वाच्यानि, एषा मनुष्यद्विकाद्यभिलापेन तीर्थंकरसहिता मनुष्यगतिप्रायोग्याऽपि देवेन बध्यते । देवार्हपूर्वोक्तत्रिंशन्मध्ये जिनक्षेपे एकत्रिंशतमिमामप्रमत्तः कियन्तमपि भागं यावदपूर्वकरणश्च बध्नाति । एकविधं तु यशः-कीर्तिरूपं निवृत्तिबादरानिवृत्तिसूक्ष्मसम्परायाः स्वरूपेणैव बध्नन्ति, न तु कस्यचित्प्रायोग्यं, देवगतिप्रायोग्यस्यापि बन्धस्यापूर्वकरणमध्ये व्यवच्छिन्नत्वात् । उक्तं च —

*'अडुसरथावरनवनवनामधुविगजाइतिरिदुरलहुंडं। अपजेगिंदितिवीसासपरघस पणवीस पजंजे'* ॥१॥

*जो अडुगे गेगिछ वीसा सुरहुगतसदसनवधुवाहिं। समचउपणिंदि सुखगइसुरविउव्विदुपरघसासेहिं* ॥२॥

*सा सजिणइगुणतीसा जिणविणु आहारदुगसहिअ तीसा। सजिणेगतीस एगं जसत्ति नामइबंधपया'* ॥३॥

[ ]

अत्र भूयस्कारबन्धास्त्रयोविंशत्यादेः पञ्चविंशत्यादिबन्धरूपाः षट् प्रतीताः । अल्पतरबन्धास्तु सप्त, तत्रापूर्वकरणे देवगतिप्रायोग्यामष्टाविंशतिमेकोनत्रिंशतं वा बध्वा तद्बन्धव्यवच्छेदे एकविधबन्धं गतस्याद्यसमये प्रथमोऽल्पतरबन्ध, एकत्रिंशद्बन्धाच्च त्रिंशद्बन्धं गतस्य द्वितीयोऽल्पतरबन्धः, एतच्च कथं सम्भवतीत्युच्यते, इह कश्चिदाहार[क]द्विकतीर्थकरनामसहितां पूर्वोक्तामेकत्रिंशतं बध्वा दिवि समुत्पन्नस्तस्य प्रथमसमय एव मनुष्यगतिप्रायोग्यां पूर्वोक्तां तीर्थकरनाम्नस्त्रिंशतं बध्नत एकत्रिंशतस्त्रिंशति गमनं सम्भवति, ततस्तस्यैव दिवश्च्युत्वा मनुष्येषूत्पन्नस्य पुनरपि देवप्रायोग्यां पूर्वोक्तां तीर्थकरनामयुक्तामेकोनत्रिंशतं बध्नतस्तृतीयोऽल्पतरबन्धो, यदा तु तिर्यग्मनुष्याणामन्यतरस्तिर्यक्प्रायोग्यां पूर्वोक्तामेकोनत्रिंशतं बध्वा तथाविधविशुद्धिवशाद्देवगतिप्रायोग्यामष्टाविंशतिं बध्नाति तदा चतुर्थः, अष्टाविंशतेश्च तथाविधसंक्लेशवशादेकेन्द्रियप्रायोग्यं षड्विंशतिबन्धं गतस्य पञ्चमस्ततोऽपि पञ्चविंशतिबन्धं गतस्य षष्ठस्ततोऽपि त्रयोविंशतिबन्धं गतस्य सप्तमोऽल्पतरबन्धः । उपशान्तमोहे नामकर्मणोऽबन्धको भूत्वोपशान्ताद्धाक्षयेण प्रतिपत्य यदा पुनरप्येकविधं बध्नाति तदाद्यसमये प्रथमोऽवक्तव्यबन्धः, अथोपशान्तमोहावस्थायामेवायुःक्षयेणानुत्तरसुरेषूत्पद्यते, उपात्ततीर्थंकरनामा च स्यात् तदा तस्य प्रथमसमये एव मनुष्यगतिप्रायोग्यां पूर्वोक्तां तीर्थकरनामयुक्तां त्रिंशतं बध्नतो द्वितीयोऽवक्तव्यबन्धोऽथानुपात्ततीर्थकरनामा तदा तद्रहितो तत्रैव मनुष्यगतिप्रायोग्यामेकोनत्रिंशतं बध्नतस्तृतीयोऽवक्तव्यबन्धः । अवस्थितबन्धा अष्टौ, वेदनीयवर्जशेषकर्मणामुपशान्तमोहावस्थायामायुषस्त्वपूर्वकरणेऽबन्धको भूत्वा प्रतिपत्य पुनस्तान्येव बध्नतोऽवक्तव्यः, अथ-

वाऽऽयुषो यदा त्रिभागादौ बन्धः क्रियते तदा प्रथमसमयेऽवक्तव्यबन्धो, द्वितीयादिसमयेष्ववस्थितबन्धो । वेदनीयस्य त्ववस्थित एव, तदबन्धको ह्ययोग्येव[1] स्यात् तस्यां च प्रतिपाताभावात् ॥२५॥

## प्रकृतिबन्धः समाप्तः

**वीसऽयरकोडिकोडी नामे गोए य सत्तरी मोहे ।**
**तीसियर चउसु उदही निरयसुराउम्मि तित्तीसा ॥२६॥**
**मुत्तुं अकसायठिइं बार मुहुत्ता जहण्ण वेयणिए ।**
**अट्ठट्ठ नामगोएसु सेसएसुं मुहुत्तंतो ॥२७॥**

वीस० मुत्तुं० चतुर्षु = ज्ञान-दर्शनावरण - वेदनीयान्तरायेषु । उपशान्तादिभाविनामकषायिणां वेदनीयबन्धस्याऽत्यल्पत्वात् । नामगोत्रयोरष्टावष्टौ मुहूर्त्ताः । शेषेषु ज्ञानदर्शनावरणायुर्मोहान्तरायेष्वन्तर्मुहूर्तम् ॥२६॥२७॥

उत्तरप्रकृतीनामुत्कृष्टस्थितिमाह —

**विग्घावरणअसाए तीसं अट्ठार सुहुमविगलतिगे ।**
**पढमागिइसंघयणे दस दसुवरिमेसु दुगवुड्ढी ॥२८॥**

विग्घा० अन्तरायपञ्चकज्ञानावरणपञ्चकदर्शनावरणनवकासातवेदनीयलक्षणानां विंशतिप्रकृतीनां त्रिंशत्सागरोपमकोटीकोट्यः । [उपरितनेषु संहननेषु संस्थानेषु च द्विकद्विकवृद्धिः, यथा → न्यग्रोधऋषभनाराचयोर्द्वादश, सादिनाराचयोश्चतुर्दश, कुब्जार्द्धनाराचयोः षोडश, वामनकीलिकयोरष्टादशसागरोपमकोटीकोट्यः] ॥२८॥

**चालीस कसाएसुं मिउलहुनिद्धुण्हसुरहिसियमहुरे ।**
**दस दोसड्ढसमहिया ते हालिद्दंबिलाईणं ॥२९॥**

चालीस० 'दोसड्ढसमहिया ते' त्ति, ते=दश प्रत्येकं सार्द्धद्वयसहिता हारिद्रादिवर्णानामम्लादिरसानां च ज्ञेयः ॥२९॥

---

१ ०न्धको भूत्वाऽप्रतिपत्य ह्ययो० - हे० ।

**दस सुहविहगइउच्चे सुरदुग थिरछक्क पुरिसरइहासे ।**
**मिच्छे सत्तरि मणुदुग इत्थी साएसु पन्नरस ॥३०॥**

दस० शुभखगत्यादिहासान्तत्रयोदशके १०, मिथ्यात्वे सप्ततिः, नरद्विकस्त्रीसातेषु पञ्चदश ॥३०॥

**भय कुच्छ अरइसोए विउव्वितिरिउरलनरयदुग नीए ।**
**तेयपण अथिरछक्के तसचउ थावर इग पणिंदी ॥३१॥**

**नपु कुखगइ सासचऊ गुरुक्खडरुक्खसीय दुगंधे ।**
**वीसं कोडाकोडी एवइयाबाह वाससया ॥३२॥**

भय० नपु० 'तेयपण' त्ति 'तेअकम्मागुरुलहुनिमिणोवघाया' [गाथा-२], अस्थिरषट्कं = *'थावरसुहुम'* [क०वि० गाथा २७] गाथोक्तं, त्रसचतुष्कं *'तस बायर पज्जत्तं पत्तेअं'* [क०वि० गाथा २८] इति, 'सासचउ' = 'सासं उज्जोयायवपराघा' [गाथा-२] ॥३१॥३२॥

**गुरु कोडिकोडिअंतो तित्थाहाराण भिन्नमुहु बाहा ।**
**लहुठिइ संखगुणूणा नरतिरियाणाउ पल्लतिगं ॥३३॥**

गुरु० तीर्थकराहारकद्विकनाम्नोः सागरोपमान्तःकोटाकोटिरेव स्थितिरन्तर्मुहूर्तं चाबाधा, तदूना च कर्मस्थितिः । ननु तीर्थकरनामबद्धं सत् तृतीयभव एवोदयं याति, अत्र त्वबाधाऽन्तर्मुहूर्तमेवोक्ता ? तदयुक्तमभिप्रायाऽपरिज्ञानान्नहि वयमित्थमवधारयामो यदुताबाधापरिक्षयेऽवश्यं विपाकतः कर्माण्युदयमागच्छन्त्येव, एवं हि सति यदा कश्चिदिह मनुष्यादिर्देवगतिप्रायोग्याणि कर्माणि पूर्वं बध्वा ततः पुनरपि संक्लिष्टो भूत्वा वनस्पतिषूत्पन्नस्तत्रैवानन्तकालं तिष्ठति तदा तस्य तत्रापि विपाकतो देवगत्याद्युदयप्रसङ्गस्तस्मादित्थमवधारयितव्यम्, यदि कर्माणि विपाकत उदयमायान्ति तदाऽबाधाक्षय एव, न पुनरबाधाक्षये उदयमागच्छन्त्येव । अबाधाक्षये पुनर्विपाकोदययोग्यता स्यात्, तस्यां च यस्य यदाऽशेषोऽपि देशक्षेत्रादिसामग्रीयोगः[१] स्यात् तदा विपाकोदयो नान्यदेत्यवगन्तव्यम् । 'लहुठिइ संखगुणूण' त्ति दशादिहीनशतादिसंख्यावत्, आहारकवर्जितानामौदारिकादिसंघातनबन्धनानां स्थितिस्तच्छरीरतुल्या ज्ञेया ॥३३॥

---

१. ०षोऽपि द्रव्य क्षे० -पा० ।

**इगविगल पुव्वकोडिं पलियासंखंस आउचउ अमणा ।**
**निरुवक्कमाण छमासा अबाह सेसाण भवतंसो ॥३४॥**

इग० एकेन्द्रिय - विकलेन्द्रियाः पूर्वकोटिमात्रमेव परभवायुरुत्कृष्टं बध्नन्ति । पर्याप्तासंज्ञिपञ्चेन्द्रियाणां त्वायुश्चतुष्कविषयोऽप्युत्कृष्टः पल्योपमासंख्येयमात्रो बन्धः ॥३४॥

उत्तरप्रकृतीनां जघन्यस्थितिमाह —

**लहुठिइबंधो संजलणलोह पणविग्घनाणदंसेसु ।**
**भिन्नमुहुत्तं ते अट्ठ जसुच्चे बारस य साए ॥३५॥**

**दो इग मासो पक्खो संजलणतिगे पुमट्ठवरिसाणि ।**
**सेसाणुक्कोसाओ मिच्छत्तठिईइ जं लद्धं ॥३६॥**

लहु० दोइग० संज्वलनलोभान्तरायपञ्चकज्ञानावरणपञ्चकदर्शनावरणचतुष्करूपाणां पञ्चदशप्रकृतीनामन्तर्मुहूर्तं जघन्या स्थितिः । उच्चयशःकीर्त्योरष्टौ मुहूर्त्ताः । साते द्वादश मुहूर्त्ताः । संज्वलनक्रोधे द्वौ मासौ । संज्वलनमाने मासः १ । संज्वलमायायां पक्षः । पुंवेदे वर्षाण्यष्टौ । संज्वलनलोभादीनां सूक्ष्मसम्परायादौ स्वस्वबन्धव्यवच्छेदसमये[१] भिन्नमुहूर्तमानो जघन्यस्थितिबन्धस्तत्रैव तद्योग्यविशुद्धिसद्भावात् । शेषप्रकृतीनां स्वस्ववर्गोत्कृष्टस्थितेः सकाशान्मिथ्यात्वस्थित्या भागापहारे यल्लभ्यते तत्प्रमाणो[२] जघन्यस्थितिबन्धो ज्ञातव्यः, यथा नामकर्मणो विंशतिसागरोपममानोत्कृष्टस्थितिस्तस्याश्च मिथ्यात्वस्थित्या सप्ततिकोटाकोटीरूपया हरणे शून्याः शून्यैरपवर्त्तनाल्लब्धौ सागरोपमस्य द्वौ सप्तभागौ नाम्नः[३] शेषोत्तरप्रकृतीनां जघन्या स्थितिः, एवमन्यस्यापि कर्मणः शेषोत्तरप्रकृतीनां जघन्या स्थितिर्वाच्येति ॥३५॥३६॥

**अयमुक्कोसो गिंदिसु पलियासंखंसहीण लहुबंधो ।**
**कमसो पणवीसाए पन्नासयसहससंगुणिओ ॥३७॥**

---

१. ०दीनामनिवृत्तिबादरे सूक्ष्मे च स्वस्व०- पा० । २. तत्पल्योपमस्यासंख्येयभागहीनप्रमाणो- पा० । ३. ०पमद्वौ सप्तभागौ नाम्नः -ला० । ०पमद्वौसप्तभागौ पल्योपमस्यासंख्येयभागहीनौ नाम्नः -पा० ।

अय० अयमेव यः पूर्वं 'सेसाणुक्कोसाओ' [गाथा-३६] इत्यादिकरणेन यो जघन्यस्थितिबन्ध उक्तः स एवैकेन्द्रियाणामुत्कृष्ट, स एव पल्योपमासंख्येयभागन्यूनस्तेषां[१] जघन्यः । एकेन्द्रियोत्कृष्टस्थितिबन्धः पञ्चविंशत्या पञ्चाशता शतेन सहस्रेण च गुणितो द्वीन्द्रिय त्रीन्द्रिय-चतुरिन्द्रियाऽसंज्ञिपञ्चेन्द्रियाणां क्रमादुत्कृष्टः स्यात्, स्वस्वोत्कृष्ट एव पल्योपमसंख्येयभागन्यूनस्तेषां[२] जघन्यः ॥३७॥

**विगलि असन्निसु जिट्ठो कणिट्ठओ पल्लसंखभागूणो ।**
**सुरनरयाउ समादससहस्स सेसाउ खुड्डभवं ॥३८॥**

विगलि० शेषयोस्तिर्यङ्नरायुषोः क्षुल्लकभवो जघन्या स्थितिः ॥३८॥

**सव्वाण वि लहुबंधे भिन्नमुहु अबाह आउजिट्ठे वि ।**
**केइ सुराउसमं जिणमंतमुहू बिंति आहारं ॥३९॥**

सव्वा० सर्वासामपि विंशत्युत्तरशतप्रकृतीनां जघन्यस्थितिबन्धे जघन्यतोऽबाधाऽन्तर्मुहूर्तमेव, आयुषि ज्येष्ठेऽज्येष्ठेऽपि जघन्याऽबाधाऽन्तर्मुहूर्तं, बद्धमपीत्यमेतत्कर्माऽन्तर्मुहूर्तं यावद्विपाकोदयलक्षणां बाधां न करोतीत्यर्थः। एतेन तत्र चतुर्भङ्गी सूचिता, यथा ज्येष्ठमायुर्ज्येष्ठाऽबाधा इत्यादि। **केचित्तु** ब्रुवते—>जघन्या दशवर्षसहस्रमाना सुरायुःस्थितिः, तथा जिननाम्नोऽपि, आहारकद्वयस्य त्वन्तर्मुहूर्तमिति ॥३९॥

क्षुल्लकभवग्रहणमाह —

**सत्तरस समहिया किर इगाणुपाणुंमि हुंति खुड्डभवा ।**
**सगतीससयतिहुत्तर पाणू पुण इगमुहुत्तम्मि ॥४०॥**
**पणसट्ठिसहस्स पणसय छत्तीसा इगमुहुत्त खुड्डभवा ।**
**आवलियाणं दो सय छप्पन्ना एगखुड्डभवे ॥४१॥**

सत्त० पण० गाथे सुगमे । [नवरं ३७७३ एतत्संख्याकैः प्राणुभिः ६५५३६ एतावन्तः

१. ०पमसंख्येय० हे० । २. ०पमासंख्येय० हे० ।

क्षुल्लकभवाः प्राप्यन्ते तदा एकेन प्राणुना किं प्राप्यत इति त्रैराशिकेन लब्धं १७ भवाः, अंशाश्च १३९५/३७७३; २३७८ एतावन्तोऽशा यदि पुनर्भवेयुस्तदाऽष्टादशो भवः पूर्णः स्यात् परं न सन्त्यतः सामान्यत उक्तं सप्तदशभवा समधिका इति] ॥४०॥४१॥

उक्त उत्कृष्टस्थितिबन्धो वैक्रियषट्कवर्जो, जघन्यस्थितिबन्धश्च सर्वा [प्रकृतीराश्रित्य, सम्प्रत्येता एव] प्रकृतीराश्रित्योत्कृष्टस्थितिबन्धस्वामिन आह—

**अविरयसम्मो तित्थं आहारदुगामराउ य पमत्तो ।**
**मिच्छद्दिट्ठी बंधइ जिट्ठठिइं सेसपयडीणं ॥४२॥**

अवि० सामान्योक्तावप्यविरतसम्यग्दृष्टिर्बद्धजिननामा नरके बद्धायुस्तेन तत्र यियासुः क्षायोपशमिकसम्यक्त्वत्यागपूर्वकमेव तत्र गच्छतीति तत्त्यागाभिमुखोऽयमिति गृह्यते, तस्यैव तद्बन्धकेष्वतिसंक्लिष्टत्वात्, उत्कृष्टस्थितिबन्धस्योत्कृष्टसंक्लेशप्रत्ययत्वाच्च । आहारकद्विकस्योत्कृष्टस्थितिबन्धोऽप्रमत्तस्य प्रमत्तभावं प्रपित्सोस्तद्बन्धकेषु तस्यैव संक्लिष्टत्वात् । सुरायुषस्तु प्रमत्तोऽप्रमत्तभावाभिमुखस्तदुत्कृष्टस्थितबन्धस्य विशुद्धिजन्यत्वात्, तस्यैव तद्विशुद्धेः । शेष११६प्रकृतीनां मिथ्यादृष्टिः संज्ञी पर्याप्तः सर्वसंक्लिष्ट उत्कृष्टस्थितिबन्धकः ॥४२॥

सम्प्रत्ययमेव मिथ्यादृष्टिरुत्कृष्टस्थितिबन्धको गत्यादिद्वारेण चिन्त्यते—

**विगलसुहुमाउगतिगं तिरिमणुया सुरविउव्विनिरयदुगं ।**
**एगिंदिथावरायव आईसाणा सुरुक्कोसं ॥४३॥**

विगल० विकलत्रिकादिनरकद्विकान्तपञ्चदशप्रकृतीनां संज्ञिपर्याप्तमिथ्यादृष्टितिर्यङ्नरा एवोत्कृष्टस्थितिबन्धकाः, देवनारकाणां हि १३प्रकृतीनां बन्धसम्भव एव नास्ति, ये अपि नरतिर्यगायुषी ते बध्नन्ति ते अपि युगलिकसत्के एव उत्कृष्टस्थिती, न च तेषु तेषामुत्पादः । एकेन्द्रियजातिस्थावरातपोत्कृष्टस्थितिबन्ध ईशानावधिदेवानामुपरितनदेवानां नारकाणां चैकेन्द्रिययोग्यबन्धाभावात, तिर्यङ्नरास्तु तावति संक्लेशे नरकादियोग्यं बध्नीयुः ॥४३॥

**तिरिउरलदुगुज्जोयं छिवट्ठ सुरनिरय सेस चउगइया ।**
**आहारजिणमपुव्वोऽनियट्टि संजलण पुरिस लहुं ॥४४॥**

तिरि० तिर्यग्द्विकादिप्रकृतिषट्कस्य सुरा नारकाश्च तत्प्रायोग्यसंक्लेशभाज उत्कृष्टस्थिति-बन्धकाः, तिर्यग्नराणां तु तथासंक्लेशवतां नरकप्रायोग्यबन्धात्, शेष९२प्रकृतीनां चतुर्गतिका अपि मिथ्यादृशः । आहारकद्विकं जिननाम च क्षपकोऽपूर्वकरणो जघन्यस्थितिकं करोति, तस्यैव तद्बन्धकेष्वतिवि-शुद्धत्वात्, जघन्यस्थितेश्च विशुद्धिजन्यत्वाच्च, हेतुरयमन्यत्रापि भाव्यः । एवं सञ्ज्वलनानां पुंवेदस्य चानिवृत्तिबादरः ॥४४॥

**सायजसुच्चावरणा विग्घं सुहुमो विउव्विछ असन्नी ।**
**सन्नी वि आउबायरपज्जेगिंदि उ सेसाणं ॥४५॥**

साय० सातं यशःकीर्त्युच्चैर्गोत्रं आवरणनवकं विघ्नपञ्चकं च क्षपकसूक्ष्मसम्परायो जघन्यस्थितिकं बध्नाति । नरकद्विक - देवद्विक-वैक्रियद्विकलक्षणवैक्रियषट्कस्य त्वसंज्ञिपर्याप्ततिर्यग्पञ्चेन्द्रिया जघन्यस्थितिबन्धकाः, देवनारकाऽसंज्ञिमनुष्यैकेन्द्रियविकलेन्द्रियाणां वैक्रियषट्कवत्सु देवनारकेषूत्पादाभावा-देवैतद्बन्धो न घटते, संज्ञितिर्यग्नरास्तु संज्ञित्वादेवोत्कृष्टसंक्लेशा इति नैतज्जघन्यस्थितिबन्धकाः । आयुश्चतुष्कस्य जघन्यस्थितिबन्धका असंज्ञिनः संज्ञिनोऽपि च, क्षुल्लकभवमात्रस्य जघन्यायुर्बन्धस्योभये-षामपि सम्भवात् । शेषाणां भणितोद्धरितानां ८५प्रकृतीनां बादरपर्याप्त-एकेन्द्रियो जघन्यस्थितिबन्धकः, ततोऽन्यस्य तद्योग्यसंक्लेशहानेरभावात् ॥४५॥

**उक्कोसजहन्नेयर भंगा साई अणाइ धुव अधुवा ।**
**चउहा सग अजहन्नो सेसतिगे आउचउसु दुहा ॥४६॥**

उक्को० यतो नान्यो बृहत्तरः स उत्कृष्टः । ततः समयहानिमादौ कृत्वा यावज्जघन्यस्ता-वत्सर्वोऽप्यनुत्कृष्टः । यस्मादन्यो हीनतरबन्धो नास्ति स जघन्यः । ततः परं समयवृद्धिमादौ कृत्वा यावदुत्कृष्टस्तावत्सर्वोऽप्यजघन्यः ।'चउहा सग अजहन्नो'त्ति आयुर्वर्जमूलप्रकृतीनां सप्तानां सम्बन्धिन्यो याः स्थितयस्तासां यो जघन्यो बन्धः स साद्यादिचतुर्विकल्पोऽपि स्यात्, तथाह्येतासां प्रकृतीनां मध्ये मोहनीयस्य क्षपकानिवृत्तिबादरचरमस्थितिबन्धे जघन्यस्थितिबन्धः प्राप्यते, शेषप्रकृतिषट्कस्य तु क्षपकसूक्ष्म-सम्परायचरमस्थितिबन्धेऽसौ लभ्यते, ततोऽन्यः सर्वोऽप्युपशमश्रेणावप्यजघन्यो भवत्युपशमकस्यापि क्षपकाद् द्विगुणबन्धकत्वादजघन्यबन्धो भवतीति भावः । ततश्चोपशान्तमोहावस्थायामजघन्यबन्धस्याबन्धको भूत्वा यदा प्रतिपत्य पुनरपि प्रस्तुतकर्मसप्तकस्याजघन्यं बध्नाति तदाऽजघन्यः सादिरूपशान्तमोहाद्यवस्थां

चाप्राप्तपूर्वाणामनादिरभव्यानां ध्रुवो भव्यानामध्रुवः । तथा 'सेस तिगे' त्ति शेषत्रिके जघन्य-उत्कृष्टानुत्कृष्टरूपे[1] द्विधा→ सादिरध्रुवश्च, तथाहि→एतेषां कर्मणां मध्ये मोहस्य क्षपकानिवृत्तिबादर-चरमस्थितिबन्धे, शेषाणां तु क्षपकसूक्ष्मसम्परायचरमस्थितिबन्धे जघन्यो बन्धोऽनन्तरमेवोक्तः, स चाबद्धपूर्वोऽजघन्यबन्धादवतीर्य प्रथमतया तस्मिन्नेव समये बध्यत इति सादिः, ततः परं क्षीणमोहाद्यवस्थायां सर्वथा न स्यादित्यध्रुवः । उत्कृष्टस्तु त्रिंशत्सागरोपमकोटीकोट्यादिकः सर्वसंक्लिष्टमिथ्यादृष्टिपर्याप्तसंज्ञि-पञ्चेन्द्रिये लभ्यते । उत्कृष्टानुत्कृष्टेषु जीवाः परिभ्रमन्तीति द्वयोरप्यनादिध्रुवासम्भवः । 'आउ चउसु दुहत्ति' आयुष उत्कृष्टानुत्कृष्टजघन्याऽजघन्यरूपेषु चतुर्षु विकल्पेषु सादिरध्रुवश्चेति द्वौ भङ्गौ । तस्य हि भवत्रिभागादौ मुहूर्तमानं बन्धात् ततश्च तदुपरमाच्च ॥४६॥

**चउभेओ अजहन्नो संजलणावरणनवगविग्घाणं ।**
**सेसतिगि साइअधुवो तह चउहा सेसपयडीणं ॥४७॥**

चउ० सञ्ज्वलनचतुष्कज्ञानावरणपञ्चकदर्शनावरणचतुष्करूपावरणनवकान्तरायपञ्चकलक्ष-णानामष्टादशप्रकृतीनामजघन्यो बन्धः साद्यादिचतुर्विकल्पोऽपि पूर्ववद् भवति, तद्यथा→ एतद्बन्धव्यवच्छेदं कृत्वोपशान्तावस्थायां प्रतिपत्य[2] पुनरजघन्यं बध्नतः सादिस्तत्स्थानमप्राप्तपूर्वाणामनादिः, ध्रुवोऽभव्याना-मध्रुवो भव्यानां । शेषत्रिके जघन्योत्कृष्टानुत्कृष्टरूपे सादिरध्रुवश्चेति द्वौ भङ्गौ भवतः । अत्र भावना→मूल-प्रकृतिसप्तकोक्तानुसारेण ग्राह्या, केवलं स्वस्वबन्धव्यवच्छेदसमये तज्जघन्यबन्धस्य सादित्वं, तदुपरमेऽ-ध्रुवत्वम् । उत्कृष्टानुत्कृष्टेषु त्वारोहणावतरणे कुर्वतां सर्वजन्तूनां साद्यध्रुवत्वम् । 'तह चउहा सेसपयडीणं' ति । तथैव साद्यध्रुवरूपभङ्गद्वयं शेषप्रकृतीनां, भणितोद्धरितनिद्रापञ्चकमिथ्यात्वाद्यकषायद्वादशकभयजु-गुप्सातैजसकार्मणवर्णादिचतुष्काऽगुरुलघूपघातनिर्माणलक्षणानामेकोनत्रिंशत्प्रकृतीनामुत्कृष्टादिबन्धः सादि-रध्रुवश्च स्यात्, तथाहि→एतासां सर्वविशुद्धबादरपर्याप्तैकेन्द्रियो जघन्यं स्थितिबन्धं निर्वर्तयति, ततोऽन्तर्मु-हूर्तात्संक्लिष्टो भूत्वाऽजघन्यं करोति, ततस्तत्रैव भवान्तरे वा विशुद्धिमासाद्य पुनरपि जघन्यं स एव बध्नाति, एवं परावृत्त्य द्वावप्येतौ जघन्याजघन्यौ साद्यध्रुवौ भवतः । उत्कृष्टबन्धः पुनरेतासां सर्वसंक्लिष्टसंज्ञि-पञ्चेन्द्रियो निर्वर्तयति, अन्तर्मुहूर्ताच्च पुनरप्यनुत्कृष्टमित्यादि परावृत्त्य एतावपि साद्यध्रुवौ । शेषाणां त्वध्रुवबन्धिनीनां सातासातादित्रिसप्ततिप्रकृतीनां जघन्यादिस्थितिबन्धश्चतुर्विधोऽपि ध्रुवबन्धित्वादेव सादिरध्रुवश्चेति ॥४७॥

१- ०त्रिके उत्कृष्टानुत्कृष्टजघन्यरूपे- पा० ला० । २- ०यां ततः प्रति०- पा० ।

अथ गुणस्थानविशेषेण जीवविशेषेण च यत्र येन वा यावती स्थितिर्बध्यते तदाह—

**साणाइअपुव्वंते अयरंतोकोडिकोडीओ नऽहिगो ।**
**बंधो न हु हीणो न य मिच्छे भव्वियरसन्निम्मि ॥४८॥**

साणा० सास्वादनादावपूर्वकरणान्ते गुणस्थानवर्गेऽन्तराणां सागराणमन्तःकोटाकोटी=कोट्यन्तर्गतः किञ्चिदूनकोटाकोटीप्रमाण इत्यर्थः, आयुर्वर्जानां सप्तानामपि कर्मणां स्थितिबन्धो लभ्यते, न कदाचिदपि ततोऽधिकः, भिन्नग्रन्थिकानां जीवानां सास्वादनादिगुणस्थानप्राप्तेः, अनेन भिन्नग्रन्थिकानामपि सम्यक्त्वं मुक्त्वा मिथ्यात्वं गतानां त्रिंशदादिसागरोपमकोटाकोटीप्रमाणोऽपि स्थितिबन्धो लभ्यते, केवलमसौ तथाविधतीव्रानुभावयुक्तो न भवतीति सूचितम् । यत्तु *'बंधेण न वोलइ कयावि'* [ आ० नि० गाथा- ] इति *वचनादावश्यकादिषु* भिन्नग्रन्थिकस्य मिथ्यादृष्टेरप्युत्कृष्टः स्थितिबन्धः प्रतिषिध्यते *तत्सैद्धान्तिकमतमेव* ।

ननु सास्वादनादीनां सागरोपमान्तःकोटाकोटीतः समधिको बन्धो मा भूत् ततो हीनः पुनरसौ भवति वा नवेत्याह– 'न हु हीण त्ति' न हु=नैव हीनस्तस्याः सागरोपमान्तःकोटाकोट्या अधस्तादपि बन्धो न भवतीत्यर्थः । यत्तु सास्वादनगुणस्थानवर्तिनां क्वचित्कदाचिदेकेन्द्रियादीनां सागरोपमत्र्यादिसप्तभागरूपः स्थितिबन्धोऽभिधीयते स कदाचित्कत्वेन न विवक्षित इति सम्भाव्यते । अपूर्वकरणात्परतोऽनिवृत्तिबादरादौ सागरोपमकोटीकोटीतो हीनोऽपि स्थितिबन्धो भवतीति सामर्थ्याद् गम्यते । अथ किं सास्वादनादिष्वेवान्तःकोटीकोटीतो हीनः स्थितिबन्धो न लभ्यते आहोस्विन्मिथ्यादृष्टेरपि प्रतिविशिष्टस्य कस्य[चित्] जन्तोरेवमस्तीत्याह-डमरुकमणिन्यायेन हीनपदस्याग्रेतनपदेनापि सम्बन्धात् 'हीणो न य मिच्छे भव्वियरसन्निम्मि'त्ति न च नैव मिथ्यादृष्टौ भव्ये इतरस्मिन्नभव्ये च संज्ञिनि सागरोपमकोटाकोटीतो हीनः स्थितिबन्धो भवतीति, अधिकस्तु भवत्यपि, तत्र भव्ये तावद्भिन्नग्रन्थिकेऽपि संज्ञित्वेन सातिशयवीर्यत्वात् मिथ्यादृष्टित्वाच्च हीनोऽसौ न लभ्यते । अभव्ये त्वभिन्नग्रन्थित्वात् पूर्वोक्तहेतुद्वयाच्चेति । एतेन भव्यस्यानिवृत्तिबादरादौ वर्तमानस्याभव्यस्य त्वसंज्ञिनस्ततो हीनोऽपि स्यादित्यावेदितं भवति ॥४८॥

अथ स्थितिबन्धस्यैव स्वामिद्वारेणाल्पबहुत्वमाह —

जइलहुबंधो बायर पज्ज असंखगुण सुहुमपज्जऽहिगो ।
एसिं अपज्जाण लहू सुहुमेअरअपज्जपज्ज गुरू ॥४९॥

लहु बिय पज्जअपज्जे अपजेयर बिय गुरू हिगो एवं ।
ति चउ असन्निसु नवरं संखगुणो बियअमणपज्जे ॥५०॥

तो जइजिट्ठो बंधो संखगुणो देसविरय हस्सियरो ।
सम्मचउ सन्निचउरो ठिइबंधाणुकम संखगुणा ॥५१॥

जइ० लहु० तो० सर्वस्तोको जघन्यो यतेः स्थितिबन्धस्तस्य सूक्ष्मसम्परायभाविन आन्तर्मौहूर्त्तिकत्वात्, ततो बादरपर्याप्तस्य जघन्यस्थितिबन्धोऽसंख्येयगुणः, ततोऽपि सूक्ष्मपर्याप्तस्य जघन्यस्थितिबन्धो विशेषाधिकः, सूक्ष्मादप्येषां बादरसूक्ष्माणामपर्याप्तानां क्रमेण लघुबन्धौ विशेषाधिकौ, ततोऽपि सूक्ष्माणां बादराणां चापर्याप्तानां गुरुबन्धौ क्रमेण विशेषाधिकौ, ततोऽपि सूक्ष्माणां बादराणां च पर्याप्तानां गुरुबन्धौ विशेषाधिकौ, ततश्च द्वीन्द्रियस्य पर्याप्तस्य लघुबन्धः संख्येयगुण इत्यादिक्रमेण यावत्षट्त्रिंशत्तमस्थाने संज्ञिपञ्चेन्द्रियपर्याप्तस्य गुरुबन्धः संख्येयगुण इति गाथात्रिकस्यार्थोऽनया यन्त्रकस्थापनया ज्ञेयः →

| | |
|---|---|
| १. यतेर्जघन्यस्थितिबन्धः सर्वस्तोकः । | ११. द्वीन्द्रियापर्याप्तजघन्यस्थितिबन्धो विशेषाधिकः । |
| २. ततो बादरपर्याप्तजघन्यस्थितिबन्धोऽसंख्येयगुणः । | १२. द्वीन्द्रियापर्याप्तगुरुस्थितिबन्धो विशेषाधिकः । |
| ३. सूक्ष्मपर्याप्तजघन्यस्थितिबन्धो विशेषाधिकः । | १३. द्वीन्द्रियपर्याप्तगुरुस्थितिबन्धो विशेषाधिकः । |
| ४. बादरापर्याप्तजघन्यस्थितिबन्धो विशेषाधिकः । | १४. त्रीन्द्रियपर्याप्तजघन्यस्थितिबन्धो विशेषाधिकः । |
| ५. सूक्ष्मापर्याप्तजघन्यस्थितिबन्धो विशेषाधिकः । | १५. त्रीन्द्रियापर्याप्तजघन्यस्थितिबन्धो विशेषाधिकः । |
| ६. सूक्ष्मापर्याप्तगुरुस्थितिबन्धो विशेषाधिकः । | १६. त्रीन्द्रियापर्याप्तगुरुस्थितिबन्धो विशेषाधिकः । |
| ७. बादरापर्याप्तगुरुस्थितिबन्धो विशेषाधिकः । | १७. त्रीन्द्रियपर्याप्तगुरुस्थितिबन्धो विशेषाधिकः । |
| ८. सूक्ष्मपर्याप्तगुरुस्थितिबन्धो विशेषाधिकः । | १८. चतुरिन्द्रियपर्याप्तजघन्यस्थितिबन्धो विशेषाधिकः । |
| ९. बादरपर्याप्तगुरुस्थितिबन्धो विशेषाधिकः । | १९. चतुरिन्द्रियापर्याप्तजघन्यस्थितिबन्धो विशेषाधिकः । |
| १०. द्वीन्द्रियपर्याप्तजघन्यस्थितिबन्धः संख्येयगुणः । | २०. चतुरिन्द्रियापर्याप्तगुरुस्थितिबन्धो विशेषाधिकः । |

२१. चतुरिन्द्रियपर्याप्तगुरुस्थितिबन्धो विशेषाधिकः।
२२. असंज्ञिपञ्चेन्द्रियपर्याप्तजघन्यस्थितिबन्धः संख्येयगुणः।
२३. असंज्ञिपञ्चेन्द्रियापर्याप्तजघन्यस्थितिबन्धो विशेषाधिकः।
२४. असंज्ञिपञ्चेन्द्रियापर्याप्तगुरुस्थितिबन्धो विशेषाधिकः।
२५. असंज्ञिपञ्चेन्द्रियपर्याप्तगुरुस्थितिबन्धो विशेषाधिकः।
२६. यतेरुत्कृष्टः स्थितिबन्धः संख्येयगुणः।
२७. देशविरतलघुस्थितिबन्धः संख्येयगुणः।
२८. देशविरतगुरुस्थितिबन्धः संख्येयगुणः।
२९. अविरतपर्याप्तलघुस्थितिबन्धः संख्येयगुणः।
३०. अविरतापर्याप्तलघुस्थितिबन्धः संख्येयगुणः।
३१. अविरतापर्याप्तगुरुस्थितिबन्धः संख्येयगुणः।
३२. अविरतपर्याप्तगुरुस्थितिबन्धः संख्येयगुणः।
३३. संज्ञिपञ्चेन्द्रियापर्याप्तलघुस्थितिबन्धः संख्येयगुणः[१]।
३४. संज्ञिपञ्चेन्द्रियपर्याप्तलघुस्थितिबन्धः संख्येयगुणः[२]।
३५. संज्ञिपञ्चेन्द्रियापर्याप्तगुरुस्थितिबन्धः संख्येयगुणः।
३६. संज्ञिपञ्चेन्द्रियपर्याप्तगुरुस्थितिबन्धः संख्येयगुणः।

साम्प्रतं तस्या एव कर्मस्थितेः शुभाशुभप्ररूपणां प्रत्ययप्ररूपणागर्भामाह— -

**सव्वाण वि जिट्ठ ठिई असुभा जं साऽइसंकिलेसेणं।**
**इयरा विसोहिओ पुण मुत्तुं नरअमरतिरियाउं ॥५२॥**

सव्वा० सर्वासामपि शुभानामशुभानां च प्रकृतीनामुत्कृष्टा त्रिंशत्सागरोपमकोटाकोट्या-दिरूपा बध्यमाना स्थितिरशुभैव भवति यद् यस्मात्कारणात्सा तथाविधोत्कृष्टस्थितिरतिसंक्लेशेनात्यन्ततीव्र-कषायोदयेन जन्तुभिर्बध्यत इति शेषः । संक्लेशवृद्धौ हि सर्वशुभाशुभप्रकृतीनां स्थितयो वर्द्धन्ते, तदपचये च हीयन्ते, इत्यन्वयव्यतिरेकाभ्यां संक्लेशमेव तासामनुवर्तनादित्यशुभाः अशुभकारणनिष्पन्नत्वादशुभवृ-क्षादशुभफलवत् । यद्येवं तर्हि 'ठिइ अणुभागं कसायओ कुणइ' [गाथा-९१] इति वचनादनुभागोऽपि कषायजन्य एवेति सोऽपि शुभप्रकृतीनामप्यशुभः प्राप्नोति । अथ च शुभप्रकृतीनामसौ शुभ एवेष्यते इति ? नैवम्, अभिप्रायापरिज्ञानात्, सत्यपि कषायजन्यत्वेऽनुभागः कषायवृद्धावशुभप्रकृतीनामेव वर्धते, शुभानां परिहीयते एव, कषायमन्दतायां तु शुभप्रकृतीनामेव वर्धतेऽशुभानां तु हीयत इति नानुभागस्य सर्वथा कषायानुवर्तनम् । जघन्या किं प्रत्ययेत्याह-इतरा=जघन्या पुनः स्थितिर्बध्यते विशुद्ध्या कषायापच-यरूपया । अयमत्र भावार्थो→ ये ये किल विवक्षितमूलोत्तरप्रकृतीनां बन्धकास्तेषां मध्ये यो यः सर्वोत्कृष्टविशुद्धिमान् स स तत्तद्विवक्षितकर्मणो जघन्यां स्थितिं बध्नाति । किं सर्वत्राप्ययमेव न्यायो?

१- ०न्द्रियापर्याप्तगुरुल० -हे० । २- ०न्द्रियापर्या०- हे० ।

नेत्याह –'मुत्तुं नरअमरतिरियाउं'ति नरामरतिर्यगायूंषि मुक्त्वा, तेषां ह्युत्कृष्टाऽपि स्थितिः शुभैव, विशुद्धिलक्षणस्य तत्कारणस्य शुभत्वात् । यद्वा प्रस्तुतायुषां स्थितिवृद्धौ रसोऽपि वर्धते, स च कषायापचयरूपयापि शुद्ध्या जघन्यत्वेन शुभः, सुखजनकत्वादित्यतोऽप्यायुस्त्रयस्थितेरुत्कृष्टाया अपि शुभत्वमिति गाथार्थः ॥५२॥

अथ संक्लेशेन कषायोदयरूपेण स्थितयो बध्यन्त इत्युक्तम्, कषायाश्च योगसहचरिता एवेत्यतस्तं योगं सर्वजीवेष्वल्पबहुत्वद्वारेण चिन्तयन्नाह—

**सुहुमनिगोयाइखणप्पजोग बायरयविगलअमणमणा ।**
**अपज्ज लहु पढमदुगुरु पज हस्सियरो असंखगुणो ॥५३॥**

सुहु० इह० 'अपज्जलहु' त्ति पदस्य सर्वसम्बन्धात् सूक्ष्मनिगोदस्य लब्ध्यपर्याप्तस्य सर्वजघन्यवीर्यस्य आद्यक्षणे=प्रथमोत्पत्तिसमये यः सर्वजघन्यो योगः स सर्वस्तोकः, ततो बादरस्य तथैवाऽपर्याप्तादिविशेषणस्यादिक्षणभावी जघन्ययोगोऽसंख्येयगुणो, गुणकारश्चात्र सर्वत्रापि क्षेत्रपल्योपमा-संख्येयभागरूपः प्रत्येकं ग्राह्यः, एवं द्वित्रिचतुरिन्द्रियासंज्ञिसंज्ञिनामप्यपर्याप्तादिविशेषणविशिष्टानां प्रथमस-मयभावी जघन्ययोगः सर्वत्र यथोत्तरमसंख्येयगुणः । ततः 'पढमदुगुरु' त्ति प्रथमयोर्द्वयोः सूक्ष्मबादररूपयोरप-र्याप्तादिविशेषणविशिष्टयोरुत्कृष्टयोगोऽसंख्येयगुणोऽयमर्थः, लब्ध्यपर्याप्तसंज्ञिपञ्चेन्द्रियप्रथमक्षणभाविजघ-न्ययोगाल्लब्ध्यपर्याप्तसूक्ष्मनिगोदस्योत्कृष्टयोगोऽसंख्येयगुणस्ततोऽपि बादरस्योत्कृष्टयोगोऽसंख्येयगुणस्त-तोऽपि 'पज हस्सियर' त्ति पर्याप्तस्य सूक्ष्मनिगोदस्य जघन्ययोगोऽसङ्ख्येयगुणस्तस्मादपि पर्याप्तस्य बादरस्य जघन्ययोगोऽसंख्येयगुणस्ततोऽपि पर्याप्तस्य सूक्ष्मनिगोदस्योत्कृष्टोऽसंख्येयगुणस्तदनु च पर्याप्तबा- दरस्यो त्कृष्टोऽसंख्येयगुणः ॥५३॥

**असमत्ततसुक्कोसो पज्ज जहन्नियरु एव ठिइठाणा ।**
**अपजेयर संखगुणा परमपजबिए असंखगुणा ॥५४॥**

ततोऽपि अस० असमाप्तानां त्रसानां द्वित्रिचतुरसंज्ञिसंज्ञिनामुत्कृष्टयोगो यथोत्तरमसं-ख्येयगुणः । ततः 'पज्ज जहन्नियर'त्ति तेषामेव द्वि-त्रि-चतुरिन्द्रियासंज्ञिसंज्ञिनां पर्याप्तानां जघन्ययोगो यथोत्तरमसंख्येयगुणस्ततस्तेषामेव पर्याप्तानामुत्कृष्टयोगो यथोत्तरमसंख्येयगुणः । इह स्थापना→

| | |
|---|---|
| सूक्ष्म[निगोदा]ऽपर्याप्तजघन्ययोगः स्तोकः१ । | त्रीन्द्रियापर्याप्तोत्कृष्टयोगोऽसंख्येयगुणः १५ । |
| बादराऽपर्याप्तजघन्ययोगोऽसंख्येयगुणः २ । | चतुरिन्द्रियापर्याप्तोत्कृष्टयोगोऽसंख्येयगुणः १६ । |
| द्वीन्द्रियाऽपर्याप्तजघन्ययोगोऽसंख्येयगुणः ३ । | असंज्ञ्यपर्याप्तोत्कृष्टयोगोऽसंख्येयगुणः १७ । |
| त्रीन्द्रियाऽपर्याप्तजघन्ययोगोऽसंख्येयगुणः ४ । | संज्ञ्यपर्याप्तोत्कृष्टयोगोऽसंख्येयगुणः १८ । |
| चतुरिन्द्रियाऽपर्याप्तजघन्ययोगोऽसंख्येयगुणः ५ । | द्वीन्द्रियपर्याप्तजघन्ययोगोऽसंख्येयगुणः १९ । |
| असंज्ञ्यपर्याप्तजघन्ययोगोऽसंख्येयगुणः ६ । | त्रीन्द्रियपर्याप्तजघन्ययोगोऽसंख्येयगुणः २० । |
| संज्ञ्यपर्याप्तजघन्ययोगोऽसंख्येयगुणः ७ । | चतुरिन्द्रियपर्याप्तजघन्ययोगोऽसंख्येयगुणः २१ । |
| सूक्ष्मापर्याप्तोत्कृष्टयोगोऽसंख्येयगुणः ८ । | असंज्ञिपर्याप्तजघन्ययोगोऽसंख्येयगुणः २२ । |
| बादराऽपर्याप्तोत्कृष्टयोगोऽसंख्येयगुणः ९ । | संज्ञिपर्याप्तजघन्ययोगोऽसंख्येयगुणः २३ । |
| सूक्ष्मपर्याप्तजघन्ययोगोऽसंख्येयगुणः १० । | द्वीन्द्रियपर्याप्तोत्कृष्टयोगोऽसंख्येयगुणः २४ । |
| बादरपर्याप्तजघन्ययोगोऽसंख्येयगुणः ११ । | त्रीन्द्रियपर्याप्तोत्कृष्टयोगोऽसंख्येयगुणः २५ । |
| सूक्ष्मपर्याप्तोत्कृष्टयोगो संख्येयगुणः १२ । | चतुरिन्द्रियपर्याप्तोत्कृष्टयोगोऽसंख्येयगुणः २६ । |
| बादरपर्याप्तोत्कृष्टयोगोऽसंख्येयगुणः १३ । | असंज्ञिपर्याप्तोत्कृष्टयोगोऽसंख्येयगुणः २७ । |
| द्वीन्द्रियापर्याप्तोत्कृष्टयोगोऽसंख्येयगुणः १४ । | संज्ञिपर्याप्तोत्कृष्टयोगोऽसंख्येयगुणः २८ । |

'एव ठिइठाणा अपजेयर संखगुण' त्ति एवमेव प्ररूपणाप्रदर्शितसूक्ष्मबादरादिजीवक्रमेण तेषामेव स्थितिस्थानान्यपि जघन्यस्थितेरारभ्य समयादिवृद्ध्या सर्वोत्कृष्टनिजस्थितिपर्यवसाना ये स्थितिभेदास्तद्रूपाण्यपर्याप्तक्रमेण सूक्ष्मबादरादिजीवानुद्दिश्य यथोत्तरं संख्येयगुणानि वाच्यानि, तथाहि→ अपर्याप्तसूक्ष्मैकेन्द्रियस्य स्थितिस्थानानि सर्वस्तोकानि, ततोऽपर्याप्तबादरैकेन्द्रियस्य संख्येगुणानि, ततः पर्याप्तसूक्ष्मस्य, ततोऽपि पर्याप्तबादरस्य, ततोऽपर्याप्तद्वीन्द्रियस्य, [ततः पर्याप्तद्वीन्द्रियस्य], ततोऽपर्याप्तत्रीन्द्रियस्य, ततस्तस्यैव पर्याप्तस्य यावत् पर्याप्तसंज्ञिपञ्चेन्द्रियस्य संख्येयगुणानि । इह विशेषमाह- 'परमपज्जबिए असंखगुण' त्ति परं=केवलमियान् विशेषो यदुतापर्याप्तस्य द्वीन्द्रियस्य स्थितिस्थानान्यसंख्येयगुणानि, यत एकेन्द्रियाणां जघन्योत्कृष्टस्थित्यन्तरालवर्त्तीनि स्थितिस्थानानि पल्योपमासंख्येयभागसमयतुल्यानि, अपर्याप्तद्वीन्द्रियस्य तु तानि पल्योपमसंख्येयभागसमयराशिप्रमाणानीति । शेषस्थानेषु संख्येयगुणान्येवेति । स्थापना→

| | |
|---|---|
| १. सूक्ष्मापर्याप्तस्थितिस्थानानि स्तोकानि । | ८. त्रीन्द्रियपर्याप्तस्थितिस्थानानि संख्येयगुणानि । |
| २. बादरापर्याप्तस्थितिस्थानानि संख्येयगुणानि । | ९. चतुरिन्द्रियापर्याप्तस्थितिस्थानानि संख्येयगुणानि । |
| ३. सूक्ष्मपर्याप्तस्थितिस्थानानि संख्येयगुणानि । | १०. चतुरिन्द्रियापर्याप्तस्थितिस्थानानि संख्येयगुणानि । |
| ४. बादरपर्याप्तस्थितिस्थानानि संख्येयगुणानि । | ११. असंज्ञ्यपर्याप्तस्थितिस्थानानि संख्येयगुणानि । |
| ५. द्वीन्द्रियापर्याप्तस्थितिस्थानानि संख्येयगुणानि । | १२. असंज्ञिपर्याप्तस्थितिस्थानानि संख्येयगुणानि । |
| ६. द्वीन्द्रियपर्याप्तस्थितिस्थानानि संख्येयगुणानि । | १३. संज्ञ्यपर्याप्तस्थितिस्थानानि संख्येयगुणानि । |
| ७. त्रीन्द्रियापर्याप्तस्थितिस्थानानि संख्येयगुणानि । | १४. संज्ञिपर्याप्तस्थितिस्थानानि संख्येयगुणानि ॥५४॥ |

योगानुषङ्गेण स्थितिस्थानान्यभिधाय साम्प्रतं योगप्रक्रमे एवाऽपर्याप्ता जन्तवः प्रतिसमयं यावत्या योगवृद्ध्या वर्धन्ते तदाह—

**पइखणमसंखगुणविरिय अपज पइठिइमसंखलोगसमा ।**
**अज्झवसाया अहिया सत्तसु आउसु असंखगुणा ॥५५॥**

पइ० 'अपज' त्ति अपर्याप्ता जन्तवः प्रतिक्षणमसंख्येयगुणवीर्या असंख्यातगुणकारेण वर्धमानयोगशक्तयः, *'सव्वो वि अपज्जत्तो असंखगुणाए जोगवुड्ढीए वड्ढइ'* [ ] इति वचनात्, तथा[१] 'पइठिइमसंखलोगसमा' इत्यादि स्थितिं स्थितिं प्रति तद्बन्धाध्यवसाया असंख्येयलोकाकाशप्रदेश-प्रमाणा, एकैकस्याः स्थितेस्तैस्तैरध्यवसायैरनेकधा जन्यत्वात्, ते च सर्वप्रकृतीनां सर्वस्थितिषु न समानाः, किन्तु 'अहिया सत्तसु' त्ति आयुर्वर्जेषु सप्तसु कर्मसु प्रथमस्थितौ स्तोकाः, द्वितीयस्यां त एव विशेषाधिका इत्यादि, यथा ज्ञानावरणस्य जघन्यस्थितावसंख्येयलोकाकाशप्रदेशतुल्या अपि स्थितिबन्धाध्यवसायाः स्तोकाः, द्वितीयादिषु यथोत्तरं विशेषाधिका एवं शेषकर्मषट्केऽपि । 'आउसु असंखगुण' त्ति आयुषि पुनर्जघन्यस्थितावसंख्येयलोकाकाशप्रदेशप्रमाणा अप्यध्यवसायाः सर्वस्तोकाः, द्वितीयादिषु तु स्थितिषु यथोत्तरमसंख्येयगुणा ॥५५॥

## उत्कृष्टस्थितिबन्धः

अथ पञ्चेन्द्रियेषु मिथ्यात्वसास्वादनव्यवच्छिन्नबन्धानां ४१ प्रकृतीनां यावान् यथोत्कृष्टोऽ-

---

१- ०नात् तथा सूक्ष्मेभ्यः पर्याप्तेभ्यः सूक्ष्मा एवापर्याप्ताः संख्येयगुणहीनाः, बादरेभ्यः पर्याप्तेभ्यस्त एवापर्याप्ता असंख्येयगुणा, इतीहानुक्तमपि प्रस्ताववशादवगन्तव्यमन्यत्रोक्तत्वात्, तथाहि— 'संखगुणूणा सुहुमेसु बायरेसु अ असंखगुणा' तथा- हे० ।

बन्धकालस्तदाह —

**तिरिनरयतिजोयाणं नरभवजुय सचउपल्ल तेसट्ठं ।**
**थावरचउइगविगलायवेसु पणसीइसयमयरा ॥५६॥**

तिरि० तिर्यक्त्रिक-नरकत्रिकाद्योतलक्षणानां सप्तप्रकृतीनामुत्कृष्टोऽबन्धकालो नरभवयुतं सचतुःपल्यं त्रिषष्ट्यधिकं सागरशतं भवतीति, कथमिति चेदुच्यते - इह कश्चित् त्रिपल्यायुर्मिथुनो भवप्रत्ययादेवैताः प्रकृतीरबद्धा तद्भवान्त्यमुहूर्ते सम्यक्त्वं प्राप्य सौधर्मे पल्यस्थितिर्देव उत्पद्यते, तत्रापि सम्यक्त्वप्रत्ययादेता न बध्नाति, ततोऽप्रतिपतितसम्यक्त्वो नरो भूत्वा चारित्रेण नवमग्रैवेयकं गतः, प्रथममुहूर्तोर्ध्वं मिथ्यात्वं गच्छति, अग्रे वारद्वयं षट्षष्टिसागरमानस्योत्कृष्टसम्यक्त्वकालस्यान्यथाऽनुपपद्यमानत्वेन तस्येह मिथ्यात्वगमनं विधीयते, तत्र च ३१सागरोपमाणि यावन्मिथ्यादृगप्यसौ भवप्रत्ययादमूर्न बध्नाति । पुनस्तद्भवान्त्यमुहूर्ते सम्यक्त्वं प्राप्य नरो भूत्वा चारित्रेण वारद्वयं विजयादिगमनेन ६६ अतराणि प्रपूर्य नरेष्वागतः, *कार्मग्रन्थिकमतेन* सम्यक्त्वात् प्रच्युत्य मुहूर्तमेकं मिश्रभावं गत्वा पुनः प्राप्य(प्त)सम्यक्त्वो देश-सर्वविरतिभावाद् वारत्रयमच्युतगमनेन द्वितीयं ६६सागरमानं सम्यक्त्वकालं यदा पूरयति तदा क्वचिद् भवप्रत्ययात् क्वचित् सम्यक्त्वमिश्रप्रत्ययादेतत्प्रकृतिसप्तकस्योत्कृष्टोऽबन्धकालः संगच्छत इति । उक्तं च—

***'पलिआइं तिन्नि भोगावणिम्मि भवपच्चयं पलियमेगं सोहम्मे सम्मत्तेण नरभवे सव्वविरईए ॥१॥***
***मिच्छो भवपच्चयओ गेविज्जे सागराइं इगतीसं अंतमुहुत्तूणाइं सम्मत्तं तम्मि लहिऊणं ॥२॥***
***विरयनरभवंतरिओ अणुत्तरसुरो उ अयरछावट्ठी मिस्सं मुहुत्तमेगं फासियमणुओ पुणो विरओ ॥३॥***
***छावट्ठी अयराणं अच्चुए विरयनरभवंतरिओ तिरिनरयतिगुज्जोआण एसकालो अबंधम्मि' ॥४॥***

[ ]

एवं स्थावरचतुष्कैकेन्द्रियजातिविकलेन्द्रियजात्यातपानां प्रकृतीनां पञ्चेन्द्रियेषूत्कृष्टोऽब- न्धकालो नरभवयुतं सचतुःपल्यं १८५ अतराणाम् । नवरं कश्चित् षष्ठपृथिवीनारको द्वाविंशत्यतराणि यावद्भवप्रत्ययादेतत्प्रकृतिनवकमबध्वा तद्भवान्त्यमुहूर्ते लब्धसम्यक्त्वो नरागतौ देशविरत्या चतुःपल्य- स्थितिषु[1] देवेषु देवत्वमनुभूयाऽप्रतिपतितसम्यक्त्व एव नृषूत्पद्य सम्पूर्णसंयमानुभावात् प्रागुक्तक्रमेण नवमग्रैवेयकादिषूत्पद्य शेषं १६३अतरशतं यदा पूरयति तदैतत्प्रमाणमवगन्तव्यम् । यदुक्तम् -

---

१- ०क्त्वो मनुष्येषूत्पद्य देशविरतिभासाद्य चतुःप० -पा० ।

*'छट्ठीए नेरइओ भवपच्चयओ अ अयरबावीसं । देसविरओ उ भविउं पलियचउक्कं पढमकप्पे ॥१॥*
*पुव्वुत्तकालजोगो पंचासीअं सयं सचउपल्लं । आयवथावरचउविगलतियगएगिंदिअ अबंधो' ॥२॥*

[ ] ॥५६॥

**अपढमसंघयणागिइखगईअणमिच्छदुभगथीणतिगं ।**
**निय नपु इत्थि दुतीसं पणिंदिसु अबंधठिइ परमा ॥५७॥**

अपढम० अप्रथमसंहननाऽप्रथमसंस्थानपञ्चकाऽशुभखगत्यनन्तानुबन्धिचतुष्कमिथ्यात्व-दुर्भगत्रिक[स्त्यानर्द्धित्रिक]नीचैर्गोत्रनपुंसकवेदस्त्रीवेदरूपाणां २५प्रकृतीनां नरभवयुतं द्वात्रिंशदधिकं सागरशतमुत्कृष्टोऽबन्धकालः । तच्च पूर्वोक्तयुक्त्या वारद्वयं ६६सागरमानस्य सम्यक्त्वोत्कृष्टकालस्य पूरणेन वेदितव्यम् । तदुक्तम् -

*'पणवीसाइ अबंधो उक्कोसो होइ सम्मगुणजुत्तो । बत्तीसं सयमयराण हुंति अहिआ मणुस्सभवा'*

[ ] ॥५७॥

सम्प्रति पूर्वोक्तप्रकारेण ३२, ६३, ८५ अधिकसागरशतसंख्यापूरणोपायमाह —

**विजयाइसु गेविज्जे तमाइ दहिसय दुतीस तेसट्ठं ।**
**पणसीइ सययबंधो पल्लतिगं सुरविउव्विदुगे ॥५८॥**

विज० द्विर्विजयादिगमनेन त्रिरच्युतगमनेन च द्विः षट्षष्टिमानस्य सम्यक्त्वोत्कृष्टकालस्य पूरणेन द्वात्रिंशदधिकमतरशतमुक्तयुक्त्या पूर्यते, तथा 'गेविज्जे' इति उक्तयुक्तितयैव वारमेकं नवमग्रैवेयके वारद्वयं विजयादिषु वारत्रयमच्युते च तदीयोत्कृष्टायुरनुभवनेन त्रिषष्टयधिकाब्धिशतं भवतीति । 'तमाइ' त्ति तमःपृथिव्यां नवमग्रैवेयके विजयादावच्युते च यथोक्तक्रमेण गत्वा तदायुरुत्कृष्टमनुभवनः पञ्चाशीत्यधिक-सागरशतं सम्भवतीति । सर्वत्र चान्तरालभाविनरभवाधिकत्वमुक्तन्यायेन स्वत एव वाच्यमिति । इत्युक्त एकचत्वारिंशत्प्रकृतीनामुत्कृष्टोऽबन्धकालः । सम्प्रति ७३संख्यानामध्रुवबन्धिनीनामुत्कृष्टं जघन्यं च सतत-बन्धकालमाह - तत्र 'सययबंधो पल्लतिगं सुरविउव्विदुगे' इति सततं सातत्येन बन्धो भवति, किं प्रमाणः क्वेत्याह - 'पल्लतिगं' पल्यत्रिकं सुरद्विके देवगति-देवानुपूर्वीलक्षणे 'विउव्विदुगे' वैक्रियतदङ्गोपाङ्ग-लक्षणवैक्रियद्विके च भवतीति शेषः । एतच्च त्रिपल्योपमायुषो मिथुनस्य प्रथमसमयात्प्रभृतिप्रत्ययात् सुरद्विकादिप्रकृतिचतुष्टयं बध्नतो वेदितव्यम्, अन्यस्यैतावत्कालं बन्धासम्भवात्, जघन्यतस्तु समयं,

रावर्तमानत्वादासामिति । एवमुत्तरत्रापि जघन्यतः सर्वत्र समयं सततं बन्धस्तदुत्तरकालं सप्रतिपक्षत्वेन तद्विपक्षस्य बन्धस्य सम्भवात् ॥५८॥

**समयादसंखकालं तिरिदुगनीएसु आउ अंतमुहू ।**
**उरलि असंखपरट्टा सायठिई पुव्वकोडूणा ॥५९॥**

समया० जघन्यपदभाविसमयमेकमवधीकृत्योत्कर्षतोऽसंख्येयलोकाकाशप्रदेशप्रमाणसमराशिरूपमसंख्येयं कालं तिर्यग्द्विकनीचैर्गोत्रयोः सततबन्धः, *'अत्थि अणंता जीवा'* [बृ० सं० गाथा २७७] इत्यादिवचनादनन्तकायकायस्थितेरनन्तत्वेऽपि प्रस्तुतप्रकृतीनां सविपक्षत्वेनैतत्प्रतिपक्षयोर्नरद्विकोच्चैर्गोत्रयोरपि बन्धसम्भवादनन्तं कालं तत्सततबन्धो न घटते, असंख्येयं तु तेजोवाय्वपेक्षया, ते ह्यतिसंक्लिष्टत्वेनोत्कृष्टस्वकायस्थितिमानं कालं यावत्तिर्यग्द्विकनीचैर्गोत्रे एव बध्नन्ति, न तु तद्विपक्षे नरद्विकोच्चैर्गोत्रे । आयुश्चतुष्कस्य तु जघन्यतोऽप्युत्कर्षतोऽप्यन्तर्मुहूर्त्तमेव सततबन्धस्ततस्तद्बन्धोपरमात् । तथा 'उरले' औदारिकशरीरेऽसंख्येयान् पुद्गलपरावर्त्तान् यावदुत्कर्षतोऽबन्धकालो, यतो व्यावहारिकसत्त्वा अप्यौदारिकशरीरिणो वायुवर्जमपि पृथिव्यादिस्थावरकायमुपगताः कालस्थित्येयन्तं कालं तिष्ठन्ति, न च तत्र वैक्रियाहारकयोरौदारिकविपक्षयोर्बन्धोऽस्ति इति । सातस्य तु सततबन्धरूपोत्कृष्टा स्थितिः, 'पुव्वकोडूण' त्ति केवलिनां नववर्षोना पूर्वकोटिस्ते हि पूर्वकोट्यायुषः सन्तो जन्मतो नववर्षातिक्रमे समुत्पन्नकेवला जन्मान्तं यावत्सातमेव केवलं बध्नन्तीति ॥५९॥

**जलहिसयं पणसीयं परघुस्सासे पणिंदि तसचउगे ।**
**बत्तीसं सुहविहगइपुमसुभगतिगुच्चचउरंसे ॥६०॥**

जल० पञ्चाशीत्यधिकं सागरशतं पराघातोच्छ्वासपञ्चेन्द्रियजातित्रसचतुष्कविषये सातत्येनोत्कृष्टबन्धकालः, इह च सामान्याभिधानेऽपि सचतुःपल्यं नरभवाधिकमिति विशेषो द्रष्टव्यो, यतो यावानेतद्विपक्षभूतानामेकेन्द्रियविकलेन्द्रियजातिस्थावरचतुष्काणां प्रागबन्धकाल उक्तस्तावानेवासां बन्धकाल इति, ***पञ्चसंग्रहादौ*** तु यदिह चतुःपल्याद्यधिकत्वं कुतोऽपि कारणान्नोक्तं तन्न विद्मः, एतद्भावना तु 'थावरचउइगविगलायवेसु' [गाथा-५६] इत्यादिव्याख्यायामिव कार्या । तथा सुखगतिपुंवेदसुभगत्रिकोच्चैर्गोत्रसमचतुरस्रविषयो ज्येष्ठः सततबन्धः सचतुःपल्यादिविशेषणं द्वात्रिंशदधिकं सागरशतम्, अत्रापि 'अपढमसंघयणागिइ' [गाथा-५७] इत्यादिगाथाव्याख्यानावसर इव भावना कार्या ॥६०॥

**असुखगइजाइआगिइसंघयणाहारनरयजोयदुगं ।**
**थिरसुभजसथावरदसनपुइत्थीदुजुयलमसायं ॥६१॥**

असु० इह 'असु' त्ति असुशब्दस्य सर्वत्र सम्बन्धादशुभा खगतिर्जातयोऽशुभा एकेन्द्रियाद्याश्चतुरिन्द्रियपर्यवसानाः, अशुभा आकृतयो न्यग्रोधपरिमण्डलादिरूपाः पञ्चाशुभसंहननादीनि ऋषभनाराचादीनि पञ्च, नरकद्विकमाहारकद्विकं च प्रतीतम्, उद्योतद्विकमुद्योतातपरूपं, स्थिरं, शुभं, यशश्च, स्थावरदशकं, नपुंसकवेदः, स्त्रीवेदो, द्वियुगलं=हास्यरत्यरतिशोकरूपमसातं चैता एकचत्वारिंशत्प्रकृतिर्जघन्यत उत्कर्षतश्च सातत्येन कियत्कालं बध्यन्त इत्याह ॥६१॥

**समयादंतमुहुत्तं मणुदुगजिणवइरउरलवंगेसु ।**
**तित्तीसयरा परमो अंतमुहु लहू वि आउजिणे ॥६२॥**

सम० जघन्यतः समयमेकं बध्यन्ते, तदुत्तरकालमासां परावर्त्तमानत्वेन तद्विपक्षस्य बन्धसम्भवात् । उत्कर्षतस्त्वन्तर्मुहूर्त्तम्, तदनु आसामध्रुवबन्धित्वेनावश्यं परावृत्तिसद्भावात् । तथा नरद्विकजिननामकर्मवज्रर्षभनाराचसंहननौदारिकाङ्गोपाङ्गलक्षणप्रकृतिपञ्चकविषयः प्रकृष्टो बन्धकालस्त्रयस्त्रिंशत्सागरोपमायुषामनुत्तरदेवानामुपपातसमयाद् भवान्तं यावज्जिननामसहितं नरप्रायोग्यं बध्नतामेतावान् बन्धकालो वेदितव्यः । तथाऽऽयुश्चतुष्के जिनकर्मणि च लघुरप्यन्तर्मुहूर्तम्, तत्रायुर्बन्धस्यान्तर्मौहूर्तिकत्वात् । जिनस्य तु यदोपशमश्रेणिमारूढोऽनिवृत्तिबादरादिगुणत्रये वर्तमानस्तदबन्धको भूत्वा प्रतिपतितो भूयस्तद्बन्धमन्तर्मुहूर्तं कृत्वा, *'एगभवे दुखुत्तो चरित्तमोहं उवसमेइ'* [ ] इति वचनात्, पुनरुपशमश्रेणीं प्रतिपन्नो यदा तस्याबन्धको भवति तदा जघन्यतोऽन्तर्मुहूर्त्तं बन्धकालो लभ्यते ॥६२॥

उक्तः स्थितिबन्धः, सम्प्रति अनुभागबन्धमाह—

**तिव्वो असुहसुहाणं संकेसविसोहिओ विवज्जयओ ।**
**मंदरसो गिरिमहिरयजलरेहासरिसकसाएहिं ॥६३॥**

**चउठाणाई असुहा सुहन्नहा विग्घदेसघाइ आवरणा ।**
**पुमसंजलणिगदुतिचउठाणरसा सेस दुगमाई ॥६४॥**

तिव्वो० चउ० तत्र पूर्वमनुभागस्य स्वरूपमुच्यते । इह हि रागादिसचिवो जन्तुः पृथक् सिद्धानामनन्तभागवर्त्तिभिरभव्येभ्योऽनन्तगुणैः परमाणुभिर्निष्पन्नान् कर्मस्कन्धान् प्रतिसमयं गृह्णाति, तत्र च प्रतिपरमाणु कषायविशेषान् सर्वजीवानन्तगुणाननुभागस्याविभागपलिच्छेदान् करोति, तत्र समानरसांशानां परमाणूनामेका वर्गणा[1], एकेन रसांशेनाधिकानां द्वितीया वर्गणेत्यादि वर्गणास्पर्धकक्रमः । अयं गाथार्थः—> अशुभानां प्रकृतीनां संक्लेशतस्तीव्रो रसो बध्यते, शुभानां तु विशुद्धितः । मन्दरसो विपर्ययतो, यथाऽशुभानां मन्दरसो विशुद्धितः, शुभानां तु सक्लेशतः । पर्वतराजिसमकोपश्चतुःस्थानिकं रसं बध्नाति, पृथिवीराजिसमकोपस्तु त्रिस्थानिकम्, रेणुजलराजिसमकोपस्तु द्विस्थानिकं रसं बध्नाति ॥६३॥६४॥

**निंबुच्छुरसो सहजो दुतिचउभागकढिइक्कभागंतो ।**
**इगठाणाई असुहो असुहाण सुहो सुहाणं तु ॥६५॥**

निम्बु० यथाहि निम्बाद्यशुभवनस्पतीनां सम्बन्धी सहजोऽक्वथितः कटुको रस एकस्थानिक उच्यते, स एव क्वथितोऽर्धावर्तितः कटुतरो द्विस्थानिकः, स एव भागद्वये आवर्तिते तृतीये भागे त्ववशेषे कटुकतमस्त्रिस्थानिकः, स एव भागत्रये आवर्त्तिते चतुर्थे त्ववशेषेऽतिशयकटुतमश्चतुःस्थानिकोऽभिधीयते । अत्र चैकस्थानिकादिरसो जललवबिन्दुचुलुकार्धप्रसृत्यञ्जलिकरकुम्भद्रोणादिसम्बन्धान्मन्दमन्दतरादिबहुभेदत्वं प्रतिपद्यते । तथैवाशुभप्रकृतीनां रसस्यैकस्थानिकादित्वमवगन्तव्यम् । शुभप्रकृतिरसस्तु इक्ष्वादिदृष्टान्तादेवं भावनीयः । परमशुभप्रकृतीनां सम्बन्धी रसोऽशुभः, शुभप्रकृतीनां तु शुभः ॥६५॥

तीव्रानुभागबन्धस्वामिन आह—

**तिव्वमिगथावरायवसुरमिच्छा विगलसुहुमनरयतिगं ।**
**तिरिमणुयाउ तिरिनरा तिरिदुगछेवट्ठ सुरनिरया ॥६६॥**

तिव्व० मिथ्यादृग्देवाः सर्वसंक्लिष्टा एकेन्द्रियजाति-स्थावरनाम्नी तीव्ररसे बध्नन्ति, तयोरशुभत्वात् । आतपं तु शुभत्वेन ते तत्प्रायोग्यविशुद्धा बध्नन्ति । विकलाद्येकादशप्रकृतीस्तिर्यग्नरा उत्कृष्टसंक्लेशेन विकलादिनवप्रकृतीस्तीव्ररसा एकं द्वौ वा समयौ यावत् तिर्यग्नरा बध्नन्ति, तत्परतस्तथावि-

---

१- ०मेकानामेका व० -हे० ।

धसंक्लेशाभावात् । तिर्यग्नरायुषी तु शुभत्वाद् विशुद्धया देवनारकयोरेतदायुर्द्वयबन्ध(धा)योग्यत्वात्, केवलं तेऽसंख्येयवर्षायुःसम्बन्धिनी एव तीव्ररसे स्याताम्, देवनारकाणां युगलिभूत्वादाभावात् । तिर्यग्द्विकं सेवार्तं च सुरनरयाः संक्लेशेन । सामान्योक्तावपि सेवार्तं सनत्कुमारादय एव देवास्तथाविधं बध्नन्ति, अर्वाक्तनानां संक्लिष्टानामेकेन्द्रियेष्वेवोत्पादात् तत्र च सेवार्ताऽसम्भवः ॥६६॥

**विउव्विसुराहारदुगं सुखगइवन्नचउतेयजिणसायं ।**
**समचउपरघातसदसपणिंदिसासुच्च खवगाउ ॥६७॥**

विउ० वर्णचतुष्कं शुभं, तैजसचतुष्कं 'तेअकम्माऽगुरुलहुनिमिण' [गाथा-२] इत्यादि-त्रिंशत्प्रकृतीनां शुभत्वेन क्षपकाऽपूर्वसूक्ष्मौ, तद्बन्धकेषु तयोरेवातिविशुद्धत्वात् तीव्ररसं बध्नीतः ॥६७॥

**तमतमगा उज्जोयं सम्मसुरा मणुयउरलदुगवइरं ।**
**अपमत्तो अमराउं चउगइमिच्छा उ सेसाणं ॥६८॥**

तम० सप्तमपृथिवीनारका औपशमिकसम्यक्त्वाभिमुखा मिथ्यात्ववेदनचरमसमये तीव्ररसं बध्नन्त्युद्योतम्, अस्य शुभत्वेन तेषामेव तदानीं तद्बन्धयोग्यविशुद्धिसम्भव इति । मनुष्यद्विकादिप्रकृतिपञ्च-कतीव्ररसबन्धः सम्यग्दृष्टिदेवानामेव, तिर्यग्नराणां तथाविधानां देवद्विकादिबन्धात्, नारकास्तु तद्बन्धयोग्या अपि वेदनाविह्वलत्वेनाऽर्हदादिदर्शनायोग्यत्वेन सम्यग्दृशोऽपि न तथाविधशुद्धिभाजः । 'अपमत्तो अमराउं' सर्वेषामपि देवायुर्बन्धकानामस्यैवातिशुद्धत्वात् शेषाणां ६८ प्रकृतीनामशुभानां च चतुर्गतिका मिथ्यादृष्टयोऽ-प्यतिसंक्लिष्टास्तीव्ररसं बध्नन्ति ॥६८॥

जघन्यरसबन्धमाह —

**थीणतिगं अणमिच्छं मंदरसं संजमुम्मुहो मिच्छो ।**
**बियतियकसाय अविरय देस पमत्तो अरइसोए ॥६९॥**

थीण० स्त्यानर्द्धित्रिकानन्तानुबन्धिचतुष्टयमिथ्यात्वरूपाणामष्टानां चरमसमये मिथ्या-दृष्टिः 'संजमुम्मुह' त्ति अनन्तरसमये सम्यक्त्वं संयमं च युगपत् प्रतिपित्सुर्जघन्यरसं बध्नाति, अस्यातिविशु-द्धत्वात् । अप्रत्याख्यानावरणकषायाणां त्वविरतो देशविरतिं प्रपित्सुः । प्रत्याख्यानावरणचतुष्टयस्य तु देशविरतः प्रमत्तभावं जिगमिषुः । प्रमत्तस्त्वप्रमत्ताभिमुखोऽरतिशोकयोर्मन्दरसं बध्नाति ॥६९॥

**अपमाइ हारगदुगं दुनिद्दअसुवन्नहासरइकुच्छा ।**
**भयमुवघायमपुव्वो अनियट्टी पुरिससंजलणे ॥७०॥**

अप० अप्रमत्तः प्रमत्ताभिमुख आहारकद्विकमस्य शुभत्वेन तन्मन्दरसस्य संक्लेशबध्यत्वात्, अस्य प्रमत्ताभिमुखस्यैवासौ संक्लेशो लभ्यते । निद्राद्विकादीनामशुभत्वात् तज्जघन्यरसस्यातिविशुद्धिजन्यत्वात्, क्षपकाऽपूर्वस्यैव तद्विशुद्धिः । पुरुषवेदसञ्ज्वलनचतुष्करूपस्य प्रकृतिपञ्चकस्य स्वस्वबन्धव्यवच्छेदसमये क्षपकोऽनिवृत्तिबादरो मन्दरसं बध्नाति ॥७०॥

**विग्घावरणे सुहुमो मणुतिरिया सुहुमविगलतिगआऊ ।**
**वेउव्विछक्कममरा निरया उज्जोयउरलदुगं ॥७१॥**

विग्घा० विघ्नादिचतुर्दशप्रकृतीनां तद्बन्धकेषु क्षपकसूक्ष्मस्यैव जघन्यरसबन्धयोग्यविशुद्धिकत्वम् । विकलत्रिकादिषोडशप्रकृतीनां तिर्यग्नरा एव जघन्यरसबन्धकाः, तिर्यग्नरायुर्वर्जशेष१४प्रकृतीनां देवनारका भवप्रत्ययाद् बन्धका न भवन्ति, तिर्यग्नरायुषी अपि जघन्यस्थितिके एव जघन्यरसे बध्येते, जघन्यस्थितिकतिर्यग्नरेषु देवनारका नोत्पद्यन्त एवेति तिर्यग्नरा एव इत्युक्तम् । औदारिकद्विकमुद्द्योतं च शुभप्रकृतित्वेन संक्लेशेनैव जघन्यरसं बध्यते, तद्योग्यसंक्लेशो देवनारकाणामेव, तिर्यग्नराणां तु तावति संक्लेशे वर्तमानानां नरकगतियोग्यबन्धकत्वात् ।[१] ॥७१॥

**तिरिदुगनिअं तमतमा जिणमविरय निरय विणिगथावरयं ।**
**आसुहुमायव सम्मो व सायथिरसुभजसा सिअरा ॥७२॥**

तिरि० तिर्यग्द्विकम्, नीचैर्गोत्रं चौपशमिकसम्यक्त्वा[भिमुखा] मिथ्यात्ववेदनचरमसमये वर्तमाना जघन्यरसं बध्नन्ति, तदैव तेषां तद्बन्धयोग्यत्वात्, अन्यदा त्वयं तावत्या विशुद्ध्योच्चैर्गोत्रनरद्विकाद्यपि बध्नीयात्, अयं चाल्पेऽपि मिथ्यात्वे तिर्यग्गतिप्रायोग्यस्यैव बन्धक इति । अविरतो नरकबद्धायुस्तत्र च जिगमिषुः सम्यक्त्ववमनाभिमुखस्तीर्थं मन्दरसं बध्नाति, तद्बन्धकेषु तस्यैवातिसंक्लिष्टत्वात् । नारकान् विना गतित्रयवर्तिन एकेन्द्रियजातिस्थावरनाम्नोर्मन्दरसबन्धकाः, नारकाणामेकेन्द्रियादावनुत्पत्तेः, शेषगतित्रयवर्तिनः परावर्त्तमानमध्यमपरिणामास्तस्य तथाविधस्य बन्धकाः, अतिसंक्लिष्टानां तदुत्कृष्टानुभागबन्ध-

१-०संक्लेशे वर्तमानानां तिर्यग्गतियोग्यबन्धकत्वात्-पा० ।

कत्वात्, अतिविशुद्धानां पुनरिदमुल्लङ्घ्य पञ्चेन्द्रियजातित्रसनाम्नोर्बन्धकत्वादिति मध्यमग्रहणम् । 'आ-सुहुमायव'त्ति आसौधर्मैशानदेवानामतिसंक्लिष्टानामातपस्य जघन्यरसबन्धः । सम्यग्दृष्टिर्मिथ्यात्वी वा सातादिसेतराष्टप्रकृतीनां जघन्यरसबन्धकः, अत्र च संक्लिष्टस्तु सातादीनां, विशुद्धस्त्वसातादीनामिति ॥७२॥

**तसवन्नतेयचउमणुखगइदुगपणिंदिसासपरघुच्चं ।**
**संघयणागिइनपुत्थीसुभगियरति मिच्छ चउगइगा ॥७३॥**

तस० *'तसबायरपज्जत्तं पत्तेअ'* ४ [क०वि०गा०-२६] शुभवर्णादि ४, 'तेअकम्मागु-रुलहुनिमिणं' ४ [गाथा-२], नरद्विकशुभाशुभविहायोगति २, संहनन ६, आकृति ६, सुभगत्रिक-दुर्भगत्रिक ३ सा(आ)दि ४० प्रकृतीनां मिथ्यादृष्टयश्चतुर्गतिका अपि परावर्त्तमानमध्यमपरिणामा मन्दरसबन्धका इति सामान्योक्तावप्ययं विशेषः→मनुष्यद्विक-संस्थानषट्क-संहननषट्क-खगतिद्विक-सुभग-दुर्भग-दुःस्वर-सुस्वरादेयानादेयोच्चैर्गोत्रलक्षणास्त्रयोविंशतिप्रकृतीः परावृत्त्य परावृत्त्य बध्नन्तश्चतुर्गतिका अपि मिथ्यादृष्टयो मध्यमपरिणामा जघन्यरसाः कुर्वन्ति, सम्यग्दृष्टीनां ह्येतासां परावृत्तिर्नास्ति, तथाहि→तिर्यग्मनुष्यास्तावत्सम्यग्दृष्टयो देवद्विकमेव बध्नन्ति, न मनुष्यादिद्विकानि, संस्थानेषु तु समचतुरस्रमेव, संहननं तु किञ्चिदपि न बध्नन्ति, शुभविहायोगत्यादीनेव बध्नन्ति, न प्रतिपक्षान्, देवनारका अपि सम्यग्दृष्टयो नरद्विकमेव, संस्थानेषु तु समचतुरस्रमेव, संहननेषु वज्रर्षभनाराचमेव, विहायोगत्यादिकाः शुभा एव, न प्रतिपक्षभूता बध्नन्ति । तथा[1] पञ्चेन्द्रियजातितैजसकार्मणप्रशस्तवर्णादिचतुष्कागुरुलघुपराघातोच्छ्वासत्रस-बादरपर्याप्तप्रत्येकनिर्माणरूपपञ्चदशप्रकृतीनां चतुर्गतिका अपि जीवा मिथ्यादृशः सर्वोत्कृष्टसंक्लेशा जघन्यानुभागं कुर्वन्ति । तत्र तिर्यमनुष्याः सर्वोत्कृष्टसंक्लेशे वर्तमाना नरकगतिसहचरिता एता बध्नन्तो जघन्यरसाः कुर्वन्ति । नारका देवाश्चेशानादुपरिवर्तिनः सनत्कुमारादयः सर्वसंक्लिष्टाः पञ्चेन्द्रिय-तिर्यक्प्रायोग्या एता बध्नन्तो मन्दरसाः कुर्वन्ति, ईशानान्तास्तु देवाः सर्वसंक्लिष्टाः पञ्चेन्द्रियजातित्रसवर्जाः शेषास्त्रयोदशप्रकृतीरेकेन्द्रियप्रायोग्यां बध्नन्तो जघन्यरसाः कुर्वन्ति, पञ्चेन्द्रियजातित्रसनाम्नी तु विशुद्धा अमी बध्नन्ति इति जघन्यरसो न लभ्यते इति तद्वर्जनम् । तथा स्त्रीनपुंसकवेदलक्षणे द्वे प्रकृती चतुर्गतिका अपि मिथ्यादृष्टयो जीवा अशुभत्वादनयोस्तत्प्रायोग्यविशुद्ध्या जघन्यरसे बध्नन्ति । अतिविशुद्धः पुरुषवेदबन्धकः स्यात् ॥७३॥

१. ०न्ति तत्र तिर्यग्मनुष्याः सर्वोत्कृष्टसंक्लेशे तत्र-हे० ।

अथ अस्मिन् साद्यादिप्ररूपणामाह —

**चउतेयवन्न वेयणियनामणुक्कोसु सेसधुवबंधी ।**
**घाईणं अजहन्नो गोए दुविहो इमो चउहा ॥७४॥**

**सेसम्मि दुहा**

चउ० तैजसकार्मणागुरुलघुनिर्माणप्रशस्तवर्ण-गन्ध-रस-स्पर्शलक्षणानामष्टप्रकृतीनामनुत्कृष्टोऽनुभागबन्धः साद्यादिचतुर्विकल्पोऽपि ज्ञेयः । तथाहि—एतासामुत्कृष्टमनुभागबन्धं क्षपकाऽपूर्वकरणो देवगतिप्रायोग्याणां त्रिंशत्प्रकृतीनां बन्धव्यवच्छेदसमये करोति, एतस्मात्पुनरन्यत्रोपशमश्रेणावप्यनुत्कृष्टोऽनुभागबन्धो लभ्यते, स चोपशान्तमोहाद्यवस्थायां सर्वथा न स्यादिति ततः पतितैर्बध्यमानः सादिरित्यादि । सातयशःकीर्त्तिनाम्नोः सर्वोत्कृष्टो[१] रसः क्षपक-सूक्ष्मसम्परायचरमसमये प्राप्यते, ततोऽन्यः सर्वोऽप्युपशमश्रेणावप्यनुत्कृष्टस्ततश्चोपशान्तमोहावस्थायां तस्यापि बन्धो न स्यात्, पुनरपि च ततः प्रतिपत्य तमेव बध्नतोऽनुत्कृष्टाऽनुभागः सादिरेवमन्येऽपि भङ्गा द्रष्टव्याः । शेषध्रुवबन्धिनीनामप्रशस्तवर्णचतुष्कक्षेपात् ४३ संख्यानां घातिकर्मचतुष्कस्य चाऽजघन्योऽनुभागबन्धः साद्यादिचतुर्विकल्पोऽपि स्यात् । तथा गोत्रे 'इमो' अयमनुभागबन्धो 'दुविहो' अजघन्या(यो)ऽनुत्कृष्टरूपो साद्यादिश्चतुर्धा 'सेसम्मि दुह'त्ति [गाथा ७५] उत्तरगाथाद्यवयवाच्छेषे=उत्कृष्टजघन्याऽजघन्यानुभागबन्धत्रिके 'दुह'त्ति सादिरध्रुवश्चेति । तत्र यदा तासामुत्कृष्टानुभागबन्धमपूर्वकरणो विधत्ते तदाऽसौ तत्प्रथमत्वेन सादिः, समयानन्तरमवश्यमभावादध्रुवः, जघन्यानुभागं त्वेतासां मिथ्यादृष्टिः संज्ञी पर्याप्तो बध्नाति, पुनर्जघन्यतः समयादुत्कर्षतः समयद्वयादवश्यं स एवाजघन्यं बध्नाति, पुनः कालान्तरे स एवोत्कृष्टम्, एवं जघन्याजघन्येषु परावर्त्तमानजन्तूनामुभयत्र साद्यध्रुवता । वेद्ये सातस्य नाम्नि च यशःकीर्त्तेः 'सेम्मि दुह'त्ति पदस्य सम्बन्धाच्छेषे उत्कृष्टजघन्याजघन्यानुभागलक्षणे द्विधा सादिरध्रुवः । तत्र क्षपकसूक्ष्मोऽतिविशुद्धत्वात् सातयशसोरुत्कृष्टरसं बध्नाति, स च तत्प्रथमं बध्यमानतया सादिः क्षीणमोहाद्यवस्थायां नियमात् तद्बन्धो न भविष्यतीत्यध्रुवः जघन्यानुभागं त्वनयोः सम्यग्दृष्टिर्मिथ्यादृष्टिर्वा मध्यमपरिणामो बध्नाति, स चाजघन्यादवतीर्य बध्यत इति सादिः, पुनर्जघन्यतः समयादुत्कर्षतः समयचतुष्टयादजघन्यानुभागं बध्नतो जघन्योऽध्रुवः, अजघन्यस्तु सादिरिति परावृत्त्या द्वयोः साद्यध्रुवता । शेषध्रुवबन्धि४३प्रकृतीनां मध्ये ज्ञानावरणपञ्चकदर्शनावरणचतुष्कान्तराय-

१-०नाम्नोर्वेदनीयनाममूलकर्मणोः स०- पा० ।

पञ्चकरूपचतुर्दशप्रकृतीनां क्षपकसूक्ष्मश्चरमसमये जघन्यरसं बध्नाति ततोऽन्यः सर्वोऽप्यजघन्यरसं, ततश्चोपशान्तस्तदबन्धको भूत्वा प्रतिपत्य तदजघन्यं बध्नतोऽजघन्यरसबन्धः सादिस्तत्स्थानमप्राप्तानामनादिरभव्यानां ध्रुवो भव्यानामध्रुवः संज्वलनचतुष्कस्य तु क्षपकानिवृत्तिबादरो निद्राप्रचलाऽप्रशस्तवर्णादिचतुष्कोपघातभय-जुगुप्साहास्यरतिरूपप्रकृतीनां क्षपकापूर्वकरणः, प्रत्याख्यानावरणचतुष्कस्य देशविरतः संयमाऽभिमुखो, प्रत्याख्यानावरणचतुष्कस्य त्वविरतसम्यग्दृष्टिः क्षायिकसम्यक्त्वं संयमं तु युगपत्प्रतिपित्सुः, स्त्यानर्द्धित्रिकमिथ्यात्वानन्तानुबन्धिलक्षणानामष्टप्रकृतीनां मिथ्यादृष्टिः सम्यक्त्वं संयमं च युगपत्प्रतिपित्सुरतिविशुद्धो मिथ्यात्ववेदनचरमसमये जघन्यरसं बध्नाति । ततोऽन्यत्र सर्वत्राऽप्यजघन्यम् । ततश्च यथास्वमुत्तरोत्तरगुणप्राप्तौ तत्तदबन्धको भूत्वा प्रतिपत्य पुनरजघन्यं बध्नतां साद्यादयश्चत्वारोऽपि भङ्गाः स्युः ॥७४॥

'सेसम्मि दुह' त्ति शेषत्रिके सादिरध्रुवश्चेति, सादित्वं जघन्यस्याजघन्यानन्तरभावितयाऽजघन्यस्य चाध्रुवत्वमित्यादि भावना सर्वविकल्पेषु यथास्वयमभ्यूह्या । मोहवर्जघातिकर्मत्रयस्य क्षपकसूक्ष्मश्चरमसमये मोहस्य तु क्षपकानिवृत्तिबादरश्चरमसमये जघन्यरसं निर्वर्तयति, ततोऽन्यत्र सर्वत्राऽप्यजघन्यरसम्, तत उपशान्तः सूक्ष्मश्च प्रकृतकर्मसम्बन्धिनोऽजघन्यरसस्याऽबन्धको भूत्वा प्रतिपत्य पुनस्तमेव बध्नतोऽजघन्यरसस्य सादित्वम्, अनाद्यादिभावना प्राग्वत् । 'सेसम्मि दुह' त्ति शेषत्रिके साद्यध्रुवौ द्वौ भङ्गौ, तत्र जघन्यरसस्य क्षपकाऽनिवृत्तिबादरसूक्ष्माभ्यां निर्वर्त्यमानत्वात्सादित्वम्, क्षीणाद्यवस्थायां तु न भविष्यतीत्यध्रुवत्वम्, तेषामुत्कृष्टरसं तु मिथ्यादृष्टिः सर्वसंक्लिष्टः संज्ञी पर्याप्तः पञ्चेन्द्रिय एवैकं द्वौ वा समयौ बध्नाति न परतः, स चानुत्कृष्टादवतीर्य बध्यतेऽतः सादिः, पुनरप्यनुत्कृष्टबन्धं गतस्योत्कृष्टोऽध्रुवोऽनुत्कृष्टः सादिः, पुनरपि जघन्यतोऽन्तर्मुहूर्तेनोत्कृष्टतोऽनन्तानन्तोत्सर्पिण्यवसर्पिणीभिरुत्कृष्टसंक्लेशेन बध्नत उत्कृष्टरसमनुत्कृष्टोऽध्रुवः स्यात् । एवं ते त्रयोऽपि सादयोऽध्रुवाश्च भवन्ति । तथा गोत्रे द्विविधोऽप्ययमजघन्योऽनुत्कृष्टनुभागबन्धः साद्यादिश्चतुर्द्धा । तत्र यथा वेद्यनाम्नोरुत्कृष्टो रसबन्धः सादिरध्रुवश्चानुत्कृष्टरसबन्धस्तु साद्यादिचतुर्विकल्पः प्राग्भावितः, तथा गोत्रेऽप्येतौ भावनीयौ । जघन्याजघन्यभावना त्वेवं→कश्चित् सप्तमपृथिवीनारकः सम्यक्त्वाभिमुखो मिथ्यात्वपुद्गलवेदनचरमसमयेऽन्तरकरणादौ नीचैर्गोत्रं जघन्यरसं बध्नाति, स च प्रथमतया बध्यमानत्वात् सादिः, सम्यक्त्वे तु तद्बन्धं न विधास्यतीत्यध्रुवः । उच्चैर्गोत्रं तु तदानीमजघन्यरसं रचयिष्यतीत्यजघन्यः सादिः, तच्च स्थानमप्राप्तपूर्वाणामनादिः, अभव्यानां ध्रुवो,

भव्यानामध्रुव इति जघन्यः सादिरध्रुवोऽजघन्यस्तु साद्यादिश्चतुर्धा । 'सेसम्मि दुहे'त्ति पदमायुःकर्मापेक्षयापि व्याख्येयं, यथा शेषे भणितसप्तकर्मोद्धरिते आयुषि जघन्याजघन्योत्कृष्टानुत्कृष्टानुभागबन्धलक्षणं भङ्गचतुष्कमपि साद्यध्रुवरूपे विकल्पद्वये वर्त्तते । अनुभूयमानभवत्रिभागादौ नियतकाल एवायुषश्चतुर्विधस्याप्यनुभागबन्धस्य बध्यमानत्वात्सादित्वम् । अन्तर्मुहूर्त्ताच्च परतस्तदुपरमादध्रुवत्वम् ॥

[illegible]

[अथ प्रदेशबन्धः —]

**इगदुगणुगाइ जा अभवणंतगुणियाणू ।**
**खंधा उरलोचियवग्गणा उ तह अगहणंतरिया ॥७५॥**

**एमेव विउव्वाहारतेयभासाणुपाणमणकम्मे ।**
**सुहुमा कमावगाहो ऊणूणंगुलअसंखंसो ॥७६॥**

इग० एमे० 'इगदुगणुगाइ'त्ति एकद्विकाणुकादियावदभव्येभ्योऽनन्तगुणाणून् स्कन्धानन्तान् सर्वायोग्यतयातिक्रम्य तत एकाणुकादिवृद्ध्यानन्ताणुवृद्धिं यावदौदारिकोचितवर्गणा अनन्ता जघन्याद्युत्कृष्टा तास्ततोऽप्येकोत्तरवृद्ध्याऽनन्ताणुवृद्धिं यावदनन्तास्तस्या बह्वणुनिष्पन्नतया सूक्ष्मत्वेनोत्तरस्यास्तु अल्पाणुमयत्वेन स्थूलतयोभयाग्रहणयोग्यवर्गणास्ततोऽप्येकोत्तरवृद्ध्याऽनन्ता वैक्रिययोग्या एवमेकोत्तरवृद्ध्यानन्ताणुमयाऽग्रहणवर्गणान्तरिता आहारकादियोग्यवर्गणा अपि वाच्याः । ताश्च यथाणुवृद्ध्या क्रमेण सूक्ष्मतन्तुव्यूतपटवत् सूक्ष्मा, अत एवाल्पाऽल्पतराल्पतमक्षेत्रावगाहितया तासामूनोनतरोनतमेऽङ्गुलासंख्येयभागे अवगाहः ॥७५॥७६॥

**इक्किक्कहिया सिद्धाणंतंसा अंतरेसु अग्गहणा ।**
**सव्वत्थ जहन्नुचिया नियणंतंसाहिया जिट्ठा ॥७७॥**

इक्कि० एकोत्तरवृद्ध्या सिद्धानन्तभागमिता अनन्तप्रमाणा एकैकस्या अन्तरेष्वग्रहणवर्गणाः स्युः । सर्वत्र च स्वस्वजघन्ययोग्यवर्गणायाः सकाशादुत्कृष्टयोग्यवर्गणा निजनिजानन्तभागेनाधिका मन्तव्याः ॥७७॥

**अंतिमचउफासदुगंधपंचवन्नरसकम्मखंधदलं ।**
**सव्वजियणंतगुणरसमणुजुत्तमणंतयपएसं ॥७८॥**

अंति० अन्तिमाश्चत्वारः स्पर्शाः शीतोष्णरुक्षस्निग्धरूपा यस्य कर्मदलिकस्य तत्तथाऽयमाशयः→एषां चतुःस्पर्शानां मध्यात्कश्चिदणुः स्निग्धोष्णाऽविरुद्धस्पर्शद्वयोपेतोऽन्यः स्निग्धशीतोऽपरो रूक्षोष्णोऽन्यस्तु रूक्षशीतः । *बृहच्छतकटीकायां*मृदुलघुरूपं स्पर्शद्वयमवस्थितम् । शेषौ च स्निग्धोष्णौ स्निग्धशीतौ वा रूक्षोष्णौ रूक्षशीतौ वा द्वावविरुद्धस्पर्शौ भवत इति चतुःस्पर्शाः । अत्र चैवंविधकर्मस्कन्धदलिकभणनेन औदारिकवैक्रियाहारकयोग्याः स्कन्धा अष्टस्पर्शा एव । शेषास्तु तैजसादिस्कन्धाश्चतुःस्पर्शा इति मन्तव्यम् ॥७८॥

**एगपएसोगाढं नियसव्वपएसओ गहेइ जिओ ।**
**थेवो आउ तदंसो नामे गोए समो अहिओ ॥७९॥**

एग० एकप्रदेशावगाढं यत्रैव जीवस्यात्मप्रदेशास्तत्रैव यदवगाढं तदेव जीवो गृह्णाति कर्मदलिकं, न पुनरन्यत् तत्रानीय गृह्णातीत्यर्थः, तच्च सर्वैरप्यात्मीयप्रदेशैर्गृह्णाति, निबिडसुवर्णादिशृङ्खलावत्, परस्परसम्बद्धत्वादेकस्मिन् प्रदेशे चेष्टमाने सर्वेषामपि चेष्टनात् । गृहीतकर्मदलिकस्याल्पमेव भागमायुषि क्षिपति, शेषकर्मस्थित्यपेक्षया तस्यैवाल्पस्थितिकत्वात् । नाम्नि गोत्रे च ततोऽधिकः, परस्परं तु समः ॥७९॥

**विग्घावरणे मोहे सव्वोवरि वेयणीये जेणप्पे ।**
**तस्स फुडत्तं न हवइ ठिईविसेसेण सेसाणं ॥८०॥**
**नियजाइलद्धदलियाणंतंसो होइ सव्वघाईणं ।**
**बज्झंतीण विभज्जइ सेसं सेसाण पइसमयं ॥८१॥**

विग्घा० निय० अन्तराय-ज्ञानवरण-दर्शनावरणरूपतया यो भागः परिणमति स्वस्वस्थाने त्रयाणामपि तुल्यो, विशेषाधिकश्च नामगोत्रापेक्षया । तथा मोहनीयेऽपि कर्मणि यो द्रव्यभाग आभजति सोऽपि विशेषाधिकोऽनन्तरोक्तकर्मत्रयभागापेक्षया । तथा वेदनीयेऽपि कर्मणि यो भाग आभजति सर्वेषामपि शेषकर्मभागानामुपरि वर्त्तते, मोहनीयभागापेक्षयाऽपि विशेषाधिक इत्यर्थः, अन्यथा तस्य सुखदुःखवेद्यतया

स्फुटत्वं न स्यात् । तथा शेषकर्मणामायुष्कादीनां भागस्य हीनत्वमाधिक्यं वा विज्ञेयं स्थितिविशेषेण हेतुभूतेन, यस्य नामगोत्रादेरायुष्काद्यपेक्षया महती स्थितिस्तस्य तदपेक्षया भागोऽपि महान्, यस्य त्वसौ हीनस्तस्य सोऽपि हीन इति हृदयम् । उत्तरप्रकृतीनां सः स्वयमेवोच्यते, तत्र ज्ञानावरणस्य पञ्चोत्तरप्रकृतय, एका सर्वघातिनी शेषाश्चतस्रो देशघातिन्यस्तत्र ज्ञानावरणभागे यद् द्रव्यमागच्छति तन्मध्ये सर्वघातिना तीव्ररसेन युक्तं यद्द्रव्यं तदल्पं शेषद्रव्यस्यानन्तभागवर्त्त्यैव, तच्च केवलज्ञानावरणतयैव परिणमति शेषं तु देशघातिद्रव्यं चतुर्भिर्भागैर्भूत्वा शेषप्रकृतिचतुष्टयरूपतया परिणमति । एवमपरासामपि वाच्यम्, यावदेकस्मिन् काले बध्यमानाः प्रकृतयो भवन्ति तावद्भिर्भागैर्नामभागलब्धं द्रव्यं परिणमति । इह च यस्या उत्तरप्रकृतेर्बन्धो व्यवच्छिद्यते तद् भागद्रव्यं यावत्तत्समानजातीया एकाकिनी प्रकृतिर्बध्यते तावत्तस्या एव तद्भवति, यदा च समानजातीया अपि सर्वा व्यवच्छिद्यन्तेऽथवा मिथ्यात्वादेरिवाऽपरा समानजातीया प्रकृतिर्नास्ति तदा तद्द्रव्यं सर्वमपि स्वमूलप्रकृत्यन्तर्गतानां विजातीयप्रकृतीनामपि भवति । यदा ता अपि विजातीया व्यवच्छिद्यन्त तदा सर्वमप्यन्यस्या मूलप्रकृतेर्भवति । अत्र निदर्शनम्→यथा स्त्यानर्द्धित्रिकबन्धे व्यवच्छिन्ने तद्भागद्रव्यं समानजातीयत्वान्निद्राप्रचलयोर्भवति तयोरपि बन्धव्यवच्छेदे स्वमूलप्रकृत्यन्तर्गतानां चक्षुर्दर्शनावरणादीनां विजातीयानामपि भवति, तेषामपि बन्धव्यवच्छेदे उपशान्ताद्यवस्थायां सर्वं वेदनीयस्यैव भवति । मिथ्यात्वादेस्तु समानजातीया प्रकृतिर्नास्त्यतस्तद्बन्धव्यवच्छेदे तद्भागद्रव्यं विजातीयप्रकृतीनामेव क्रोधादीनां स्यादेवमन्यत्रापि स्वधियाऽभ्यूह्यम् ॥८०॥८१॥

**सम्मदरसव्वविरईउ अणविसंजोयदंसखवगे य ।**
**मोहसमसंतखवगे खीणसजोगियर गुणसेढी ॥८२॥**

सम्म० सम्यक्त्वलाभे प्रथमा वेद्यमानमिथ्यात्वादिपुद्गलक्षपणाय यथोत्तरवृद्ध्या तद्दलिकरचनरूपान्तर्मुहूर्त्तमाना गुणश्रेणिः, 'दर'त्ति देशविरतिलाभकाले द्वितीया, एवं सर्वविरत्यादिषु वाच्यम् । केवलं 'अणविसंजोय'त्ति सत्तागतानन्तानुबन्धिविसंयोजने चतुर्थी, दर्शनत्रिकक्षपणे पञ्चमी, मोहं शमयतोऽनिवृत्तिबादरसूक्ष्माद्धायां षष्ठी, उपशान्ते उपशान्तमोहस्य सप्तमी एवं क्षपकक्षीणयोरपि श्रेणीद्वयम्, सयोगिनो दशमी । अयोगिन एकादशी । आसां चायं विशेषः→सम्यक्त्वलाभकाले मन्दशुद्धितया दीर्घान्तर्मुहूर्त्तवेद्यामल्पतरप्रदेशाग्रां गुणश्रेणिं रचयति, उत्तरोत्तरां तु यथोत्तरवृद्धशुद्धितया ह्रस्वह्रस्वतरान्तर्मुहूर्त्तवेद्यां बहुबहुतरादिप्रदेशाग्रां रचयति ॥८२॥

आसु वर्तमाना जन्तव एतद्गुणादेव यथोत्तरमसंख्येयगुणनिर्जरावन्तो मन्तव्याः, एतदेवाह—

**गुणसेढी दलरयणाणुसमयमुदयादसंखगुणणाए ।**
**एयगुणा पुण कमसो असंखगुणनिज्जरा जीवा ॥८३॥**

'गुण' स्पष्टा ॥८३॥

अथ गुणस्थानानां जघन्योत्कृष्टान्तरमाह —

**पलियासंखसमुहू सासणइयरगुण अंतरं हस्सं ।**
**गुरु मिच्छि बे छसट्ठी इयरगुणे पुग्गलद्धंतो ॥८४॥**

पलि० सास्वादनस्य तद्भावात् प्रतिपतितस्य कालान्तरेण तद्भावं प्रतिपित्सोरन्तरं जघन्यतोऽपि पल्याऽसंख्येयभागमात्रं, ततो हीनकालेन तद्भावाऽप्रतिपत्तेरितरगुणानां तु जघन्यान्तरमन्तर्मुहूर्त्तम्, तद्भावं गत्वा प्रतिपतितस्य कदाचित्पुनरन्तर्मुहूर्त्तेन तद्भावप्रतिपत्तेः । गुर्वन्तरं तु मिथ्यात्वस्य *'दो वारे विजयाइसु'* [ ] इत्यादिनीत्या बारद्वयं षट्षष्टिपूरणेन सागरोपमषट्षष्टि । इतरगुणानां पुनरपार्द्धपुद्गलपरावर्त्तः ॥८४॥

**उद्धार अद्ध खित्तं पलिय तिहा समयवाससयसमए ।**
**केसवहारो दीवोदहिआउतसाइपरिमाणं ॥८५॥**

उद्धा० उद्धारपल्योपममद्धापल्योपमं क्षेत्रपल्योपमं चेति पल्योपमं त्रिधा । तत्रायामविष्कम्भाभ्यामवगाहेन चोत्सेधाङ्गुलनिष्पन्नैकयोजनप्रमाणः, परिरयेण तु साधिकत्रिगुणैकयोजनमानः पल्य एक-द्वि-त्रियावत्सप्ताहःप्ररूढवालाग्रैर्निबिडं भृतः, ततः समये समये एकैकवालाग्रापहारेण यावता कालेन स निर्लेपः स्यात् तावान् कालः संख्येयसमयमानो बादरमुद्धारपल्योपमम् । तद् दशकोटीकोट्या बादरमुद्धारसागरोपमम् । एकैकं वालाग्रं असंख्येयखण्डानि कृत्वा पूर्ववत् पल्यो भ्रियते । तानि च खण्डानि द्रव्यतोऽत्यन्तशुद्धलोचनच्छद्मस्थो यदतीव सूक्ष्मं पुद्गलद्रव्यं चक्षुषा पश्यति तदसंख्येयभागमात्राणि, क्षेत्रतस्तु सूक्ष्मपनकशरीरं यावति क्षेत्रेऽवगाहते ततोऽसंख्यगुणानि बादरपर्याप्तपृथिवीकायिकशरीरतुल्यानीति *वृद्धाः,* ततः प्रतिसमयमेकैकखण्डापहारेणासंख्येयवर्षकोटीप्रमाणः कालः सूक्ष्मोद्धारपल्योपमं तद्दशकोटाकोटीभिः

सूक्ष्मोद्धारसागरोपमम्, आभ्यां द्वीपाः समुद्राश्च मीयन्ते । तथा वर्षशते वर्षशतेऽतिक्रान्ते पूर्वपल्यादेकैकवालाग्राऽपहारेण संख्येयवर्षकोटीमानः कालो बादरमद्धापल्योपमम्, तद्दशकोटाकोटीभिर्बादरमद्धासागरोपमं तथैव वर्षशते वर्षशते एकैकवालाग्राऽसंख्येयतमखण्डापहारेणाऽसंख्येयवर्षकोटीमानः कालः । सूक्ष्ममद्धापल्योपमं तद्दशकोटाकोटीभिः सूक्ष्ममद्धासागरोपमम्, आभ्यां सुरनरनारकतिरश्चां कर्मस्थितिः कायस्थितिर्भवस्थितिश्च मीयन्ते । तथा प्रागुक्तपल्याद्वालाग्रस्पृष्टनभःप्रदेशानां प्रतिसमयमेकैकापहारेणाऽसंख्येयोत्सर्पिण्यवसर्पिणीमानः कालो बादरं क्षेत्रपल्योपमं तद्दशकोटाकोटीभिर्बादरं क्षेत्रसागरोपमम् । तथाऽसंख्यातखण्डीकृतवालाग्रैः स्पृष्टानामस्पृष्टानां च नभःप्रदेशानां प्रतिसमयमेकैकापहारेण बादरादसंख्येयगुणकालमानं सूक्ष्मं क्षेत्रपल्योपमम् । तद्दशकोटाकोटीभिः सूक्ष्मं क्षेत्रसागरोपमम् । आभ्यां *दृष्टिवादे* प्रयोजनं द्रव्यप्रमाणचिन्तायां प्रायः ॥८५॥

**दव्वे खित्ते काले भावे चउह दुह बायरो सुहुमो ।**
**होइ अणंतुस्सप्पिणिपरिमाणो पुग्गलपरट्टो ॥८६॥**

दव्वे० द्रव्य-क्षेत्र-काल-भाव-भेदाच्चतुर्धा पुद्गलपरावर्त्त, एकैको द्विधा-बादरः सूक्ष्मश्च । [सूक्ष्मो]ऽनंतोत्सर्पिणीप्रमाणो भवति ॥८६॥

द्रव्यपुद्गलपरावर्त्तमाह-

**उरलाइसत्तगेणं एगजिओ मुयइ फुसिय सव्वअणू ।**
**जत्तियकालि स थूलो दव्वे सुहुमो सगन्नयरा ॥८७॥**

उर० औदारिकादिसप्तकेनाहारकस्य कादाचित्कतया तद्वर्जनं *'ओरालविउव्वाहार'* [आ० नि० गा० ३९] इत्यादिगाथोक्तौदारिकादियोग्यवर्गणासप्तकभावेन *मतान्तरेणौ*दारिकाद्यङ्गचतुष्कभावेन वा लोकवर्त्तिसर्वपुद्गलस्पर्शनमोचनेन बादरः, सप्तानां चतुर्णां वा मध्यादेकेन केनचित् सर्वपुद्गलस्पर्शनमोचने शेषैः स्पृष्टानामगणनेन सूक्ष्मः पुद्गलपरावर्त्तः ॥८७॥

**लोगपएसोसप्पिणिसमया अणुभागबंधठाणा य ।**
**जहतहकममरणेणं पुट्ठा खित्ताइ थूलियरा ॥८८॥**

लोग० चतुर्दशरज्जवात्मकलोकस्य प्रदेशा उत्सर्पिण्याश्च समया अनुभागबन्धस्थानानि च यदा यथातथा मरणेन व्युत्क्रममरणेन जीवेन स्पृश्यन्ते तदा क्षेत्रकालभावपुद्गलपरावर्त्ताः स्थूलाः स्युः, क्रममरणेन तु यदा जीवेन स्पृश्यन्ते तदा सूक्ष्मा एते भवन्ति । भावपुद्गलपरावर्त्तस्पष्टीकरणार्थमिमे गाथे, तद्यथा—>

*'एगसमयम्मि लोए सुहुमगणिजीआ उ जओ पविसंति ते हुंतऽसंखलोगप्पएसतुल्ला असंखेज्जा ॥१॥*
*तत्तो असंखगुणिआ अगणिकाया उ तेसिं कायठिई । तत्तो संजमअणुभागबंधठाणाणऽसंखाणि' ॥२॥*

[प्र० सा० गा० १०५०/१०५१]

व्याख्या-एकस्मिन् समये पृथिवीकायिकादयो जीवाः सप्तम्यर्थत्वात्प्रथमायाः सूक्ष्माग्नि-जीवेषु प्रविशन्ति, तेऽसंख्येयलोकाकाशप्रदेशतुल्या, ये पुनः पूर्वमुत्पन्नास्तेजस्कायिकाः पुनर्मृत्वा तेनैव पर्यायेणोत्पद्यन्ते ते न गृह्यन्ते, तेषां पूर्वमेव प्रविष्टत्वात् । ततस्तेभ्य एकसमयोत्पन्नसूक्ष्माग्निकायिकेभ्योऽ-संख्यगुणिताः सूक्ष्माग्निकायाः पूर्वोत्पन्नाः, अन्तर्मुहूर्तायुष्कत्वात् सूक्ष्माग्नीनां, तेभ्योऽपि तेषामेव प्रत्येकं कायस्थितिरसंख्यातगुणा, एकैकस्यापि सूक्ष्माग्नेरसंख्येयोत्सर्पिण्यवसर्पिणीप्रमाणायाः कायस्थितेरुत्कर्षत उक्तत्वात्तस्या अपि सकाशात् संयमस्थानान्यनुभागस्थानानि च प्रत्येकमसंख्येयगुणानि मिथस्तुल्यानि, कायस्थितावसंख्येयानां स्थितिबन्धानां भावात्, एकैकस्मिंश्च स्थितिबन्धेऽसंख्येयानामनुभागबन्धस्थानानां सद्भावात् । अनुभागबन्धस्थानमेकेन काषायिकेणाध्यवसायेन गृहीतानां कर्मपुद्गलानां विवक्षितैकसमयबद्धर-ससमुदायपरिमाणं, तानि चानुभागबन्धस्थानान्यसंख्येयलोकाकाशप्रदेशप्रमाणानि, तेषां चानुभागबन्ध-स्थानानां निष्पादका ये कषायोदयरूपा अध्यवसायविशेषास्तेप्यनुभागबन्धस्थानानि इत्युच्यन्ते, तेपि तावन्त एव ॥

*'ताणि मरणंते जया पुट्ठाणि कमुक्कमेण सव्वाणि भावम्मि बायरो सुहुमो उ कमेण बोधव्वो ॥'*

[प्र० सा० गा० १०५२]

यावता कालेन क्रमेणोत्क्रमेण च सर्वेष्वप्यनुभागबन्धाध्यवसायेषु वर्तमानः स्यात् तावान् कालो बादरभावपुद्गलपरावर्त्तः । सूक्ष्मो यथा कश्चिज्जन्तुः सर्वजघन्ये कषायोदयरूपेऽध्यवसाये मृतस्ततो यदि स एवानन्तेऽपि काले गते सति प्रथमादनन्तरे द्वितीयेऽध्यवसायस्थाने वर्तमानो म्रियते तदा तन्मरणं

गण्यते न शेषाण्युत्क्रमभावीन्यनन्तान्यपि मरणानि । एवं क्रमेण सर्वाण्यप्यनुभागबन्धाध्यवसायस्थानानि यावता कालेन मरणेन स्पृष्टानि स्युस्तावान् कालः सूक्ष्मभावपद्गलपरावर्त्तः । क्षेत्रतः सूक्ष्मपुद्गलपरावर्त्तः क्षेत्रतो मार्गणायां गृह्यते, शेषाः प्ररूपणामात्रम् ॥८८॥

**अप्पयरपयडिबंधी उक्कडजोगी य सन्नि पज्जत्तो ।**
**कुणइ पएसुक्कोसं जहन्नयं तस्स वच्चासे ॥८९॥**

यदा बह्वीनां प्रकृतीनां बन्धको भवति तदा भागबाहुल्यादुत्कृष्टप्रदेशबन्धो न लभ्यते। अल्पतरप्रकृतिबन्धे बध्यमान[1]प्रकृतीनामधिकभागलाभादुत्कृष्ट प्रदेशबन्धो लभ्यते, इत्यल्पतरप्रकृतिबन्धीत्युक्तं, 'जोगा पयडिपएसं' [गाथा-९६]ति वचनादुत्कृष्टयोग एवोत्कृष्टप्रदेशबन्ध इत्युत्कटयोगीत्युक्तम्। उत्कृष्टयोगश्च पर्याप्तसंज्ञिन एव, जघन्यप्रदेशबन्धः पुनर्बहुतरप्रकृतिबन्धकस्यानुत्कटयोगिनोऽपर्याप्तसूक्ष्मैकेन्द्रियादेरिति विपर्यासः ॥८९॥

उत्कृष्टप्रदेशबन्धस्वामिन आह-

**मिच्छ अजयचउ आऊ बितिगुण विणु मोहि सत्त मिच्छाई ।**
**छण्हं सतरस सुहुमो अजया देसा बितिकसाए ॥९०॥**

मिच्छ० मिथ्यादृशोऽविरतादयोऽप्रमत्तान्ताश्चत्वारश्चायुषमुत्कृष्टबन्धं कुर्वन्ति । सास्वादनमिश्रयोरल्पकालभावितयाऽनुत्कटयोगादिभावाच्च न तेषां तथाविधस्तद्बन्धः । अपूर्वादयस्त्वायुर्बन्धका एव न स्युः । मिश्रसास्वादनवर्जा मिथ्यादृगादयोऽनिवृत्त्यन्ताः सप्त-सप्तविधबन्धका । उत्कटयोगिनश्च मोहस्योत्कृष्टप्रदेशबन्धका मिश्रसास्वादनयोः सप्तविधबन्धकत्वेऽपि तथाविधोत्कटयोगाभावाद् वर्जनम् । षण्णां मोहायुर्वर्जमूलप्रकृतीनां सातसहितानां *'चउदंसणु'* [क० स्त० गा०१२] इत्यादिसप्तदशप्रकृतीनां चोत्कृष्ट योगी सूक्ष्मः, सूक्ष्मसम्परायो हि मोहायुषी न बध्नाति, अतस्तद्भागोऽधिको लभ्यते इत्यस्यैव ग्रहणम् । उत्कृष्टयोगिनः सप्तविधबन्धका अविरता देशविरताश्च, द्वितीयतृतीयकषायाणां प्राग् व्यवच्छिन्नमिथ्यात्वानन्तानुबन्ध्याद्यधिकभागलाभात् ॥९०॥

---

१- ०बन्धे तबध्य० - हे० ।

**पण अनियट्टी सुखगइनराउसुरसुभगतिगविउव्विदुगं ।**
**समचउरंसमसायं वइरं मिच्छो व सम्मो वा ॥९१॥**

पण० पञ्चानां पुंवेद-संज्वलनचतुष्करूपाणां सर्वोत्कृष्टयोगोऽनिवृत्तिबादर उत्कृष्टं प्रदेशं बध्नाति, प्राग्व्यवच्छिन्नशेषवेदकषायाद्यधिकभागलाभात् । सुखगत्यादित्रयोदशप्रकृतीनां मिथ्यादृष्टिः सम्यग्दृष्टिर्वोत्कृष्टप्रदेशबन्धकः । असातस्य सप्तविधबन्धकालसमये सातस्यायुषो भागक्षेपात् । नरदेवायुषोरष्टविधबन्धे शेषायुस्त्रयभागक्षेपात् । शेषनामप्रकृतिनवकस्य देवगतियोग्याष्टाविंशतिबन्धकाले एकोनत्रिंशदादिबन्धापेक्षयाऽल्पभागपातात् । अधस्तनबन्धस्थानेष्वेता बन्ध एव नायान्ति । अष्टाविंशतिमेव वज्रर्षभनाराचसहितां नरगतियोग्यामेकोनत्रिंशतं बध्नतो वज्रस्योत्कृष्टप्रदेशबन्धस्त्रिंशदादिबन्धापेक्षयाऽल्पभागपातात् ॥९१॥

**निद्दापयलादुजुयलभयकुच्छातित्थ सम्मगो सुजई ।**
**आहारदुगं सेसा उक्कोसपएसगा मिच्छो ॥९२॥**

निद्दा० निद्रा-प्रचलयोर्व्यवच्छिन्नबन्धस्त्यानर्द्धित्रिकभागस्य क्षेपात् । हास्यरत्यरतिशोकभयजुगुप्साजिनानां च प्राग्व्यवच्छिन्नबन्धमिथ्यात्वादिभागलाभादेताः प्रकृतीरुत्कृष्टप्रदेशबन्धादुत्कृष्टयोगी सप्तविधबन्धको ज्ञानादित्रयेण सम्यग्मोक्षमार्गं गच्छतीति 'सम्मगो' सम्यग्दृष्टिः करोति । सुयतिरप्रमत्तोऽपूर्वो वाऽऽहारकद्विकं नामकर्मणो देवगतियोग्यत्रिंशद्बन्धस्थानकाले उत्कृष्टयोगादिविशेषण उत्कृष्टप्रदेशं बध्नाति, एकत्रिंशद्बन्धापेक्षया तत्र तस्य भागाधिक्यात् । शेषा उक्तव्यतिरिक्ताः ६६ प्रकृतीर्मिथ्यादृष्टिरेवोत्कृष्टप्रदेशा बध्नाति । तत्र नरद्विकपञ्चेन्द्रिजात्यौदारिकद्विकतैजसकार्मणवर्णादिचतुष्काऽगुरुलघूपघातपराघातोच्छ्वासत्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरशुभाशुभयशःकीर्त्तिनिर्माणलक्षणाः पञ्चविंशतिप्रकृतीर्मुक्त्वा शेषाः ४१ सम्यग्दृष्टेर्बन्ध एव नायान्ति, यद्यपि तन्मध्यात् काश्चित् सास्वादनोऽपि बध्नाति तथाऽप्यस्योत्कृष्टयोगो न लभ्यते, अत एताः ४१ प्रकृतीर्मिथ्यादृष्टिरेवोत्कृष्टयोगी मूलप्रकृतीनामुत्तरप्रकृतीनां च यथासम्भवमल्पतरबन्धक उत्कृष्टप्रदेशाः करोति । या अपि २५ प्रकृतयः सम्यग्दृष्टेर्बन्धमायान्ति ता अपि नरद्विकपञ्चेन्द्रिजात्यौदारिकाङ्गोपाङ्गपराघातोच्छ्वासत्रसशुभस्थिरपर्याप्तवर्जपञ्चदशप्रकृतीनामपर्याप्तैकेन्द्रिययोग्यनामसत्कत्रयोविंशतिबन्धेनैव सह बध्यमानानामुत्कृष्टप्रदेशबन्धो लभ्यते, नोत्तरैः पञ्चविंशत्यादिभिर्भागबाहुल्यात् । नरद्विकादिदशप्रकृतीनां पर्याप्तैकेन्द्रिय-पर्याप्तत्रसयोग्यपञ्चविंशतिबन्धेनैव सह बध्यमानानामुत्कृष्टप्रदेश-

बन्धो, नोत्तरैः षड्विंशत्यादिभिर्भागबाहुल्यात् । त्रयोविंशति-पञ्चविंशतिबन्धौ सम्यग्दृष्टेर्न भवतो, देव-पर्याप्तनरयोग्यबन्धकत्वात् तस्य ॥९२॥

जघन्यप्रदेशबन्धमाह—

**सुमुणी दुन्नि असन्नी नरयतिग सुराउ सुरविउव्विदुगं ।**
**सम्मो जिणं जहन्नं सुहुमनिगोयाइखणि सेसा ॥९३॥**

सुमु० अप्रमत्तः परावर्त्तमानयोगोऽष्टविधबन्धकः स्वप्रायोग्यसर्वजघन्यवीर्ये स्थितो नाम्न एकत्रिंशत्प्रकृतीर्बध्नन्नाहारकद्विकं जघन्यप्रदेशं बध्नाति । असंज्ञिनस्तद्बन्धकेषु सर्वजघन्ययोगतया नरकत्रि-कसुरायुर्लक्षणस्य प्रकृतिचतुष्कस्य जघन्यप्रदेशबन्धः । सुरद्विकवैक्रियद्विकजिननाम्नां सम्यग्दृष्टेर्जघन्यप्रदेश-बन्धस्तथाहि—कश्चिदविरतसम्यग्दृष्टिर्बद्धजिननामा देवनारकेभ्यश्च्युत्वा नरकेषूत्पन्नो भवाद्यसमये जिनसहितां देवगतियोग्यां नामैकोनत्रिंशतं बध्नन् सुरद्विक-वैक्रियद्विकयोर्जघन्यप्रदेशं करोति । तदानीमेव तस्य प्रायोग्यजघन्ययोगित्वात् । जिननाम्नस्तु कश्चिदविरतसम्यग्दृष्टिर्बद्धजिननामाऽनुत्तरसुरेषूत्पन्नः स्वभ-वाद्यसमये जघन्यप्रदेशबन्धकस्तद्बन्धकेषु तस्यैव जघन्ययोगित्वात् । नारकाणामपि तद्बन्धसम्भवोऽस्ति केवलं न तेषां तथाजघन्ययोगः । शेषा नवोत्तरशतप्रकृतीरपर्याप्तसूक्ष्मनिगोदजीवो यथासम्भवं बह्वीः प्रकृतीर्बध्नन् सर्वजघन्यवीर्यलब्धियुक्तो भवाद्यसमये जघन्यप्रदेशा बध्नाति, सर्वजघन्ययोगित्वात् तस्य ॥९३॥

**दंसणछगभयकुच्छाबितितुरियकसायविग्घनाणाणं ।**
**मूलछगेऽणुक्कोसो चउह दुहा सेसि सव्वत्थ ॥९४॥**

दंस० दर्शनावरणचतुष्कं निद्राप्रचलेतिदर्शनषट्कादित्रिंशदुत्तरप्रकृतीनां मोहायुर्वर्जमूलप्र-कृतिषट्के चानुत्कृष्टप्रदेशबन्धः साद्यनादिध्रुवाध्रुवतया चतुर्धापि स्यात् । तत्र मूलप्रकृतिषट्कस्य ज्ञानावरणान्त-रायपञ्चकस्य चोत्कृष्टप्रदेशबन्धः क्षपकस्यौपशमिकस्य वा सूक्ष्मसम्परायस्योत्कृष्टयोगिन एकं द्वौ वा समयौ यावल्लभ्यते, तस्य षड्विधबन्धकत्वेन मोहायुर्भागलाभात् । स चोपशान्तमोहावस्थायामारुह्य पुनः प्रतिपत्यो-त्कृष्टयोगाद्धाऽत्रैव प्रतिपत्य यदाऽनुत्कृष्टं प्रदेशबन्धं करोति तदाऽसौ सादिः । तत्स्थानमप्राप्तानामनादिः, सदा बध्यमानत्वात् । अध्रुवध्रुवौ भव्याभव्ययोः । चक्षुरचक्षुरवधिकेवलदर्शनावरणानामपि तथैव, केवलमत्र निद्रापञ्चकभागलाभाधिक्यमपि वाच्यम् । निद्राद्विकस्य त्वविरतादयोऽपूर्वान्ताः सर्वोत्कृष्टयोगिनः सप्तविध-

बन्धकाले एकं द्वौ वा समयौ आयुःस्त्यानर्द्धित्रिकभागाधिक्येनोत्कृष्टप्रदेशबन्धकाः। भयजुगुप्सयोरप्य-विरतादयोऽपूर्वकरणान्ता उत्कृष्टयोगिन उत्कृष्टप्रदेशबन्धकाः, द्वितीयकषायाणां पुनरविरत उत्कृष्टयोगी उत्कृष्टप्रदेशबन्धकः, मिथ्यात्वानन्तानुबन्ध्यादिभागलाभात् । तृतीयकषायाणां तथैव देशविरतो, द्वितीयक-षायाणामपि भागलाभात् । चतुर्थकषायाणामनिवृत्तिबादरस्तृतीयकषायाणामपि भागलाभात् । एषामुत्कृष्ट-प्रदेशबन्धं[1] कृत्वा तत्स्थानादुत्कृष्टयोगाद्वा प्रतिपत्य पुनरनुत्कृष्टप्रदेशबन्धं कुर्वतामसौ सादिरनाद्यादिभावना पूर्ववत् । 'सेसि' त्ति शेषत्रिके–उत्कृष्टजघन्याजघन्यरूपे सर्वप्रकृतिविषयः प्रदेशबन्धः सादिरध्रुवश्चेति द्विधा । तत्र जघन्ययोगावसरेऽजघन्यप्रदेशबन्धादवतीर्य जघन्यमेनं कुर्वतो जघन्यः सादिः, अजघन्योऽध्रुवस्तस्माच्च पुनस्तमजघन्यं कुर्वतो जघन्योऽध्रुवोऽजघन्यः सादिः, एवमनुत्कृष्टःबध्नतोऽत्कृष्टं बध्नतोऽनुत्कृष्टोऽध्रुव, उत्कृष्टस्तु सादिः । तस्माच्च्युत्वा पुनरनुत्कृष्टबन्धे उत्कृष्टोऽध्रुवोऽनुत्कृष्टः सादिः । सर्वत्रेत्युक्तमूलोत्तर-प्रकृतीनामनुत्कृष्टाज्जघन्याजघन्योत्कृष्टलक्षणे शेषत्रिके शेषमूलोत्तरप्रकृतीनां चतुर्विधेऽपि बन्धे साद्य-ध्रुवलक्षणं भङ्गद्वयमेव ॥९४॥

**सेढिअसंखिज्जंसे जोगट्ठाणाणि पयडिठिइभेया ।**
**ठिइबंधज्झवसायाणुभागठाणा असंखगुणा ॥९५॥**
**तत्तो कम्मपएसा अणंतगुणिया तओ रसच्छेया ।**
**जोगा पयडिपएसं ठिइअणुभागं कसायाओ ॥९६॥**

सेढी० तत्तो० बुद्ध्या घनीकृतस्य सप्तरज्जुमितलोकस्य सप्तरज्ज्वायतताया विष्कम्भत एकप्रादेशिक्याः श्रेणेरसंख्ये[य]भागे यावन्तः प्रदेशास्तावत्प्रमाणानि जघन्यमध्यमोत्कृष्टभेदानि योगस्था-नानि, तानि चोत्तरप्रभेदापेक्षया स्तोकानि, तेभ्यः प्रकृतीनां ज्ञानावरणादीनां क्षयोपशमवैचित्र्येण द्रव्य-क्षेत्रादिसामग्रीविशेषेण च भेदा असंख्येयगुणास्ते भेदाः प्रकृतिभेदत्वात्प्रकृतयश्च इत्युच्यन्ते। यदुक्तम्- ***'पत्तेयमक्खराइं'*** [ ] तथा ***'संखाइआओ खलु'*** [ ] इत्यादि । ततश्चैतदावरणानामप्येतावन्तो भेदा भवन्त्येव, यत एकैकस्मिन् योगस्थाने वर्तमानैर्नानाजीवैः कालभेदादेक-

---

१- ०लाभात् । तथा प्रत्याख्यानावरणानां देशविरतः सप्तविधबन्धक अप्रत्याख्यानलाभो वाच्यः । तथा सञ्ज्वलनक्रोधस्याऽनिवृत्तिबादरः पुंवेदे छिन्ने संज्वलनक्रोधादिचतुष्कं बध्नन्नुत्कृष्टयोगोत्कृष्टं प्रदेशबन्धं करोति, मिथ्यात्वाऽऽद्यकषायद्वादशकनोकषायभागो लभ्यत इति कृत्वा । संज्वलनमानस्य स एव क्रोधबन्धे छिन्ने संज्वलनमानादित्रयं बध्नन्नुत्कृष्टप्रदेशं करोति, क्रोधभागो लभ्यत इति कृत्वा । एवं लोभं यावत् । एषामु०- पा० ।

जीवेन वाऽनेकपूर्वोक्तप्रकृत्यंशानां बध्यमानत्वात् । तेभ्योऽपि स्थितिविशेषा अन्तर्मुहूर्तसमयाधिकाऽन्तर्मुहूर्त्तादिलक्षणा असंख्येयगुणाः, एकैकस्याः प्रकृतेरसंख्यातैः स्थितिविशेषैर्बध्यमानत्वात् । ततोऽपि तासां स्थितीनां बन्धाध्यवसायस्थानान्यसंख्येयगुणानि, एकैकस्यापि स्थितिविशेषस्याऽसंख्येयलोकाकाशप्रदेशप्रमाणैरध्यवसायस्थानैर्जन्यत्वात् । ततोऽनुभागबन्धाध्यवसायस्थानान्यसंख्येयगुणानि, सर्वजघन्यस्यापि स्थितिबन्धाध्यवसायस्थानस्य देशक्षेत्रादिभेदेनाऽसंख्यैरनुभागबन्धाध्यवसायस्थानैर्बध्यमानत्वात् । ततः कर्मप्रदेशाः कर्माणवोऽनन्तगुणास्ततोऽप्यनन्तगुणास्तेषां रसच्छेदाः, एकैकपरमाणुसम्बन्धिनो रसस्य केवलिप्रज्ञया छिद्यमानस्य सर्वजीवानन्तगुणाविभागपलिच्छेददानात् । 'जोगा पयडिपएसं' ति योगात् प्रकृतयश्च प्रदेशाश्च प्रकृतिप्रदेशं तज्जीवः करोतीति सम्बन्धः । प्रकृतिप्रदेशबन्धयोर्योगा हेतुरित्यर्थः । यद्यपि पूर्वं मिथ्यात्वादयः सामान्येन कर्मणो बन्धहेतव उक्तास्तथाप्याद्यकारणत्रयाभावेऽप्युपशान्तमोहादिषु केवलयोगसद्भावे वेदनीयलक्षणा प्रकृतिस्तत्प्रदेशाश्च बध्यन्ते, अयोग्यवस्थायां तु योगाभावे न बध्यन्त इति ज्ञायते प्रकृतिप्रदेशबन्धयोर्योग एव प्रधानं कारणम्, योगस्तावज्जीवस्य वीर्यमुच्यते । तत्र सूक्ष्मनिगोदस्यापि सर्वजघन्यवीर्यस्य प्रदेशाः केचिदल्पवीर्याः केचिद्बहुबहुतरबहुतमादिवीर्योपेतास्तत्र सर्वजघन्यवीर्ययुक्तस्यापि प्रदेशस्य सम्बन्धि वीर्यं प्रज्ञाच्छेदेन छिद्यमानमसंख्येयलोकाकाशप्रदेशप्रमाणान् भागान् प्रयच्छति । तस्योत्कृष्टवीर्ययुक्ते प्रदेशे यद्वीर्यं तदेतेभ्योऽसंख्येयगुणान् भागान् प्रयच्छति । तत्र पर्याप्ताः सर्वे स्वप्रायोग्ये सर्वजघन्ययोगस्थाने जघन्यतः समयं उत्कृष्टतश्चतुरः समयान् यावद्वर्त्तन्ते ततः परमन्यद्योगस्थानमुपजायते । स्वप्रायोग्योत्कृष्टयोगस्थाने तु जघन्यतः समयमुत्कर्षस्तु द्वौ समयौ । मध्यमेषु तु जघन्यतः समयमुत्कृष्टतस्तु समयत्रिकादारभ्याष्टौ यावत् । अपर्याप्तास्तु सर्वेऽप्येकस्मिन् योगस्थाने एकमेव समयमवतिष्ठन्ते, ततः परमसंख्येयगुणवृद्धेषु प्रतिसमयमन्यान्ययोगस्थानेषु संक्रामन्ति । एवं जघन्ये योगे जघन्यं मध्यमे मध्यममुत्कृष्टे तूत्कृष्टं प्रदेशबन्धं जीवः करोति । 'ठिइ अणुभागं' ति स्थितिश्चानुभागश्च तत्कषायात् करोति । कषाया ह्युदीर्णा नानाजीवानां कालभेदेन एकजीवस्य वा सर्वजघन्याया अपि ज्ञानावरणादिकर्मस्थितेर्निर्वर्तकान्यसंख्येयलोकाकाशप्रदेशप्रमाणान्यन्तर्मुहूर्त्तकान्यध्यवसायस्थानानि जनयन्ति । समयाधिकतज्जघन्यस्थितिजनकानि तु त एव, तेभ्यस्तानि विशेषाधिकानि जनयन्ति, एवं तावत् यावत्सर्वोत्कृष्टस्थितिजनकाध्यवसायस्थानानि विशेषाधिकानि निर्वर्त्तयन्ति, एतानि च सर्वाण्यपि मिलितान्यसंख्येयलोकाकाशप्रदेशप्रमाणान्येव भवन्ति । तदेवमेतैः कषायजनिताध्यवसायस्थानैर्जन्यत्वात्कर्मणः स्थितिः कषायप्रत्ययसिद्धा, तेषामेव कषायाणां सम्बन्धि यद्दलिकमुदयप्राप्तं तत्र यदनुभागस्थानमुदेति तेन जीवस्याध्यवसायो जन्यते, तद्वशेन

बध्यमानकर्मणामनुभागो निष्पद्यते । सर्वेष्वपि कषायकर्मस्कन्धेष्वसंख्येयलोकाकाशप्रदेशप्रमाणान्यनुभागस्थानानि भवन्ति । ज्ञानावरणादिसमस्तकर्मस्कन्धेष्वप्येतावन्त्येवामूनि भवन्ति, परं तावदिह कषाया एव कारणत्वेन विचारयितुं प्रक्रान्ताः । तत्र जघन्यान्यनुभागस्थानान्युत्कृष्टतश्चतुरः समयान् यावदुदये समागच्छन्ति, मध्यमानि तु कानिचित् त्रिसपराणि चतुरोऽन्यानि पञ्चान्यानि षडपराणि सप्तान्यानि त्वष्टौ समयान् यावदुत्कृष्टत उदये समागच्छन्त्युत्कृष्टानुभागस्थानानि तूत्कृष्टतो द्वौ समयौ यावदुदये समागच्छन्ति, जघन्यतस्तु सर्वाण्यपि समयस्थितीनि एव भवन्त्यतस्तज्जन्यो जघन्यमध्यमोत्कृष्टभेदभिन्नोऽध्यवसायोऽप्येतावत्कालस्थितिक एव । कषायसद्भावे प्रमत्तादिषु स्थित्यनुभागबन्धौ भवतः, कषायाभावे तूपशान्तमोहादिषु न भवत इति ज्ञायते, एतयोः कषायाः प्रधानं कारणम् ॥९५॥९६॥

अथ श्रेणिस्वरूपं विवक्षुः, सा च घनीकृतलोकस्वरूपप्ररूपणापूर्विकैव वक्तुं शक्यतेऽतो घनस्वरूपं बहूपयोगित्वात् प्रतरस्वरूपं चाह-

**चउदसरज्जू लोगो बुद्धिकओ होइ सत्तरज्जुमाणघणो ।**
**तद्दीहेगपएसा सेढी पयरो य तव्वग्गो ॥९७॥**

चउ० चतुर्दशरज्जवो यस्य स, तथा रज्जुप्रमाणं तु स्वयंभूरमणसमुद्रस्य पौरस्त्य-पाश्चात्यवेदिकान्तं यावदवसेयम् । उच्छ्रयमानमिदमस्य—→अधस्ताद्देशोनसप्तरज्जुविस्तरस्तिर्यग्लोकमध्ये एकरज्जुविस्तारो, ब्रह्मलोकमध्ये पञ्चरज्जुविस्तीर्ण उपरि लोकान्ते त्वेकरज्जुविस्तृतः, शेषस्थानेषु पुनः कोऽपि कियानस्य विस्तर इत्येवंरूपो लोको बुद्ध्या घनीकृतः सप्तरज्जुप्रमाणः स्यात् । तद्यथा—→रज्जुविस्तीर्णायास्त्रसनाड्या दक्षिणदिग्वर्त्यधोलोकखण्डमधो देशोनरज्जुत्रयविस्तृतं क्रमेण हीयमानविस्तरं यावदुपरि रज्ज्वसंख्येयभागविस्तरं सातिरेकं सप्तरज्जूच्छ्रयं गृहीत्वा त्रसनाडिकाया एवोत्तरदिग्भागे विपरीतं योज्यते, एवमुपरितनवर्तिखण्डद्वयमपि प्रत्येकं ब्रह्मलोकमध्ये द्विरज्जुविस्तरं उपर्यलोकसमीपेऽधो रत्नप्रभाक्षुल्लकप्रतर-समीपे चाङ्गुलसहस्रभागविस्तरं देशोनसार्धरज्जुत्रयोच्छ्रितं दक्षिणपार्श्वादुत्तरपार्श्वे वैपरीत्येन स्थाप्यते, एवं च कृते उर्ध्वलोकार्द्धं द्वाभ्यामङ्गुलसहस्रभागाभ्यामधिकरज्जुत्रयविष्कम्भं देशोनसप्तरज्जूच्छ्रितं बाहल्यतस्तु ब्रह्मलोकमध्ये पञ्चरज्जुबाहल्यमन्यत्राऽनियतं जायते, इदं चोपरितनमर्धं गृहीत्वाऽधस्तनसंवर्तितलोकार्द्धस्योत्तरपार्श्वे स्थाप्यते, एवं च योजिते आधस्त्यखण्डोच्छ्रये यत्सप्तरज्जूनामधिकं तत्खण्डित्वोपरितनयोजितखण्डस्य बाहल्ये उर्ध्वायतं स्थाप्यते, एवं च सातिरेकाः पञ्चरज्जवः क्वचिद् बाहल्यं सिध्यति

तथाऽऽधरत्यखण्डमधस्ताद् यथासम्भवं देशोनसप्तरज्जुबाहल्यमत उपरितनखण्डबाहल्याद् देशोनरज्जुद्वयमत्रातिरिच्यते इत्यस्मादूर्ध्वं गृहीत्वोपरितनखण्डबाहल्ये संयोज्यते, एवं बाहल्यतः सर्वमप्येतच्चतुरस्रीकृत-नभःखण्डं कियत्यपि प्रदेशे रज्ज्वसंख्येयभागाधिकाः षड् रज्जवः स्युः, व्यवहारतस्तु सर्वं सप्तरज्जुबाहल्यम्, आयामविष्कम्भाभ्यां प्रत्येकं देशोनसप्तरज्जुप्रमाणं, व्यवहारतस्त्वत्रापि प्रत्येकं सप्तरज्जुप्रमाणता ज्ञेया । एवं बुद्धिकृतः सप्तरज्जुमानो घनः स्यात्, 'तद्दीहेगपएस'त्ति तस्य सप्तरज्जुमितस्य लोकस्य दैर्घ्यं यस्याः सा तद्दैर्घ्या एकैकप्रदेशा श्रेणिरुच्यते, तस्याः श्रेणेर्वर्गः प्रतरो भवति ॥९७॥

## प्रदेशबन्धः समाप्तः ॥

अधुना चशब्दसूचिते उपशमश्रेणिक्षपकश्रेणी प्राह—

**अणदंसनपुंसित्थी वेयछक्कं च पुरिसवेयं च ।**
**दो दो एगंतरिए सरिसे सरिसं उवसमेइ ॥९८॥**

अण० इहोपशमश्रेणिकृदप्रमत्तयतिरेव, *अन्ये* त्वविरतसम्यग्दृष्टिदेशविरतप्रमत्ताप्रमत्तयतीनामन्यतमः । अणन्त्याकारयन्ति नरकायुरित्यणाः, अथ सूचनादनन्तानुबन्धिनस्तत्रादौ अन्तर्मुहूर्तेन युगपत् क्रोधादीनामुपशमः, दर्शनं दर्शस्तत् त्रिधा मिथ्यात्वाद्यन्तर्मुहूर्तेन युगपत्, एवं सर्वत्र युगपदुपशमकालोऽन्तर्मुहूर्तं, नर आरम्भको नपुंसमन्तर्मुहूर्तेन, अथ स्त्री तदादौ नपुंस्त्वं ततो नृवेदं ततः स्त्रीवेदं, नपुंस्त्वादौ स्त्रीवेदं ततो नृवेदं षष्ठे स्थाने स्त्रीयं[१] ततो द्वौ द्वौ द्वितीयतृतीयौ क्रोधौ सदृशौ । ततस्तुर्यं क्रोधं क्रोधत्वात् सादृश्यं तुर्यमेकाकिनमेवान्तर्मुहूर्तेन, एवं मानादीन्, तुर्यलोभं शमयन् त्रिधा कृत्वा द्वौ भागौ युगपदुपशमय्य तृतीयं संख्येयखण्डानि कृत्वा पृथक् पृथक् कालभेदेन शमयति, तत एषां यमन्त्यं खण्डं तदसंख्यखण्डानि कृत्वा समये समये एकैकं शमयति, दर्शनसप्तके शान्तेऽपूर्वकरणोऽनिवृत्तिबादरो वोच्यते । तत ऊर्ध्वमनिवृत्तिबादरो यावत्संख्येयान्तिमखण्डम्, चरमस्य संख्येयखण्डस्यासंख्येयखण्डानि शमयन् सूक्ष्मसंपरायः । ननूपशमश्रेणिकोऽप्रमत्तसंयतः स च सप्तकक्षयात्, अन्यथा तेषामुदये न सम्यक्त्वाद्याप्तिः । अधुना तेषां किं शमोक्तिः ? आह-पूर्वं तेषां क्षयोपशम उक्तोऽधुना तूपशमः ।

---

१- ०कालोऽन्तर्मुहूर्तं वाच्यः, ततोऽनुदीर्णमपि नपुंसकवेदम् । यदि पुरुषः प्रारम्भकः ततः प्रथमं नपुंस्त्वं ततः स्त्रीवेदं ततो हास्यादिषट्कं ततः पुरुषवेदम्, अथ स्त्री तदादौ नपुंस्त्वं ततो नृवेदं ततःषट्कं ततःस्त्रीत्वं, नपुंसकस्त्वादौ स्त्रीवेदं ततो नृवेदं [ततः षट्कं ततः] षट्स्थाने स्त्रीयम्- पा० ।

ननु क्षयोपशमोऽपि उदिते कर्मांशे क्षीणेऽनुदिते चोपशान्ते, उपशमोऽप्येवं ततः को विशेषः? आह- क्षयोपशमे तदावरणकर्मणः प्रदेशतोऽनुभवोऽस्ति, उपशमे तु स न विद्यते । यतः—

*'वेएइ संतकम्मं खओवसमिएत्थ नाणुभावं सो उवसंतकसाओ पुण वेएइ न संतकम्मंपि'* ॥

[विशे० गा० १२९३] ॥९८॥

अणमिच्छमीससम्मं तिआउइगविगलथीणतिगुज्जोयं ।
तिरिनरयथावरदुगं साहारायवअडनपुत्थी ॥९९॥

अण० ति'आउ' त्ति देवनारकतिर्यग्रूपमायुस्त्रिकम् । 'अड' त्ति अप्रत्याख्यानप्रत्याख्यानावरणरूपं कषायाष्टकम् ॥९९॥

छगपुमसंजलणादोनिद्दाविग्घवरणखए नाणी ।
देविंदसूरिलिहियं सयगमिणं आयसरणट्ठा ॥१००॥

छग० हास्यरत्यरतिशोकभयजुगुप्सारूपं हास्यषट्कम् ॥१००॥

## ॥ इति शतकावचूरिः ॥

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

॥ नमोनमः श्रीगुरुप्रेमसूरये ॥

## श्रीगुणरत्नसूरिविरचित- अवचूर्ण्युपेतम्

## पूर्वाचार्यविरचितं

# सप्ततिकाप्रकरणम्

**सिद्धपएहिं महत्थं बंधोदयसंतपयडिठाणाणं ।**
**वोच्छं सुण संखेवं नीसंदं दिट्ठिवायस्स ॥१॥**

सिद्ध० सिद्धान्यविचलानि पदानि येषु ग्रन्थेषु ते सिद्धपदाः = ***कर्मप्रकृतिप्राभृतादयो***, न हि तेषां पदानि कैश्चिदपि चालयितुं शक्यन्ते, तेषां सर्वज्ञोक्तार्थानुसारित्वात्, तेभ्यो बन्धोदय-सत्प्रकृतिस्थानानां संक्षेपं वक्ष्ये, शृण्विति क्रियापदं च श्रोतॄणां कथंचित् प्रमादसम्भवेऽप्याचार्येण नोद्विजितव्यमिति ख्यापनार्थम् ॥१॥

संवेधरूपं संक्षेपं विवक्षुः शिष्यान् प्रश्नं कारयति—

**कइ बंधंतो वेयइ कइ कइ वा पयडिसंतठाणाणि ।**
**मूलुत्तरपगईसुं भंगविगप्पा उ बोधव्वा ॥२॥**

कइ० कति कर्मप्रकृतीर्बध्नन् कति कर्मप्रकृतीर्वेदयते ? कति वा तथा तथा बध्नतो वेदयमानस्य च प्रकृतिसत्कर्मसत्तास्थानानि= प्रकृतिसत्तास्थानानि ? इति प्रश्ने कृते आचार्यो भङ्गजालमनेकप्रकारं वचोमात्रेण यथावत्प्रतिपादयितुमशक्यं जानानः सामान्येनैवाह-मूलप्रकृतिषूत्तरप्रकृतिषु च प्रत्येकं बन्धोदयसत्तासंवेधमधिकृत्य चिन्त्यमाना सुबहवो भङ्गाः स्युः, ते चात्र यथावद् विविक्ततया प्रतिपाद्यमानाः सम्यग् बोद्धव्याः ॥२॥

बन्धादिप्रकृतिस्थानानां संवेधमाह—

**अट्ठविहसत्तछब्बंधगेसु अट्ठेव उदयसंताइं ।**
**एगविहे तिविगप्पो एगविगप्पो अबंधम्मि ॥३॥**

अट्ठ० अष्टविध-सप्तविध-षड्विधबन्धकेषु प्रत्येकमुदये सत्तायां चाष्टौ कर्माणि प्राप्यन्ते । एतेन च त्रयो भङ्गा दर्शितास्तद्यथा—>अष्टविधबन्धोऽष्टविध उदयोऽष्टविधा सत्ता, एष विकल्प आयुर्बन्धकाले, एष मिथ्यादृष्ट्यादीनामप्रमत्तान्तानामवसेयो न शेषाणामायुर्बन्धाभावात् । तथा सप्तविधो बन्धोऽष्टविध उदयोऽष्टविधा सत्ता, एष विकल्प आयुर्बन्धाभावे मिथ्यादृष्ट्यादीनामनिवृत्तिबादरसम्परायान्तानामवसेयः । तथा षड्विधो बन्धोऽष्टविध उदयोऽष्टविधा सत्ता, एष विकल्पः सूक्ष्मसम्परायाणां । तथा एकविधे बन्धे एकस्मिन् केवलवेदनीये बध्यमाने इत्यर्थस्त्रयो विकल्पास्तद्यथा—> एकविधो बन्धः सप्तविध उदयोऽष्टविधा सत्ता, एष विकल्प उपशान्तमोहगुणस्थानके प्राप्यते, तत्र मोहनीयस्योदयो नास्ति सत्ता पुनरस्ति ।[१] तथा एकविधो बन्धः सप्तविध उदयः सप्तविधा सत्ताऽयं क्षीणमोहगुणस्थानके प्राप्यते, तत्र मोहनीयस्य निःशेषोऽपगमात् । तथा एकविधो बन्धश्चतुर्विध उदयश्चतुर्विधा सत्ताऽयं सयोगिकेवलिनि प्राप्यते, तत्र घातिकर्मणां सामस्त्येनापगमात् । तथाऽबन्धे=बन्धाभावे एकविकल्पस्तद्यथा—>चतुर्विध उदयश्चतुर्विधा सत्ताऽयमयोगिगुणस्थानके लभ्यते, तत्र योगाभावाद् बन्धो न स्यादुदयसत्ते चाघातिकर्मणां भवतः ॥३॥

---

१- ०नीयस्योदयो बन्धश्चतुर्विध उदयश्च चतुर्विधा सत्ता पुनरस्ति- हे० ।

अधुनैतानेव सप्तविकल्पान् जीवस्थानेषु चिन्तयन्नाह—

**सत्तट्ठबंधअट्ठुदयसंत तेरससु जीवठाणेसु ।**
**एगम्मि पंच भंगा दो भंगा हुंति केवलिणो ॥४॥**

सत्त० त्रयोदशस्वाद्येषु जीवस्थानेषु प्रत्येकं द्वौ द्वौ विकल्पौ भवतस्तद्यथा—→सप्तविधो बन्धोऽष्टविध उदयोऽष्टविधा सत्ता, अयमायुर्बन्धकालं मुक्त्वा शेषकालं सर्वदैव लभ्यतेऽष्टविधो बन्धोऽष्टविध उदयोऽष्टविधा सत्ताऽयमायुर्बन्धकाले, आन्तर्मौहूर्त्तिक, आयुर्बन्धकालस्य जघन्येनोत्कर्षेण चान्तर्मुहूर्त्तप्रमाणत्वात् । तथैकस्मिन् पर्याप्तसंज्ञिपञ्चेन्द्रियलक्षणे पञ्च भङ्गाः भवन्ति, तत्रादिमौ द्वौ भङ्गौ प्रागिव भावनीयौ । त्रयस्तु शेषा इमे षड्विधो बन्धोऽष्टविध उदयोऽष्टविधा सत्ताऽयं भङ्गः सूक्ष्मसम्परायस्योपशमश्रेण्यां क्षपकश्रेण्यां वा वर्तमानस्य द्रष्टव्यः, एकविधो बन्धः सप्तविध उदयोऽष्टविधा सत्ताऽयमुपशान्तमोहगुणस्थानके प्राप्यते, एकविधो बन्धः सप्तविध उदयः सप्तविधो सत्ताऽयं क्षीणमोहगुणस्थानके । तथा द्वौ भङ्गौ केवलिनो भवतस्तद्यथा एकविधो बन्धश्चतुर्विध उदयश्चतुर्विधा सत्ताऽयं सयोगिकेवलिनो, बन्धाभावे चतुर्विध उदयश्चतुर्विधा सत्ताऽयमयोगिकेवलिनः, इह केवलिग्रहणं संज्ञिन्यवच्छेदार्थं । केवली मनोरहितत्वान्न संज्ञी ॥४॥

अधुना तानेव सप्तविकल्पान् गुणस्थानकेषु चिन्तयन्नाह—

**अट्ठसु एगविगप्पो छसु वि गुणसंन्निएसु दुविगप्पो ।**
**पत्तेयं पत्तेयं बंधोदयसंतकम्माणं ॥५॥**

अट्ठसु० अष्टसु गुणस्थानेषु सम्यग्मिथ्यादृष्ट्यपूर्वकरणानिवृत्तिबादरसूक्ष्मसम्परायोपशान्तमोहक्षीणमोहसयोगिकेवलि[अयोगिकेवलि]लक्षणेषु प्रत्येकं बन्धोदयसत्कर्मणामेको विकल्पस्तद्यथा—→सम्यग्मिथ्यादृष्ट्यपूर्वकरणानिवृत्तिबादरेषु सप्तविधो बन्धोऽष्टविध उदयोऽष्टविधा सत्ता, एष्वायुर्बन्धाभावादष्टविधो बन्धो न स्यात् । सूक्ष्मसम्पराये षड्विधो बन्धोऽष्टविध उदयोऽष्टविधा सत्ता, सूक्ष्मसम्परायो हि बादरकषायोदयाभावादायुर्मोहनीयं च न बध्नाति । उपशान्तकषायस्य केवलवेदनीयस्यैव बन्धकत्वादेकविधो बन्धो, मोहनीयस्योदयाभावात् सप्तविध उदयोऽष्टविधा सत्ता । क्षीणमोहस्यैकविधो बन्धः सप्तविध उदयः सप्तविधा सत्ता, अत्र मोहनीयं क्षीणत्वादुदये सत्तायां च न प्राप्यते । सयोगिकेवलिन्येकविधो बन्धश्चतुर्विध

उदयश्चतुर्विधा सत्ता । अयोगिनि चतुर्विध उदयश्चतुर्विधा सत्ता । तथा षट्सु गुणसंज्ञितेषु गुणस्थानकेषु मिथ्यादृष्टिसास्वादनाविरतसम्यग्दृष्ट्यादिषु प्रत्येकं बन्धोदयसत्कर्मणां द्वौ द्वौ विकल्पौ भवतस्तद्यथा—›आयुर्बन्धकालेऽष्टविधो बन्धोऽष्टविध उदयोऽष्टविधा सत्ता । आयुर्बन्धकालं विना सप्तविधो बन्धोऽष्टविध उदयोऽष्टविधा सत्ता । मूलप्रकृतीराश्रित्य बन्धादिप्रकृतिस्थानानां परस्परं संवेधः उक्तः स्थापितं च ।

अधुना उत्तरप्रकृतीरधिकृत्याह—

**बंधोदयसंतंसा नाणावरणंतराइए पंच ।**
**बंधोवरमे वि तहा उदसंता हुंति पंचेव ॥६॥**

बंधो० ज्ञानावरणेऽन्तराये च प्रत्येकं बन्धोदयसत्तारूपा अंशाः पञ्च=पञ्चप्रकृत्यात्मकाः । अयमर्थो—› ज्ञानावरणेऽन्तराये च प्रत्येकं बन्धमुदयं सत्तां चाधिकृत्य सदैव ध्रुवबन्धित्वात्, पञ्च पञ्च मत्याद्यावरणरूपा दानान्तरायादिरूपाश्च प्रकृतयः प्राप्यन्ते, ततो ज्ञानावरणस्य बन्धकाले पञ्चविधो बन्धः पञ्चविध उदयः पञ्चविधा सत्ता, एवमन्तरायस्यापि, एष च भङ्गो द्वयोरपि सूक्ष्मसम्परायगुणस्थानकं यावदवगन्तव्यः, तथा बन्धोपरमेऽपि=बन्धाभावेऽपि ज्ञानावरणान्तराययोस्तथेति समुच्चये उदयसत्ते भवतः पञ्चैव पञ्चप्रकृत्यात्मके, एष च भङ्गो द्वयोरप्युपशान्तमोहक्षीणमोहे च प्राप्यते ॥६॥

दर्शनावरणस्योत्तरप्रकृतीरधिकृत्य बन्धादिस्थानप्ररूपणार्थमाह—

**बंधस्स य संतस्स य पगइट्ठाणाइं तिन्नि तुल्लाइं ।**
**उदयट्ठाणाइं दुवे चउ पणगं दंसणावरणे ॥७॥**

बंध० दर्शनावरणीये बन्धस्य सत्तायाश्च परस्परं त्रीणि प्रकृतिस्थानानि स्युस्तद्यथा—›नव-षट्-चतस्रश्च । तत्र सर्वप्रकृत्यात्मकं बन्धस्थानं मिथ्यादृष्टौ सास्वादने वा, तच्चाभव्यानधिकृत्याऽनाद्यपर्यवसानम्, भव्यानधिकृत्यानादिसपर्यवसानम्, सम्यक्त्वात्प्रतिपत्य मिथ्यात्वं गतानां सादिसपर्यवसानम् । तच्च जघन्येनान्तर्मुहूर्तं यावदुत्कर्षतो देशोनाऽपार्द्धपुद्गलपरावर्त्तम् । स्त्यानर्द्धित्रिकहीनं षट्प्रकृत्यात्मकं बन्धस्थानं सम्यग्मिथ्यादृष्टिगुणस्थानादारभ्याऽपूर्वकरणस्य प्रथमं भागं यावत्, तच्च जघन्येनान्तर्मुहूर्तं कालमुत्कर्षतो द्वे षट्षष्टी सागरोपमाणां सम्यक्त्वस्यापान्तराले सम्यग्मिथ्यात्वान्तरितस्य एतावन्तं कालमवस्थानसम्भवात्, तत ऊर्ध्वं कश्चित् क्षपकश्रेणिं प्रतिपद्यते कश्चित्पुनर्मिथ्यात्वं, मिथ्यात्वे च प्रतिपन्ने सत्यवश्यं

नवविधो बन्धः । निद्रा-प्रचलाहीनं चतुष्प्रकृत्यात्मकं बन्धस्थानमपूर्वकरणद्वितीयभागादारभ्य सूक्ष्मसपरायं यावत्, जघन्येनैकं समयमुत्कर्षतोऽन्तर्मुहूर्तम्, तत्रोपशमश्रेण्यामपूर्वकरणस्य द्वितीयभागप्रथमसमये चतुर्विधं बन्धमारभ्यानन्तरसमये कश्चित्कालं कृत्वा दिवं गतः सन्नविरतः स्यादविरतत्वे च षड्विधो बन्ध इत्येकसामायिकी चतुर्विधबन्धस्थानस्य स्थितिः । तथा नवप्रकृत्यात्मकं सत्तास्थानं दर्शनावरणस्य कालमधिकृत्य द्विधाऽनाद्यपर्यवसितमनादिसपर्यवसितं च, सादिपर्यवसानं तु न स्यात्, नवप्रकृत्यात्मकसत्ता-स्थानव्यवच्छेदो हि क्षपकश्रेण्यां स्यान्न च क्षपकश्रेणितः प्रतिपातोऽस्त्येतच्च सत्तास्थानमुपशमश्रेणिमधि-कृत्योपशान्तमोहगुणस्थानं यावदवाप्यते, क्षपकश्रेणिमधिकृत्य पुनरनिवृत्तिगुणस्थानस्याद्यं भागं । तथा षट्प्रकृत्यात्मकं सत्तास्थानं जघन्येनोत्कर्षेण चान्तर्मुहूर्त्तप्रमाणम्, तच्चाऽनिवृत्तिगुणस्थानद्वितीयभागादारभ्य क्षीणमोहद्विचरमसमयं यावदवसेयम् । चतुष्प्रकृत्यात्मकं त्वेकसामयिकं, क्षीणकषायचरमसमयभावित्वात् ।

उदयस्थाने पुनर्द्वौ, तद्यथा→ चतस्रः पञ्च च । तत्र चक्षुर्दर्शनावरणादीनां समुदायो ध्रुवोदय इत्येकं प्रकृतिस्थानमेतासु चतसृषु मध्ये निद्रादीनां पञ्चानां मध्यादन्यतमस्यां प्रकृतौ प्रक्षिप्तायां पञ्च, न हि निद्रादयो द्व्यादिका युगपदुदयमायान्ति किन्त्वेकस्मिन्काले एकैवान्यतमा निद्रादयश्च ध्रुवोदया न भवन्ति, कालादिसापेक्षत्वात्, अत इदं पञ्चप्रकृत्यात्मकमुदयस्थानं कदाचिल्लभ्यते ॥७॥

उक्तानि दर्शनावरणस्य बन्धोदयसत्ता अधिकृत्य प्रकृतिस्थानान्यधुना संवेधमाह—

**बीयावरणे नवबंधगेसु चउ पंच उदय नव संता ।**
**छच्चउबंधे चेवं चउबंधुदए छलंसा य ॥८॥**
**उवरयबंधे चउ पण नवंस चउरुदय छच्च चउसंता ।**
**वेयणियाउयगोए विभज्ज मोहं परं वोच्छं ॥९॥**

बीया० उव० द्वितीयावरणे=दर्शनावरणे नवबन्धकेषु=मिथ्यादृष्टिसासादनेषूदयश्चतुर्विधः पञ्चविधो वा, सत्तामधिकृत्य पुनः प्रकृतिस्थानं नव=नवप्रकृत्यात्मकं, तदेवं नवविधबन्धकेषु द्वौ विकल्पौ दर्शितौ, तथाहि→नवविधो बन्धश्चतुर्विध उदयो नवविधा सत्ताऽयं भङ्गो निद्रोदयाभावे, निद्रोदये तु नवविधो बन्धः पञ्चविध उदयो नवविधा सत्ता । तथा षड्बन्धे चतुर्बन्धे च एवं=पूर्वोक्तप्रकारेणोदयसत्तास्था-नानि द्रष्टव्यानि । अयमर्थो→ये षड्विधबन्धकाः सम्यग्मिथ्यादृष्ट्यविरतसम्यग्दृष्ट्याद्यप्रमत्तान्ताः कियत्का-

लमपूर्वकरणाश्च तेषां चतुर्विधः पञ्चविधो वा उदयो नवविधा सत्ता, एतेन च द्वौ भङ्गौ, तद्यथा→षड्विधो बन्धश्चतुर्विध उदयो नवविधा सत्ता, अथवा षड्विधो बन्धः पञ्चविध उदयो नवविधा सत्ता । एतौ च द्वौ भङ्गौ क्षपकं मुक्त्वाऽन्यत्र सर्वत्रापि प्राप्येते, क्षपके त्वेक एव विकल्पस्तद्यथा→षड्विधो बन्धश्चतुर्विध उदयो नवविधा सत्ता । क्षपकस्य ह्यत्यन्तविशुद्धत्वेन निद्रा-प्रचलयोर्नोदयः न सम्भवति । तथा चतुर्विधबन्धकेषु कियत्कालमपूर्वकरणेष्वनिवृत्तिबादरेषु चोपशमश्रेणिं प्रतीत्य चतुर्विधः पञ्चविधो वा उदयो नवविधा सत्ता । क्षपकश्रेणिमधिकृत्य पुनश्चतुर्विध एवोदयः, कारणमत्र प्रागेवोक्तम् । यावच्च क्षपकश्रेण्यामपि स्त्यानर्द्धित्रिकं न क्षीयते तावत्सत्ता नवविधैव, तस्मिंस्तु क्षीणे षड्विधैव । तथा चाह- 'चउबंधुदए छलंसा य' त्ति, इहांशः=सत्कर्माभिधीयते । चतुर्विधे बन्धे चतुर्विध उदये अनिवृत्तिबादराद्धायाः संख्येयेभ्यो भागेभ्यः परतः स्त्यानर्द्धित्रिके क्षीणे षड्विधा सत्ता, अयं च तावत् प्राप्यते यावत्सूक्ष्मसंपरायाद्धायाश्चरमसमयः, परतस्तु न प्राप्यते, बन्धाभावात्; तदेवं चतुर्विधबन्धकस्य त्रयो भङ्गास्तद्यथा→चतुर्विधो बन्धश्चतुर्विध उदयो नवविधा सत्ताऽयमुपशमश्रेण्यां क्षपकश्रेण्यां वा यावत् स्त्यानर्द्धित्रिकं न क्षीयते । चतुर्विधो बन्धः पञ्चविध उदयो नवविधा सत्ता, अयमुपशमश्रेण्याम् । तथा चतुर्विधो बन्धश्चतुर्विध उदयः षड्विधा सत्ताऽयं क्षपकश्रेण्यां स्त्यानर्द्धित्रिकक्षयानन्तरमवसेयः । तथोपरते=व्य- वच्छिन्ने बन्धे चतुर्विधः पञ्चविधो वा उदयो नवविधा सत्ता, एतौ द्वौ भङ्गावुपशान्तमोहगुणस्थानके प्राप्येते । उपशमश्रेण्यां हि निद्रा-प्रचलयोरुदयः सम्भवति, स्त्यानर्द्धित्रिकं च न क्षयमुपगच्छति, ततश्चतुर्विधः पञ्चविधो वा उदयो नवविधा सत्ता प्राप्यते । तथा चतुर्विध उदयः षड्विधा सत्ताऽयं क्षीणकषायस्य द्विचरमसमयं यावदवाप्यते, तथा चतुर्विध उदयश्चतुर्विधा सत्ताऽयं क्षीणकषायस्य चरमसमये, निद्रा-प्रचलयोर्द्विचरमसमय एव क्षपितत्वात् । तदेवं दर्शनावरणे सर्वसंख्ययैकादश विकल्पाः । यदि पुनः क्षपकक्षीणकषायेष्वपि निद्रा-प्रचलयोरुदय इष्यते तर्हि चतुर्विधो बन्धः पञ्चविध उदयः षड्विधा सत्ता, बन्धाभावे पञ्चविध उदयः षड्विधा सत्तेत्येवं त्रयोदश ।

अधुना वेदनीयायुर्गोत्रेषु संवेधविकल्पोपदर्शनार्थमाह-वेदनीये आयुषि गोत्रे च बन्धादिस्थानानि संवेधमाश्रित्य विभजेद्=विकल्पयेत्, तत्र वेदनीयस्य सामान्येनैकं बन्धस्थानम्, तद्यथा→सातमसातं वा, द्वयोर्विरुद्धत्वेन युगपद्बन्धाभावादेवमुदयेऽप्येकं, सत्तास्थाने द्वे, तद्यथा→द्वे एकं च, तत्र यावदेकं न क्षीयतेऽन्यतरत् तावद् द्वे अपि सती, अन्यतरस्मिंश्च क्षीणे एकम् । अधुना संवेध उच्यते-असातस्य बन्धोऽसातस्योदयः सातासाते सती, अथवाऽसातस्य बन्धः सातस्योदयः सातासाते सती । एतौ द्वौ

भङ्गौ मिथ्यादृष्टिगुणस्थानादिप्रमत्तान्तं यावत्प्राप्येते, परतोऽसातस्य बन्धाभावात् सातस्य बन्धः सातस्योदयः सातासाते सती अथवा सातस्य बन्धोऽसातस्योदयः सातासाते सती, एतौ द्वौ भङ्गौ मिथ्यादृष्टेः सयोगियावत्सम्भवतः, ततः परतो बन्धाभावेऽसातस्योदयः सातासाते सती अथवा सातस्योदयः सातासाते सती, एतौ भङ्गौ अयोगिद्विचरमसमयं यावत्प्राप्येते, चरमसमये त्वसातस्योदयोऽसातस्य सत्ता, यस्य द्विचरमसमये सातं क्षीणं यस्य त्वसातं क्षीणं तस्य सातस्योदयः सातस्य सत्ता, एतौ भङ्गावेकसामायिकौ सर्वसंख्यया वेदनीयस्याष्टौ भङ्गाः ।

तथायुष्येकं बन्धस्थानम्, चतुर्णामन्यतमत् परस्परविरुद्धत्वादेवमुदयस्थानमप्येकम्, द्वे सत्तास्थाने—>द्वे एकं च, तत्रैकं चतुर्णामन्यतमद् यावदन्यत्परभवायुर्न बध्यते, तस्मिंश्च बद्धे यावदन्यत्र परभवे नोत्पद्यते तावद् द्वे सती । संवेधमाह - तत्रायुषस्तिस्रोऽवस्थास्तद्यथा—>परभवायुर्बन्धकालावस्था, परभवायुर्बन्धकालात्पूर्वावस्था, परभवायुर्बन्धोत्तरकालावस्था च । तत्र नैरयिकस्य परभवायुर्बन्धकालात्पूर्वं नारकायुष उदयो नारकायुषः सत्ताऽयमाद्येषु चतुर्षु गुणस्थानकेषु, शेषगुणस्थानकस्य नरकेष्वसम्भवात् । परभवायुर्बन्धकाले तिर्यगायुष्को बन्धो नारकायुष उदयो नारकतिर्यगायुषी सती, भङ्गोऽयं मिथ्यादृष्टेः सास्वादनस्य वा, द्वयोरेवाद्ययोर्गुणस्थानकयोस्तिर्यगायुषो बन्धसम्भवात् । अथवा मनुष्यायुषो बन्धो नारकायुष उदयो मनुष्यनारकायुषी सती, अयं मिथ्यादृष्टेः सासादनस्याविरतसम्यग्दृष्टेर्वा बन्धोत्तरकाले नारकायुष उदयो, नारक-तिर्यगायुषी सती, अयमाद्येषु चतुर्ष्वपि गुणस्थानकेषु तिर्यगायुर्बन्धानन्तरं कस्यापि सम्यक्त्वे सम्यग्मिथ्यात्वे वा गमनसम्भवात् । अथवा नारकायुष उदयो मनुष्यनारकायुषी सती । एवं सर्वसंख्यया पञ्चैव भङ्गाः ।

एवं देवानामपि पञ्चभङ्गा भावनीयाः ।

तथा [तिरश्चां नव विकल्पाः, बन्धात्पूर्वं] तिर्यगायुष उदयस्तिर्यगायुषः सत्ताऽयमाद्येषु पञ्चसु गुणस्थानकेषु परभवायुर्बन्धकालात्पूर्वं च, बन्धकाले तु नारकायुषो बन्धस्तिर्यगायुष उदयस्तिर्यग्नार-कायुषी सती, अयं मिथ्यादृष्टेरन्यत्र नरकायुषो बन्धाभावात् । अथवा तिर्यगायुषो बन्धस्तिर्यगायुष उदयस्तिर्यक्तिर्यगायुषी सती, अयं मिथ्यादृष्टेः सास्वादनस्य वा । अथवा मनुष्यायुषो बन्धस्तिर्यगायुष उदयो मनुष्यतिर्यगायुषी सती । अयं मिथ्यादृष्टेः सास्वादनस्य वा नान्यस्य, तिरश्चोऽविरतसम्यग्दृष्टेर्देशवि-रतस्य वा देवायुष एव बन्धसम्भवात् । अथवा देवायुषो बन्धस्तिर्यगायुष उदयो देवतिर्यगायुषी सती,

अयं मिथ्यादृष्टेः सास्वादनस्याऽविरतसम्यग्दृष्टेर्देशविरतस्य वा, न सम्यग्मिथ्यादृष्टेस्तस्यायुर्बन्धाऽभावात् । एते चत्वारो भङ्गाः परभवायुर्बन्धकाले । बन्धे तु व्यवच्छिन्ने तिर्यगायुष उदयो नारकतिर्यगायुषी सती, अयमाद्येषु पञ्चसु गुणस्थानेषु नरकायुर्बन्धानन्तरं सम्यक्त्वादावपि गमनात् । अथवा तिर्यगायुष उदयस्तिर्यक्तिर्यगायुषी सती, अथवा तिर्यगायुष उदयो मनुष्य-तिर्यगायुषी सती, अथवा तिर्यगायुष उदयो देवतिर्यगायुषी सत्येते त्रयो भङ्गा आद्येषु पञ्चसु गुणस्थानेषु । सर्वसंख्यया तिरश्चां नव भङ्गाः ।

तथा मनुष्यायुष उदयो मनुष्यायुषः सत्ताऽयमयोगिकेवलिनं यावत् । नारकायुषो बन्धो मनुष्यायुष उदयो नारक-मनुष्यायुषी सती, अयं मिथ्यादृष्टेः । तिर्यगायुषो बन्धो मनुष्यायुष उदय-स्तिर्यग्मनुष्यायुषी सती, अयं मिथ्यादृष्टेः सास्वादनस्य वा । मनुष्यायुषो बन्धो मनुष्यायुष उदयो मनुष्यमनुष्यायुषी सती, अयमपि मिथ्यादृष्टेः सास्वादनस्य वा । देवायुषो बन्धो मनुष्यायुष उदयो देवमनुष्यायुषी सती, अयमप्रमत्तगुणस्थानं यावत् । एते चत्वारो भङ्गाः परभवायुर्बन्धकाले । बन्धे तु व्यवच्छिन्ने मनुष्यायुष उदयो नारक-मनुष्यायुषी सती, अयमप्रमत्तगुणस्थानकं यावत्, नरकायुर्बन्धानन्तरं संयमप्रतिपत्तेरपि सम्भवात् । मनुष्यायुष उदयस्तिर्यग्मनुष्यायुषी सती, अयमप्यप्रमत्तगुणस्थानकं यावत् । मनुष्यायुष उदयो मनुष्यमनुष्यायुषी सती, अयमपि प्राग्वत् । मनुष्यायुष उदयो देवमनुष्यायुषी सती, अयमुपशान्तमोहगुणस्थानकं यावत्, देवायुषि बद्धेऽप्युपशमश्रेण्यारोहसम्भवात् । सर्वसंख्यया मनुष्याणां नव भङ्गाः । एवमायुषि सर्वसंख्यया २८ भङ्गाः ।

तथा गोत्रे एकं बन्धस्थानमेकमुदयस्थानं परस्परविरुद्धत्वाद् युगपद्बन्धोदयाभावः । द्वे सत्तास्थाने—→द्वे एकं च, उच्चैर्गोत्र-नीचैर्गोत्रे समुदिते द्वे, तेजस्कायिकवायुकायिकावस्थायामुच्चैर्गोत्रे उद्वलिते एकम्, अथवा नीचै-र्गोत्रेऽयोगिकेवलिनि द्विचरमसमये क्षीणे एकम् । संवेध उच्यते—नीचैर्गोत्रस्य बन्धो नीचैर्गोत्रस्योदयो नीचैर्गोत्रं सत्, अयं तेजस्कायिक-वायुकायिकेषु लभ्यते, तद्भवादुद्वृत्तेषु वा शेषजीवेष्वेक-द्वि त्रि-चतुस्तिर्यक्पञ्चेन्द्रियेषु कियत्कालं। नीचैर्गोत्रस्य बन्ध नीचैर्गोत्रस्योदय उच्चनीचैर्गोत्रे सती अथवा नीचैर्गोत्रस्य बन्ध उच्चैर्गोत्रस्योदय उच्चनीचैर्गोत्रे सती, एतौ भङ्गौ मिथ्यादृष्टिषु सास्वादनेषु वा, न सम्यग्मिथ्यादृष्ट्यादिषु, तेषां नीचैर्गोत्रबन्धाभावात् । तथोच्चैर्गोत्रस्य बन्धो नीचैर्गोत्रस्योदय उच्चनीचैर्गोत्रे सती, अयं मिथ्यादृष्ट्यादिषु देशविरतगुणस्थानं यावन्न परतः, तत्र नीचैर्गोत्रस्योदयाभावात् । तथोच्चैर्गोत्रस्य बन्ध उच्चैर्गोत्रस्योदय उच्चनीचैर्गोत्रे सती, अयं मिथ्यादृष्टेः सूक्ष्मसम्परायगुणस्थानकं यावत् परतो बन्धाऽभावात् । बन्धाभावे उच्चोदय उच्चनीचसत्ताऽयमुपशान्तमोहादयोगिद्विचरमसमयं यावत्, उच्चोदय

उच्चसत्ताऽयमयोगिचरमसमये । एवं सर्वसंख्यया भङ्गाः सप्त । अतः परं मोहं मोहनीयस्य बन्धादिस्थानानि वक्ष्ये ॥८॥९॥

**बावीस एक्कवीसा सत्तरसा तेरसेव नव पंच ।**
**चउ तिग दुगं च एक्कं बंधट्ठाणाणि मोहस्स ॥१०॥**[1]

बावीस० मोहनीयस्य द्वाविंशत्यादीनि दश बन्धस्थानानि । तत्र सम्यक्त्वसम्यग्मिथ्यात्वे बन्धे न भवतः, न च त्रयाणां वेदानां युगपद्बन्धः किन्त्वेककालमेकस्यैव, हास्यरतियुगलारतिशोकयुगले अपि न युगपद्बन्धमायातः किन्त्वेकतरमेव युगलम्, ततो मोहनीयस्योत्कर्षतः प्रभूतप्रकृतिबन्धो द्वाविंशतिः, सा च मिथ्यादृष्टिगुणस्थानके प्राप्यते । ततः सास्वादनसम्यग्दृष्टिगुणस्थानके मिथ्यात्वस्य बन्धाभावात् २१, यद्यप्यत्र नपुंसकवेदस्यापि बन्धो न स्यात् तथापि तत्स्थाने स्त्रीवेदः पुरुषवेदो वा प्रक्षिप्यते । ततो मिश्राविरतयोरनन्तानुबन्धिनामपि बन्धाभावात् १७ । ततो देशविरतेऽप्रत्याख्यानानां बन्धाभावात् १३ । ततोऽपि प्रमत्ताप्रमत्तापूर्वकरणेषु प्रत्याख्यानानां बन्धाभावात् ९, यद्यप्यरतिशोकयुगलं रूपं प्रमत्ते एव व्यवच्छिन्नं तथापि तत्स्थाने हास्यरतियुगलं प्रक्षिप्यते । ततो हास्यरतिभयजुगुप्सा अपूर्वकरणचरमसमये बन्धमाश्रित्य व्यवच्छिद्यन्त इत्यनिवृत्तिबादरसम्पराये प्रथमभागे पञ्चानां बन्धो, द्वितीयभागे पुंवेदस्य बन्धाभावात् ४, तृतीये भागे संज्वलनक्रोधस्य बन्धाभावात् ३, चतुर्थे भागे संज्वलनमानस्य बन्धाभावात् २, पञ्चमभागे संज्वलनमायाया अपि बन्धाभावादेकस्याः संज्वलनलोभप्रकृतेर्बन्धस्ततः परं बादरसम्परायोदयाभावात्तस्या अपि न बन्धः ॥१०॥

उदयस्थानान्याह—

**एक्कं व दो व चउरो एत्तो एक्काहिया दसुक्कोसा ।**
**ओहेण मोहणिज्जे उदयट्ठाणाणि नव हुंति ॥११॥**[2]

एक्कं० एकादीनि मोहनीयस्योदयस्थानानि नव स्युरेतानि चानिवृत्तिबादरादारभ्य पश्चानुपूर्व्या भाव्यन्ते । तत्र चतुर्णां संज्वलनानामन्यतमस्योदये एकमुदयस्थानं, तदेव वेदत्रयान्यतमवेदोदयप्रक्षेपे २, तत्रापि हास्यरतियुगलप्रक्षेपे ४, तत्रैव भयप्रक्षेपात् ५, जुगुप्साप्रक्षेपे ६, तत्रैव चतुर्णां प्रत्याख्यानानामन्यतमस्य प्रक्षेपे ७, तत्रैव चाप्रत्याख्यानानामन्यतमस्य प्रक्षेपे ८, तत्रैवानन्तानुबन्धिनामन्य-

---

१- तुलना- सप्ततिकाभाष्यगाथा १९ । २- तुलना- सप्ततिकाभाष्यगाथा -२५ ।

तमस्य प्रक्षेपे ९, तत्रैव मिथ्यात्वप्रक्षेपे १० । एतच्च सामान्येनोक्तं विशेषतस्त्वग्रे वक्ष्यति ॥११॥

सत्तास्थानान्याह—

**अट्ठगसत्तगछच्चउतिगदुगएगाहिया भवे वीसा ।**
**तेरस बारिकारस एत्तो पंचाइ एक्कूणा ॥१२॥**[1]

**संतस्स पगइठाणाइँ ताणि मोहस्स हुंति पन्नरस ।**
**बंधोदयसंते पुण भंगविगप्पा बहू जाण ॥१३॥**

अट्ठ० संत० मोहनीयस्य अष्टाविंशत्यादीनि सत्तास्थानानि १५ । तत्र सर्वप्रकृतिसमुदायः २८, ततः सम्यक्त्वे उद्बलिते २७, ततोऽपि सम्यग्मिथ्यात्वे उद्बलिते २६ अनादिमिथ्यादृष्टेर्वा षड्विंशतिः, अष्टाविंशतिसत्कर्मणोऽनन्तानुबन्धिचतुष्टयक्षये २४, ततो मिथ्यात्वे क्षपिते २३, ततोऽपि सम्यग्मिथ्यात्वे क्षपिते २२, ततः सम्यक्त्वे क्षपिते २१, ततोऽष्टस्वप्रत्याख्यानावरणप्रत्याख्यानावरणसंज्ञितेषु क्षीणेषु १३, ततो नपुंसकवेदे क्षपिते १२, ततोऽपि स्त्रीवेदे क्षपिते ११, ततः षट्सु नोकषायेषु क्षीणेषु ५, ततः पुरुषवेदे क्षीणे ४, ततोपि संज्वलनक्रोधे क्षपिते ३, ततोऽपि संज्वलनमाने क्षपिते २, ततोऽपि संज्वलनमायायां क्षपितायामेका प्रकृतिः सती । एतेषु पुनर्बन्धादिस्थानेषु प्रत्येकं संवेधेन च बहवो भङ्गाः स्युस्ततश्च भङ्गान् प्रतिपद्यमानान् सम्यग्जानीहि ॥१२॥ ॥१३॥

तत्र प्रथमतो बन्धस्थानेषु भङ्गानाह—

**छब्बावीसे चउ इगवीसे सत्तरस तेरसे दो दो ।**
**नवबंधगे वि दोन्नि उ एक्केक्कमओ परं भंगा ॥१४॥**

छब्बा० द्वाविंशतौ षड्भङ्गास्तथाहि—हास्यरतियुगलेऽरतिशोकयुगले च प्रत्येकं द्वाविंशतिः प्राप्यते इति द्वौ भङ्गौ, तौ च त्रिष्वपि वेदेषु प्रत्येकं विकल्पेन प्राप्यते इति द्वौ त्रिभिर्गुणितौ जाताः षट् । सैव द्वाविंशतिर्मिथ्यात्वेन विना २१, नवरमत्र द्वयोर्वेदयोरन्यतरो वेद इति वाच्यं, यत एकविंशतेर्बन्धकाः सास्वादनास्ते च स्त्रीवेदं पुरुषवेदं वा बध्नन्ति, न नपुंसकवेदं, तस्य मिथ्यात्वोदयनिबन्धनत्वात्, अत्र भङ्गाश्चत्वारस्तत्र हास्य-रति[युगारति]शोकयुगाभ्यां प्रागिव द्वौ भङ्गौ, तौ च प्रत्येकं स्त्रीवेदे पुरुषवेदे च प्राप्येते इति ४ । सैव चैकविंशतिरनन्तानुबन्धिचतुष्टयबन्धाभावे १७, नवरमत्र वेदेषु

---

१- तुलना- सप्ततिकाभाष्यगाथा -४१ ।

पुरुषवेद एव, यतः सप्तदशबन्धकाः सम्यग्मिथ्यादृष्टयोऽविरतसम्यग्दृष्टयो वा, न चैते स्त्रीवेदं बध्नन्ति, तद्बन्धस्यानन्तानुबन्ध्युदयनिमित्तत्वात् । सम्यग्मिथ्यादृष्ट्यादीनां चानन्तानुबन्ध्युदयाऽभावाद्, अत्र युगाभ्यां भङ्गौ २ । ता एव सप्तदशप्रकृतयोऽप्रत्याख्यानचतुष्टयहीनाः १३, युगलाभ्यां भङ्गौ द्वौ, ता एव त्रयोदश प्रत्याख्यानावरणचतुष्टयहीनाः ९, प्रागिव भङ्गौ २, तौ च प्रमत्ते द्वावपि द्रष्टव्यौ, अप्रमत्तापूर्वकरणयोस्त्वेक एव भङ्गस्तत्रारतिशोकरूपस्य युगस्य बन्धाभावात् । तथा ता एव नव हास्य-रतियुगभयजुगुप्साबन्धव्यवच्छेदे पञ्च, अत्रैक एव भङ्ग । एवं चतुरादिबन्धेष्वपि प्रत्येकं एकैको भङ्गो वाच्यः । सम्प्रत्येतेषामेव बन्धस्थानानां मध्ये एकस्मिन् कियन्ति प्रागुक्तान्युदयस्थानानि स्युरित्येतन्निरूप्यते ॥१४॥

**दस बावीसे नव इक्कवीस सत्ताइ उदयठाणाइं ।**
**छाई नव सत्तरसे तेरे पंचाइ अट्ठेव ॥१५॥**
**चत्तारिमाइ नवबंधगेसु उक्कोस सत्त उदयंसा ।**
**पंचविहबंधगे पुण उदओ दोण्हं मुणेयव्वो ॥१६॥**

दस० चत्ता० द्वाविंशतिबन्धे सप्तादीनि दशपर्यन्तानि चत्वार्युदयस्थानानि स्युस्तत्र मिथ्यात्वमप्रत्याख्यानप्रत्याख्यानसंज्वलनक्रोधादीनामन्यतमे त्रयः क्रोधादिकाः, यत एकस्मिन् क्रोधादौ वेद्यमाने सर्वेऽपि क्रोधादयो वेद्यन्ते, समानजातीयत्वात्, न च युगपत्क्रोध मान-माया-लोभानामुदयः, परस्परविरोधादित्यन्यतमे त्रयो गृह्यन्ते । तथा वेदानामन्यतमो वेदो, युगलयोरन्यतरद्युगलमेतासां सप्तप्रकृतीनां द्वाविंशतिबन्धके मिथ्यादृष्टौ उदयो ध्रुवः । अत्र भङ्गाः २४, तद्यथा युगलाभ्यां २, त्रिभिर्वेदैः ६, ते च प्रत्येकं चतुर्भिः कषायैर्गुणिताः २४ । तस्मिन्नेव सप्तके भये वा जुगुप्सायां वाऽनन्तानुबन्धिनि वा प्रक्षिप्तेऽष्टानामुदयोऽत्र भयादौ एकैका चतुर्विंशतिः प्राप्यत इति तिस्रः २४ ।

ननु मिथ्यादृष्टेरवश्यमनन्तानुबन्ध्युदयः सम्भवति तत्कथमिह मिथ्यादृष्टिः सप्तोदयेऽष्टोदये वा कस्मिंश्चित्तद्रहित उक्तः? उच्यते-इह सम्यग्दृष्टिना सता येन केनचित्प्रथमतोऽनन्तानुबन्धिनो विसंयोजिताः, एतावतैव च स विश्रान्तो न मिथ्यात्वादिक्षपणायोद्युक्तवान्, तथा सामग्र्यभावात्, ततः कालान्तरे मिथ्यात्वप्रत्ययतो भूयोऽप्यनन्तानुबंधिनो बध्नाति, ततो बन्धावलिकायावन्नाद्याप्यतिक्रामति तावत्तेषामुदयो न स्यात्, तस्यां त्वतिक्रान्तायां स्यात् ।

तथा तस्मिन्नेव सप्तके भयजुगुप्सयोरथवा भयानन्तानुबन्धिनोर्वा यद्वा जुगुप्सानन्तानुबन्धिनोः प्रक्षिप्तयोर्नवानामुदयोऽत्रापि पूर्ववत् तिस्रः २४, तथा तस्मिन्नेव सप्तके भयजुगुप्सानन्तानुबन्धिषु प्रक्षिप्तेषु दशानामुदयोऽत्रैकैव २४, सर्वसंख्यया द्वाविंशतिबन्धेऽष्टौ २४ ।

एकविंशतिबन्धे सप्तादीनि नवपर्यन्तानि त्रीण्युदयस्थानानि । तत्राऽनन्तानुबन्ध्यादीनामन्यतमे चत्वारः क्रोधादिकाः, वेदानामन्यतमो वेदो, अन्यतरद्युगलमेतासां सप्तप्रकृतीनां सासादने एकविंशतिबन्धके उदयो ध्रुवः, अत्र पूर्ववद्भङ्गाः २४ ।[1] तथा तस्मिन्नेव सप्तके भये वा जुगुप्सायां वा क्षिप्तायामष्टानामुदयोऽत्र २४,[2] भयजुगुप्सयोस्तु युगपत्प्रक्षिप्तयोर्नवानामुदयोऽत्रैका २४ । सर्वसंख्ययैकविंशतिबन्धे चतस्रः २४ ।

तथा सप्तदशके बन्धस्थाने षडादीनि नवपर्यन्तानि चत्वार्युदयस्थानानि । सप्तदशबन्धका हि द्वये, सम्यग्मिथ्यादृष्टयोऽविरताश्च । तत्राद्यानामुदयस्थानानि [त्रीणि ७।८।९] तत्रानन्तानुबन्धिवर्जास्त्रयोऽन्यतमे क्रोधादयो, वेदानामन्यतमो वेदो, युगलयोरन्यतरद्युगलं, सम्यग्मिथ्यात्वं चेति सप्तानामुदयः सम्यग्मिथ्यादृष्टिषु ध्रुवोऽत्र पूर्ववद्भङ्गाः २४ । अस्मिन्नेव सप्तके भये जुगुप्सायां वा प्रक्षिप्तायामष्टानामुदयोऽत्र द्वे २४ । भयजुगुप्सयोस्तु युगपत्प्रक्षिप्तयोर्नवानामुदयोऽत्रैका २४ । सर्वसंख्यया सम्यग्मिथ्यादृष्टीनां चतस्रः २४ ।

अविरतानां सप्तदशबन्धकानां चत्वार्युदयस्थानानि । तत्रौपशमिकसम्यग्दृष्टीनां [क्षायिकसम्यग्दृष्टीनाम्] अविरतानामनन्तानुबन्धिवर्जास्त्रयोऽन्यतमे क्रोधाद्या, वेदानामन्यतमो वेदो, युगयोरन्यतरद्युगमिति षण्णामुदयो ध्रुवोऽत्र भङ्गाः २४। अस्मिन्नेव षट्के भये जुगुप्सायां वा वेदकसम्यक्त्वे वा प्रक्षिप्ते सप्तानामुदयोऽत्र तिस्रः २४। तस्मिन्नेव षट्के भयजुगुप्सयोर्भयवेदकसम्यक्त्वयोर्जुगुप्सावेदकसम्यक्त्वयोर्वा प्रक्षिप्तयोरष्टानामुदयोऽत्रापि तिस्रः २४। भयजुगुप्सावेदकसम्यक्त्वेषु तु युगपत्प्रक्षिप्तेषु नवानामुदयोऽत्र भङ्गाः २४। अविरतसम्यग्दृष्टीनां सर्वाः २४ अष्टौ, सर्वसंख्यया १७, बन्धे द्वादश २४।

त्रयोदशके बन्धस्थाने पञ्चादीन्यष्टपर्यन्तानि उदयस्थानानि ४। तत्र प्रत्याख्यानावरणसंज्वलनक्रोधादीनामन्यतमौ द्वौ क्रोधादिकौ, वेदानामन्यतमो वेदो, युगयोरन्यतरद्युगमित्येतासां पञ्चानामुदयस्त्रयोदशबन्धे ध्रुवोऽत्रैका २४। भयजुगुप्सावेदकसम्यक्त्वानामन्यतमस्मिन् क्षिप्ते षण्णामुदयोऽत्र तिस्रः २४।

---

१- अत्र प्रागुक्तक्रमेणैका २४ -पा० । २- वा क्षपितायाः -हे० ला० ।

तस्मिन्नेव पञ्चके भयजुगुप्सावेदकानां मध्ये परावृत्त्या द्विकस्य क्षेपे सप्तानामुदयस्त्रिसः २४ । एतेषु त्रिषु युगपत्प्रक्षिप्तेष्वष्टानामुदयोऽत्रैका २४ । सर्वसंख्यया त्रयोदशबन्धेऽष्टौ २४ ।

नवबन्धकेषु प्रमत्तादिषु चतुरादिसप्तान्तानि ४ उदयस्थानानि । तत्र संज्वलनक्रोधादीना-मन्यतम एकः क्रोधादिकोऽन्यतमो वेदोऽन्यतरद्युगलमित्येतासां चतसृणामुदयः क्षायिकेष्वौपशमिकेषु वा प्रमत्तादिषु ध्रुवोऽत्रैका २४ । अस्मिन्नेव चतुष्के भयजुगुप्सावेदकसम्यक्त्वानां प्रत्येके द्विकेन युगपच्च प्रक्षेपात्पञ्चानां षण्णां सप्तानामुदयः पूर्ववद्भावनीयः । सर्वसंख्यया नवबन्धेऽष्टौ २४ ।

तथा पञ्चविधबन्धकेषु पुनरुदयो द्वयोः प्रकृत्योर्ज्ञातव्यः, प्रकृतिद्वयात्मकमेकमुदयस्था-नमिति भावः, तत्र चतुर्णां संज्वलनानामन्यतमः क्रोधादिरन्यतमो वेदोऽत्र त्रिभिर्वेदैश्चतुर्भिः संज्वलनैर्द्वादश भङ्गाः ॥१५॥॥१६॥

**इत्तो चउबंधाई इक्केकुदया हवंति सव्वे वि ।**
**बंधोवरमे वि तहा उदयाभावे वि वा होज्जा ॥१७॥**

इत्तो० इतः पञ्चकबन्धादनन्तरं चतुर्बन्धादयः सर्वेऽपि प्रत्येकमेकैकोदया=एकैकप्रकृत्युदया भवन्ति, तथाहि—→चतुर्बन्धः स्यात् पुरुषवेदबन्धव्यवच्छेदे सति, पुरुषवेदस्य युगपद्बन्धोदयौ व्यवच्छिद्येते, ततश्चतुर्विधबन्धकाले एकोदय एव स्यात्, स च चतुर्णां संज्वलनानामन्यतमोऽत्र चत्वारो भङ्गाः, यतः कोऽपि संज्वलनक्रोधेनोदयप्राप्तेन श्रेणिं प्रतिपद्यते, कोऽपि संज्वलनमानेन, कोऽपि संज्वलनमायया, कोऽपि संज्वलनलोभेनेति । इह केचित् चतुर्विधबन्धसंक्रमणकाले त्रयाणां वेदानामन्यतमस्य वेदस्योदयमि-च्छन्त्यतस्तन्मतेन चतुर्विधबन्धकस्यापि प्रथमकाले द्वादश द्विकोदयभङ्गाः लभ्यन्ते । तथा च सति तेषां मतेन सर्वसंख्यया द्विकोदये चतुर्विंशतिभङ्गा अवसेयाः । संज्वलनक्रोधबन्धव्यवच्छेदे सति त्रिविधो बन्धस्तथाप्येकविध एवोदयो, नवरमत्र संज्वलनक्रोधवर्जानां त्रयाणामन्यतम इति वक्तव्यमेवं संज्वलनमान-बन्धे व्यवच्छिन्ने द्विविधो बन्धस्तथाप्येकविध एवोदयः, संज्वलनमायाबन्धव्यवच्छेदे एकस्य संज्वलनलोभस्य बन्धस्तस्यैव चोदयो, भङ्गाः पृथगग्रे गणयिष्यन्ते। तथा बन्धोपरमेऽपि=बन्धाभावेऽपि मोहनीयस्य सूक्ष्मसम्पराये एकविध उदयः स च संज्वलनलोभस्यावशेषस्तद्गतसूक्ष्मकिट्टिवेदनात् । ततः परमुदयाभावेऽपि उपशान्तकषायमधिकृत्य मोहनीयं सद्भवति । एतच्च प्रसङ्गेनोक्तमन्यथा संवेधचिन्तायामनुपयोगि ॥१७॥

सम्प्रति दशादिष्वेकपर्यवसानेषु यावन्तो भङ्गाः स्युस्तानाह—

**एक्कग छक्केक्कारस दस सत्त चउक्क एक्कगा चेव ।**
**एए चउवीसगया चउवीस दुगेक्कमेक्कारा ॥१८॥**

एक० इह दशान्द्युदयस्थानान्यधिकृत्य यथासंख्यं पदयोजना कार्या । सा चैवं→ दशोदये एका चतुर्विंशतिः । नवोदये षडित्यादि यावच्चतुष्कोदये एका चतुर्विंशतिः । 'एए चउवीसगय' त्ति एतेऽनन्तरोक्ता एकादिकाः संख्याविशेषाश्चतुर्विंशतिगताश्चतुर्विंशत्यभिधायका ज्ञातव्या । एताश्च सर्वसंख्यया चत्वारिंशत् । तथा 'चउवीस दुगे'त्ति द्विकोदये चतुर्विंशतिरेका भङ्गकानाम्, एतच्च *मतान्तरेणो*क्तमन्यथा ***स्वमते*** द्वादशैव भङ्गाः । तथैकोदये एकादश भङ्गास्ते चैवम्→ चतुर्विधबन्धे चत्वारस्त्रिविधबन्धे ३, द्विविधबन्धे २, एकविधबन्धे १, बन्धाभावे १ ॥१८॥

सम्प्रत्येतेषामेव भङ्गानां विशिष्टतरसंख्यानिरूपणार्थमाह—

**नवपंचाणउइसएहुदयविगप्पेहिं मोहिया जीवा ।**
**अउणत्तरिएगुत्तरिपयविंदसएहिं विन्नेया ॥१९॥**

नव० इह दशादिषु द्विकपर्यवसानेषु उदयस्थानभङ्गानामेकचत्वारिंशच्चतुर्विंशतयो लब्धास्ततः एकचत्वारिंशच्चतुर्विंशत्या गुण्यते, गुणितायां च सत्यां जातानि नवशतानि चतुरशीत्यधिकानि । ततस्तत्रैकोदयभङ्गाः ११ प्रक्षिप्यन्ते । तेषु च प्रक्षिप्तेषु ९९५ स्युरेतावद्भिरुदयस्थानविकल्पैर्यथायोगं सर्वे संसारिणो जीवा मोहिता विज्ञेयाः ।

सम्प्रति पदसंख्यामाह-'अउणे'त्यादि उत्तरार्द्धम् । इह पदानि नाम मिथ्यात्वमप्रत्याख्या नक्रोध इत्येवमादीनि, ततो वृन्दानां = दशाद्युदयस्थानरूपाणां पदानि पदवृन्दानि, तेषां शतैरेकसप्तत्यधिकै-कोनसप्ततिसंख्यैर्मोहिता = एतावत्संख्याभिः कर्मप्रकृतिभिर्यथायोगं मोहिताः संसारिणो जीवा ज्ञातव्या इत्यर्थः । अथ कथमेतावती संख्या स्यात्? उच्यते - इह दशोदये दशपदानि दशप्रकृतय उदयमागता इत्यर्थः । एवं नवोदयादिष्वपि भावनीयम् । ततो दशोदये एको दशभिर्गुण्यते, नवोदयाश्च षट् नवभिरेवं तावद्यावत् द्विकोदय एको द्वाभ्यां गुणयित्वा चैते सर्वेऽप्येकत्र मील्यन्ते ततो जाते द्वे शते नवत्यधिके । एतेषु प्रत्येकमेकैका चतुर्विंशतिर्भङ्गकानां प्राप्यत इत्येते भूयश्चतुर्विंशत्या गुण्यन्ते, गुणितेषु च सत्सु एकोदयभङ्गपदान्येकादश प्रक्षिप्यन्ते, ततो यथोक्तसंख्यान्येव पदानां शतानि स्युः, इयं चोदयस्थानसंख्या

पदसंख्या च ये *मतान्तरेण* चतुर्विधबन्धसंक्रमकाले द्विकोदये द्वादश भङ्गा उक्तास्तानधिकृत्य द्रष्टव्याः ॥१९॥

यदा पुनरेते नाधिक्रियन्ते तदेयमुदयस्थानपदसंख्या—

**नवतेसीयसएहिं उदयविगप्पेहिं मोहिया जीवा ।**
**अउणत्तरिसीयाला पयविंदसएहिं विन्नेया ॥२०॥**

नव० स्पष्टा । इह दशादय उदयास्तद्भङ्गाश्च जघन्यत एक सामा(म)यिका उत्कर्षत आन्तर्मौहूर्त्तिकाः ॥२०॥

सम्प्रति सत्तास्थानैः सह संवेधमाह—

**तिन्नेव य बावीसे इगवीसे अट्ठवीस सत्तरसे ।**
**छ च्चेव तेरनवबंधगेसु पंचेव ठाणाइं ॥२१॥**

**पंचविहचउविहेसु छ छक्क सेसेसु जाण पंचेव ।**
**पत्तेयं पत्तेयं चत्तारि य बंधवोच्छेए ॥२२॥**

तिन्ने० पंच० विंशतिबन्धे त्रीणि सत्तास्थानानि, तद्यथा→ २८।२७।२६। तथाहि→२२ बन्धो मिथ्यादृष्टेस्तस्य चत्वार्युदयस्थानानि, तथाहि→ ७।८।९।१०। तत्र सप्तोदये २८ एकं सत्तास्थानं, यतः सप्तोदयोऽनन्तानुबन्ध्युदयाभावे स्यात्, तद्रहितश्च येन पूर्वं सम्यग्दृष्टिना सताऽनन्तानुबन्धिन उद्वलितास्ततः कालान्तरेण परिणामवशतो मिथ्यात्वं गतेन भूयोऽपि मिथ्यात्वप्रत्ययेन तेऽनन्तानुबन्धिनो बद्धुमारभ्यन्ते स एव मिथ्यादृष्टिर्बन्धावलिकामात्रं कालं यावदनन्तानुबन्ध्युदयरहितः प्राप्यते नान्यः, स चाष्टाविंशतिसत्कर्मेति । अष्टोदये त्रीण्यपि सत्तास्थानानि, तत्र योऽनन्तानुबन्ध्युदयरहितोऽष्टोदयस्तत्राष्टाविंशतिरेव सत्तास्थानम्।[१] तत्सहिते तु त्रीण्यपि, तत्र यावन्नाद्यापि सम्यक्त्वमुद्वलयति तावत् २८, सम्यक्त्वे उद्वलिते २७, सम्यग्मिथ्यात्वेऽप्युद्वलिते २६-अनादिमिथ्यादृष्टेर्वा २६। एवं नवोदयेऽपि। दशोदयस्त्वनन्तानुबन्ध्युदयसहित एव स्यात्, तत्रापि त्रीणि सत्तास्थानानि ।

एकविंशतिबन्धे २८ एकं सत्तास्थानम् । एकविंशतिबन्धो हि सास्वादनस्य स्यात्, ततो दर्शनत्रिकस्यापि प्राप्यमाणत्वात्तत्र त्रिष्वप्युदयस्थानेषु २८ एकं सत्तास्थानम् ।

१- त्रिंवोदयस्था० -पा० ला० ।

१७ बन्धे षट् सत्तास्थानानि, तद्यथा→२८।२७।२४।२३।२२।२१। तत्र षडुदयोऽविरतानामौपशमिकसम्यग्दृष्टीनां वा क्षायिकाणां वा प्राप्यते । तत्रौपशमिकानां द्वे सत्तास्थाने, तद्यथा→ २८।२४। तत्राष्टाविंशतिः प्रथमसम्यक्त्वोत्पादकाले, उपशमश्रेण्यां तूपशान्तानन्तानुबन्धिनां २८, उद्वलितानन्तानुबन्धिनां तु २४। क्षायिकाणां तु २१, क्षायिकं हि सप्तकक्षये स्यादिति । एवं षडुदये त्रीणि सत्तास्थानानि ।

सप्तोदयादिषु मिथ्या(श्र)दृष्टीनां त्रीणि, तत्र योऽष्टाविंशतिसत्कर्मा सन् सम्यग्मिथ्यात्वं प्रतिपद्यते तस्य २८, येन पुनर्मिथ्यादृष्टिना सता प्रथमं सम्यक्त्वमुद्वलितं सम्यग्मिथ्यात्वं च नाद्यापि उद्वलयितुमारभ्यतेऽत्रान्तरे परिणामवशान्मिथ्यात्वाद् विनिवृत्य सम्यग्मिथ्यात्वं प्रतिपद्यते तस्य २७, यः पुनः पूर्वं सम्यग्दृष्टिः सन्ननन्तानुबन्धिनो विसंयोज्य परिणामवशतः सम्यग्मिथ्यात्वं प्रतिपद्यते तस्य २४, सा च चतसृष्वपि गतिषु प्राप्यते चतुर्गतिका अपि सम्यग्दृष्टयोऽनन्तानुबन्धिनो विसंयोजयन्ति । अविरतसम्यग्दृष्टीनां तु सप्तोदये पञ्च सत्तास्थानानि, तत्र २८ औपशमिकसम्यग्दृष्टीनां [वेदकसम्यग्दृष्टीनां] वा, २४ उभयेषां, नवरमनन्तानुबन्धिविसंयोजितानन्तरं साऽवगन्तव्या। २३।२२। वेदकानामेव, तथाहि→ कश्चिन्मनुष्यो वर्षाष्टकस्योपरि वर्तमानो वेदकसम्यग्दृष्टिः क्षपणायाभ्युद्यतस्तस्यानन्तानुबन्धिषु मिथ्यात्वे च क्षपिते सति २३, तस्यैव च सम्यग्मिथ्यात्वे क्षपिते २२, स च द्वाविंशतिसत्कर्मा सम्यक्त्वं क्षपयतस्तच्चरमग्रासे वर्तमानः कश्चित्पूर्वबद्धायुष्कः कालमपि करोति कालं च कृत्वा चतसृणां गतीनामन्यतमस्यां गत्यामुत्पद्यते ततो २२ चतसृष्वपि गतिषु प्राप्यते। एकविंशतिस्तु क्षायिकाणामेव। एवमष्टोदयेऽपि। एवं[1] नवोदयेऽपि, नवरं नवोदयोऽविरतानां वेदकसम्यग्दृष्टीनामेव सम्भवतीति कृत्वा चत्वारि सत्तास्थानानि २८।२४।२३।२२। प्रागिवावगन्तव्यानि ।

तथा त्रयोदशबन्धकेषु नवबन्धकेषु च प्रत्येकं पञ्च पञ्च सत्तास्थानानि, तद्यथा→२८।२४।२३।२२।२१। तत्र त्रयोदशबन्धका देशविरतास्ते च द्विधा-तिर्यञ्चो मनुष्याश्च । तत्र ये तिर्यञ्चस्तेषां चतुर्ष्वपि उदयस्थानेषु द्वे एव सत्तास्थाने, तद्यथा→ २८।२४। तत्र २८ औपशमिकसम्यग्दृष्टीनां[2] वेदकसम्यग्दृष्टीनां वा, तत्रौपशमिकसम्यग्दृष्टीनां प्रथमसम्यक्त्वोत्पादकाले, तथाहि→तदानीमन्तरकरणाद्धायां वर्तमान औपशमिकसम्यग्दृष्टिः कश्चिद् देशविरतिमपि प्रतिपद्यते, कश्चिन्मनुष्यः सर्वविरतिमपि ।

१-०दयेऽपि। मिश्रदृष्टीनामविरतसम्यग्दृष्टीनां चोक्तरूपाण्यन्यूनातिरिक्तानि सत्तास्थानानि भावनीयानि, एवम्-पा०।
२-०मिकमिथ्यादृष्टीनाम्-हे०।

चतुर्विंशतिः पुनरनन्तानुबन्धिषु विसंयोजितेषु वेदकसम्यग्दृष्टीनां द्रष्टव्या । शेषाणि तु सर्वाण्यपि त्रयोविंशत्यादीनि सत्तास्थानानि तिरश्चां न सम्भवन्ति, तानि हि क्षायिकसम्यक्त्वमुत्पादयतः प्राप्यते, न हि तिर्यञ्चस्तदुत्पादयन्ति किन्तु मनुष्या एव, तेषां पञ्चकोदये त्रीणि सत्तास्थानानि, तद्यथा→ २८।२४।२१। षट्कोदये सप्तोदये च प्रत्येकं पञ्चापि सत्तास्थानानि । अष्टकोदये त्वेकविंशतिवर्जानि शेषाणि चत्वारि, तानि चाऽविरतसम्यग्दृष्टयुक्तभावनानुसारेण भावनीयानि । एवं नवबन्धकानामपि प्रमत्ताऽप्रमत्तानां प्रत्येकं चतुष्कोदये त्रीणि त्रीणि सत्तास्थानानि, तद्यथा→ २८।२४।२१। पञ्चकोदये षट्कोदये च पञ्च पञ्च सत्तास्थानानि । सप्तोदये त्वेकविंशतिवर्जानि शेषाणि ४ सत्तास्थानानि वाच्यानि ।

तथा पञ्चविधे चतुर्विधे च बन्धे प्रत्येकं षट् षट् सत्तास्थानानि । तत्र पञ्चविधेऽमूनि, तद्यथा→२८।२४।२१।१३।१२।११। तत्र २८।२४। औपशमिकसम्यग्दृष्टेरूपशमश्रेण्यां, २१ उपशमश्रेण्यां क्षायिकसम्यग्दृष्टेः, क्षपकश्रेण्यां पुनरष्टौ कषाया यावन्न क्षीयन्ते तावत् २१, अष्टसु कषायेषु क्षीणेषु पुनः १३, ततो नपुंसकवेदे क्षीणे १२, ततः स्त्रीवेदे क्षीणे ११ । चतुर्विधबन्धे पुनरमूनि→२८।२४।२१। ११।५।४। तत्र २८।२४।२१। उपशमश्रेण्याम्। इह नपुंसकवेदेन कश्चित् क्षपकश्रेणिं प्रतिपन्नः स च स्त्रीवेदं नपुंसकवेदौ युगपत्क्षपयति, स्त्रीवेद-नपुंसकक्षयसमकालमेव च पुरुषवेदस्य बन्धो व्यवच्छिद्यते, तदनन्तरं पुरुषवेदहास्यादिषट्कं युगपत्क्षपयति, यदि पुनः स्त्रीवेदेन क्षपकश्रेणिं प्रतिपद्यते ततः पूर्वं नपुंसकवेदं क्षपयति, ततोऽन्तर्मुहूर्त्तेन स्त्रीवेदम्, स्त्रीवेदक्षयसमकालमेव च पुरुषवेदस्य बन्धव्यवच्छेदस्ततस्तदनन्तरं पुरुषवेदहास्यादिषट्कं युगपत्क्षपयति, यावच्च न क्षीयते तावदुभयत्रापि चतुर्विधबन्धे वेदोदयरहितस्यैकोदये वर्तमानस्यैकादशकं सत्तास्थानमवाप्यते । पुरुषवेदहास्यादिषट्कयोस्तु युगपत्क्षीणयोश्चतस्रः प्रकृतयः सत्यः पुरुषवेदेन तु क्षपकश्रेणिं प्रतिपन्नस्य षड्नोकषायक्षयसमकालं पुरुषवेदस्य बन्धव्यवच्छेदो भवति, ततस्तस्य चतुर्विधबन्धकाले पञ्चप्रकृत्यात्मकं सत्तास्थानं प्राप्यते । ताश्च पञ्च समयद्वयोनावलिकाद्विकं यावत्सत्यो वेदितव्यास्ततः पुरुषवेदे क्षीणे चतस्रः, ता अप्यन्तर्मुहूर्तं कालं यावत्सत्यः ।

तथा शेषेषु त्रिविधद्विविधैकविधेषु बन्धेषु प्रत्येकं पञ्च पञ्च सत्तास्थानानि, तत्र त्रिविधे बन्धेऽमूनि→ २८।२४।२१।४।३। तत्राद्यानि त्रीण्युपशमश्रेणौ, शेषे तु क्षपकश्रेणौ । ते चैवं संज्वलनक्रोधस्य प्रथमस्थितावावलिकाशेषायां बन्धोदयोदीरणा युगपद्व्यवच्छेदमायान्ति, व्यवच्छिन्नासु तासु च बन्धस्त्रिविधो जातः, संज्वलनक्रोधस्य च तदानीं प्रथमस्थितिगतावलिकामात्रं समयद्वयोनावलिकाद्विकबद्धं च विमुच्या-

न्यत्सर्वं क्षीणं, तदपि च सत्समय[द्वयो]नावलिकाद्विकमात्रेण कालेन क्षयमुपयास्यति, यावच्च न याति तावच्चतस्रः प्रकृतयस्त्रिविधबन्धे सत्यः, क्षीणे तु तस्मिंस्तिस्रः । ताश्चान्तर्मुहूर्तं कालं यावदवगन्तव्याः । द्विविधबन्धे पुनरमूनि→ २८।२४।२१।३।२। त्रीणि प्रागिव, शेषे तु द्वे क्षपकश्रेण्याम् । एकविधबन्धे पुनः पञ्च सत्तास्थानान्यमूनि→ २८।२४।२१।२।१। त्रीणि प्रागिवोपशमश्रेण्यां, शेषे तु द्वे क्षपकश्रेण्याम् । तथा बन्धव्यवच्छेदे बन्धाभावे सूक्ष्मसम्परायगुणस्थाने चत्वारि सत्तास्थानानि २८।२४।२१।१। त्रीण्युपशमश्रेण्याम्, एका तु संज्वलनलोभरूपा प्रकृतिः क्षपकश्रेण्याम् ॥२१॥२२॥

तदेवं कृता संवेधचिन्ताऽधुनोपसंहारमाह—

**दसनवपन्नरसाइं बंधोदयसंतपयडिठाणाइं ।**
**भणियाइँ मोहणिज्जे इत्तो नामं परं वोच्छं ॥२३॥**

दस० बन्धोदयसत्प्रकृतिस्थानानि, यथासंख्यं दश-नव-पञ्चदशसंख्यानि प्रत्येकं संवेधद्वारेण च भणितानि । इतः परं नाम्नो बन्धादिस्थानानि वक्ष्ये ॥२३॥

तत्र प्रथमतो बन्धस्थानान्याह—

**तेवीस पण्णवीसा छव्वीसा अट्ठवीस गुणतीसा ।**
**तीसेगतीसमेक्कं बंधट्ठाणाणि नामस्स ॥२४॥**[1]

तेवीस० नाम्नोऽष्टौ बन्धस्थानान्यमूनि च तिर्यग्मनुष्यादिगतिप्रायोग्यतयाऽनेकप्रकाराणि, ततस्तथैवोपदर्श्यन्ते । तत्र तिर्यग्गतिप्रायोग्यं बध्नतः सामान्येन पञ्च स्थानानि, तद्यथा→ २३।२५।२६।२९।३०। तत्राप्येकेन्द्रियप्रायोग्यं बध्नतस्त्रीणि बन्धस्थानानि, तद्यथा→२३।२५।२६। तत्र त्रयोविंशतिरियं→तिर्यग्गतिस्तिर्यगानुपूर्वीरेकेन्द्रियजातिरौदारिकतैजसकार्मणानि हुण्डं वर्णगन्धरसस्पर्शा अगुरुलघूपघातनाम स्थावरनाम सूक्ष्मबादरयोरेकतरमपर्याप्तकं प्रत्येकसाधारणयोरेकतरमस्थिरमशुभं दुर्भगमनादेयमयशःकीर्तिर्निर्माणमेतासां त्रयोविंशतिप्रकृतीनां समुदाय एकं बन्धस्थानमेतच्चापर्याप्तकप्रायोग्यं बध्नतो मिथ्यादृष्टेरवसेयम् । अत्र भङ्गाः ४, तथाहि→बादरे बध्यमाने एका त्रयोविंशतिः प्रत्येकनाम्ना सह प्राप्यते, द्वितीया साधारणेन, एवं सूक्ष्मेऽपि बध्यमाने द्वे त्रयोविंशती । एषैव त्रयोविंशतिः पराघातोच्छ्वाससहिता पञ्चविंशतिः पर्याप्तकैकेन्द्रियप्रायोग्यं बध्नतो मिथ्यादृष्टेरवगन्तव्या, नवरमपर्याप्तस्थाने पर्याप्तम्,

---

१- तुलना- सप्ततिकाभाष्यगाथा -५८ ।

तथा स्थिरास्थिरयोरेकतरं, शुभाशुभयोरेकतरं, यशःकीर्त्ययशःकीर्त्त्योरेकतरा । अत्र भङ्गाः २०, तत्र बादरपर्याप्तप्रत्येकस्थिरशुभेषु बध्यमानेषु यशःकीर्त्त्या सहैको, द्वीतीयोऽयशःकीर्त्या, एतौ द्वौ च भङ्गौ शुभपदेन लब्धौ । एवमशुभेनापि द्वौ भङ्गौ लभ्येते । एते चत्वारः स्थिरपदेन लब्धाः एवमस्थिरपदेनाऽपि चत्वारो भङ्गा लभ्यन्ते, ततो जाता अष्टौ । एवं पर्याप्तबादरसाधारणेषु बद्ध्यमानेषु स्थिरास्थिरशुभाशुभाऽयशःकीर्त्तिपदैश्चत्वारो, यतः साधारणेन सह यशःकीर्त्तिबन्धो न स्यात् । सूक्ष्मपर्याप्तनाम्नोर्बध्यमानयोः प्रत्येकसाधारणस्थिरास्थिरशुभाशुभायशःकीर्त्तिपदैरष्टौ, सूक्ष्मेणापि सह यशःकीर्त्तिबन्धाभावात् । तदेवं सर्वसंख्यया पञ्चविंशतिबन्धे भङ्गाः २० । एषैव पञ्चविंशतिरातपोद्योतान्यतरसहिता षड्विंशतिः, नवरं बादरसूक्ष्मयोः स्थाने बादरं, प्रत्येकसाधारणयोः स्थाने प्रत्येकनाम । एतच्च बन्धस्थानं पर्याप्तकैकेन्द्रियप्रायोग्यमातपोद्द्योतान्यतरसहितं बध्नतो मिथ्यादृष्टेरवगन्तव्यम् । अत्र भङ्गाः १६, ते चातपोद्योतस्थिरास्थिरशुभाशुभयशःकीर्त्त्ययशःकीर्त्तिपदैरवसेयाः । आतपोद्योताभ्यां च सह सूक्ष्मसाधारणबन्धो न स्यात्, ततस्तदाश्रिता विकल्पा अत्र न प्राप्यन्ते । एकेन्द्रियाणां सर्वसंख्यया भङ्गाः ४० ।

द्वीन्द्रियप्रायोग्यं बध्नतो बन्धस्थानानि त्रीणि, तद्यथा-->२५।२९।३०। तत्र तिर्यग्गतिस्तिर्यगानुपूर्वी द्वीन्द्रियजातिरौदारिकतैजसकार्मणानि हुण्डं सेवार्त्तमौदारिकाङ्गोपाङ्गं वर्णादिचतुष्टयम्, अगुरुलघूपघातं त्रसनाम बादरमपर्याप्तं प्रत्येकमस्थिरमशुभं दुर्भगमनादेयमयशःकीर्त्तिर्निर्माणमित्येवं पञ्चविंशतिप्रकृतिरूपं बन्धस्थानमपर्याप्तकद्वीन्द्रियप्रायोग्यं बध्नतो मिथ्यादृष्टेरवसेयम् । अपर्याप्तकेन च सह परावर्त्तमानप्रकृतयोऽशुभा एव बन्धमायान्ति ततोऽत्रैक एव भङ्गः । एषैव पञ्चविंशतिः पराघातोच्छ्वासाऽप्रशस्तविहायोगतिपर्याप्तकदुःस्वरसहिता अपर्याप्तकरहिता एकोनत्रिंशद्भवति, नवरमस्थिरस्थाने स्थिरास्थिरयोरेकतरम्, अशुभस्थाने शुभाशुभयोरेकतरम्, अयशःकीर्त्तिस्थाने यशःकीर्त्त्ययशःकीर्त्योरेकतरा । एतच्च बन्धस्थानं पर्याप्तकद्वीन्द्रियप्रायोग्यं बध्नतो मिथ्यादृष्टेः प्रत्येतव्यम् । अत्र स्थिरास्थिरशुभाशुभयशःकीर्त्त्ययशःकीर्त्तिपदैरष्टौ भङ्गाः । सैव २९ उद्द्योतसहिता ३० । अत्रापि त एवाष्टौ भङ्गाः । सर्वसंख्यया १७ । एवं त्रीन्द्रियप्रायोग्यं चतुरिन्द्रियप्रायोग्यं च बध्नतो मिथ्यादृष्टेस्त्रीणि बन्धस्थानानि वाच्यानि, नवरं जातिस्थाने नामपरावर्त्तः कार्यो, भङ्गाश्च प्रत्येकं १७, सर्वसंख्यया विकलेन्द्रियाणां भङ्गाः ५१।

तिर्यग्गतिपञ्चेन्द्रियप्रायोग्यं बध्नतस्त्रीणि बन्धस्थानानि, तद्यथा-->२५।२९।३०। तत्र २५ द्वीन्द्रियप्रायोग्यं बध्नत इव द्रष्टव्या । २९ पुनरियं तिर्यग्गतितिर्यगानुपूर्व्यौ पञ्चेन्द्रियजातिरौदारिकमौदारिकाङ्गोपाङ्गं तैजसकार्मणे षण्णां संस्थानानामेकतमत्संस्थानं षण्णां संहननानामेकतमत्संहननं

वर्णादिचतुष्टयमगुरुलघूपघातं पराघातमुच्छ्वासं प्रशस्ताऽप्रशस्तविहायोगत्योरेकतरा त्रसं बादरं पर्याप्तकं प्रत्येकं स्थिरास्थिरयोरेकतरं शुभाशुभयोरेकतरं सुभगदुर्भगयोरेकतरं सुस्वरदुःस्वरयोरेकतरमादेयानादेययोरेकतरं यशःकीर्त्त्ययशःकीर्त्त्योरेकतरं निर्माणमित्येकोनत्रिंशत्प्रकृतिरूपं बन्धस्थानं मिथ्यादृष्टेः पर्याप्ततिर्यक्पञ्चेन्द्रियप्रायोग्यं बध्नतो वेदितव्यम् । यदि पुनः सास्वादनो बन्धकः स्यात्तर्हि तस्य पञ्चानामाद्यानां संस्थानानामन्यतमत् संस्थानम्, एवं संहननानामपि, *'हुंडं असंपत्तं सासणो न बंधइ'* [ ] इतिवचनादस्यामेकोनत्रिंशति सामान्येन षड्भिः संस्थानैः, षड्भिः संहननैः, प्रशस्ताप्रशस्तविहायोगतिभ्यां, स्थिरास्थिराभ्यां, शुभाशुभाभ्यां, सुभगदुर्भगाभ्यां, सुस्वरदुःस्वराभ्यां, आदेयानादेयाभ्यां, यशःकीर्त्त्ययशःकीर्त्तिभ्यां भङ्गाः ४६०८ । विशेषाश्रयणेन तु सासादनमाश्रित्य ३२०० भङ्गकानां स्युः । एषैवैकोनत्रिंशदुद्योतसहिता ३० स्यादत्रापि मिथ्यादृष्टिसासादनानधिकृत्य तथैव विशेषोऽवगन्तव्यः । सामान्येन भङ्गाः ४६०८ सर्वसंख्यया भङ्गाः ९२१७ । सर्वस्यां तिर्यग्गतौ सर्वसंख्यया ९३०८ ।

तथा मनुष्यगतिप्रायोग्यं बध्नतस्त्रीणि बन्धस्थानानि-२५।२९।३०। तत्र २५ यथा प्रागपर्याप्तकद्वीन्द्रियप्रायोग्यं बध्नतोऽभिहिता तथैव ज्ञेया, नवरमत्र मनुष्यगतिर्मनुष्यानुपूर्वी पञ्चेन्द्रियजातिरिति वक्तव्यम् । २९ त्रिधा—>एका मिथ्यादृष्टीन् बन्धकानाश्रित्यावगन्तव्या, द्वितीया सास्वादनान्, तृतीया सम्यग्मिथ्यादृष्टीनविरतसम्यग्दृष्टीन् वा । तत्राद्ये द्वे यथा पञ्चेन्द्रियतिर्यक्प्रायोग्ये २९बन्धे द्वे अपि भाविते तथैव भावनीये, तृतीया पुनरियम्—>मनुष्यगतिर्मनुष्यानुपूर्वी पञ्चेन्द्रियजातिरौदारिकमौदारिकाङ्गोपाङ्गं तैजसकार्मणे समचतुरस्रं वज्रर्षभनाराचं वर्णादिचतुष्टयमगुरुलघूपघातं पराघातमुच्छ्वासं प्रशस्तविहायोगतिस्त्रसं बादरं पर्याप्तं प्रत्येकं स्थिरास्थिरयोरेकतरं शुभाशुभयोरेकतरं सुभगं सुस्वरमादेयं यशःकीर्त्त्ययशःकीर्त्त्योरेकतरा निर्माणमित्यस्यां चैकोनत्रिंशति त्रिप्रकारायामपि सामान्येन षड्भिः संस्थानैः षड्भिः संहननैः प्रशस्ताप्रशस्तविहायोगतिभ्यां स्थिरास्थिराभ्यां शुभाशुभाभ्यां सुभगदुर्भगाभ्यां सुस्वरदुस्वराभ्यामादेयानादेयाभ्यां यशःकीर्त्त्ययशःकीर्तिभ्यां भङ्गाः ४६०८ । यैव तृतीया एकोनत्रिंशदुक्ता सैव तीर्थंकरसहिता ३० । अत्र च स्थिरास्थिरशुभाशुभयशःकीर्त्त्ययशःकीर्त्तिपदैः ८ भङ्गाः । सर्वसंख्यया मनुष्यगतिप्रायोग्यबन्धस्थानेषु भङ्गाः ४६१७ ।

तथा देवगतिप्रायोग्यं बध्नतश्चत्वारि बन्धस्थानानि २८।२९।३०।३१। तत्र २८ इयं—> देवद्विकं पञ्चेन्द्रियजातिर्वैक्रियं वैक्रियाङ्गोपाङ्गं तैजसकार्मणे समचतुरस्रं वर्णादिचतुष्टयमगुरुलघूपघातं

पराघातमुच्छ्वासं प्रशस्तविहायोगतिस्त्रसं बादरं पर्याप्तकं प्रत्येकं स्थिरास्थिरयोरेकतरं शुभाशुभयोरेकतरं सुभगं सुस्वरमादेयं यशःकीर्त्ययशःकीर्त्योरेकतरा निर्माणमित्येतच्च बन्धस्थानं मिथ्यादृष्टिसासादनमिश्राविरतसम्यग्दृष्टिदेशविरतानां स देवगतिप्रायोग्यं[1] बध्नतामवसेयम् । अत्र स्थिरास्थिरशुभाशुभयशःकीर्त्ययशःकीर्त्तिपदैरष्टौ भङ्गाः । एषैव २८ तीर्थकरसहिता २९, अत्रापि त एवाष्टौ भङ्गाः । नवरमेतद्देवगतिप्रायोग्यं बध्नतामविरतसम्यग्दृष्टीनामवसेयम् । ३० पुनरियं→ देवद्विकं पञ्चेन्द्रियजातिर्वैक्रियं वैक्रियाङ्गोपाङ्गमाहारकमाहारकाङ्गोपाङ्गं तैजसकार्मणे समचतुरस्रं वर्णादिचतुष्टयमगुरुलघूपघातं पराघातमुच्छ्वासं प्रशस्तविहायोगतिस्त्रसं बादरं पर्याप्तं प्रत्येकं शुभं स्थिरं सुभगं सुस्वरमादेयं यशःकीर्त्तिर्निर्माणमित्येतद्बन्धस्थानं देवगतिप्रायोग्यं बध्नतोऽप्रमत्तस्यापूर्वकरणस्याऽवगन्तव्यम्, अत्र सर्वाण्यपि शुभान्येव कर्माणि बन्धमायान्तीति कृत्वैक एव भङ्गः । एषैव ३० तीर्थकरसहिता ३१ तस्मादत्राप्येक एव भङ्गः । सर्वसंख्यया देवगतिप्रायोग्यबन्धस्थानेषु भङ्गाः १८ । तथा नरकगतिप्रायोग्यं बध्नत एकं बन्धस्थानं २८, सा चेयं नरकद्विकं पञ्चेन्द्रियजातिर्वैक्रियं वैक्रियाङ्गोपाङ्गं तैजसकार्मणे हुण्डं वर्णादिचतुष्टयमगुरुलघूपघातं पराघातमुच्छ्वासमप्रशस्तविहायोगतिःबादरंपर्याप्तंप्रत्येकमस्थिरमशुभंदुर्भगंदुःस्वरमनादेयमयशःकीर्त्ति- निर्माणमित्येतदष्टाविंशतिप्रकृत्यात्मकं बन्धस्थानं मिथ्यादृष्टेरवसेयम् । अत्र सर्वेषामशुभत्वादेक एव भङ्गः । एकं तु बन्धस्थानं यशःकीर्त्तिलक्षणम्, तच्च देवगतिप्रायोग्यं बन्धे व्यवच्छिन्नेऽपूर्वकरणादीनां त्रयाणामवगन्तव्यम् ॥२४॥

सम्प्रति कस्मिन्बन्धस्थाने कति भङ्गाः सर्वसंख्यया प्राप्यन्ते इत्येतदाह—

**चउ पणवीसा सोलस नव बाणउईसया य अडयाला ।**
**एयालुत्तर छायालसया[2] एक्केकबंधविही ॥२५॥**

चउ० त्रयोविंशत्यादिषु बन्धस्थानेषु यथासंख्यं चतुरादिसंख्याबन्धविधयो = बन्धभङ्गा वेदितव्याः । सर्वसंख्यया सर्वबन्धस्थानेषु भङ्गाः १३९४५ ॥२५॥

सम्प्रत्युदयस्थानान्याह —

---

१-०तानां सर्वविरतानां न देव०-पा०१ २- तुलना- सप्ततिकाभाष्यगाथा- ८० ।

**वीसिगवीसा चउवीसिगाइ एगाहिया उ इगतीसा ।**
**उदयट्ठाणाणि भवे नव अट्ठ य हुंति नामस्स ॥२६॥**[1]

वीसि० नाम्न उदयस्थानानि १२, तद्यथा→२०।२१।२४।२५।२६।२७।२८।२९।३०।३१।९।८। तत्रैकेन्द्रियाणामुदयस्थानानि ५, तद्यथा→२१।२४।२५।२६।२७। तत्र तैजसकार्मणे अगुरुलघु स्थिरास्थिरे शुभाशुभे वर्णादिचतुष्टयं निर्माणमित्येता द्वादश प्रकृतय उदयमाश्रित्य ध्रुवाः, एतास्तिर्यग्द्विकं स्थावरमेकेन्द्रियजातिर्बादरसूक्ष्मयोरेकतरं पर्याप्तापर्याप्तयोरेकतरं दुर्भगमनादेयं यशःकीर्त्त्ययशःकीर्त्त्योरेकतरमित्येतन्नवप्रकृतिसहिता एकविंशतिरत्र भङ्गाः ५ । बादरसूक्ष्माभ्यां प्रत्येकं पर्याप्तापर्याप्ताभ्यामयशःकीर्त्त्या सह चत्वारो, बादरपर्याप्तयशःकीर्त्तिभिः सहैकः । सूक्ष्मापर्याप्ताभ्यां सह यशःकीर्त्तेरुदयो न स्यादिति कृत्वा तदाश्रिता विकल्पा न प्राप्यन्ते । एषा च २१ योऽग्रे स्वप्रायोग्याः सर्वा अपि पर्याप्तीः पूरयिष्यति तस्य योग्यतया लब्धिमाश्रित्य भवान्तरालादावपि पर्याप्तिरस्तीति लब्धिपर्याप्त्यपेक्षया एकेन्द्रियस्यापान्तरालगतौ वर्त्तमानस्याऽवगन्तव्या । ततः शरीरस्थस्यौदारिकं हुण्डमुपघातं प्रत्येकसाधारणयोरेकतरमिति चतस्रः प्रकृतयः प्रक्षिप्यन्ते, तिर्यगानुपूर्वी चापनीयते, ततश्चतुर्विंशतिः स्यादत्र च भङ्गाः १०, तद्यथा→ बादरपर्याप्तस्य प्रत्येकसाधारणयशःकीर्त्त्ययशःकीर्त्तिपदैः ४, अपर्याप्तस्य बादरस्य प्रत्येकसाधारणाभ्यामयशःकीर्त्त्या सह २, सूक्ष्मस्य पर्याप्तापर्याप्तप्रत्येकसाधारणैरयशःकीर्त्त्या सह ४ इति । बादरवायुकायिकस्य वैक्रियं कुर्वत औदारिकस्थाने वैक्रियं कर्तव्यं, ततश्च तस्यापि चतुर्विंशतिरुदये प्राप्यते, केवलमिह बादरपर्याप्तप्रत्येकाऽयशःकीर्त्तिपदैरेक एव भङ्गस्तेजस्कायिकवायुकायिकयोः साधारणयशः-कीर्त्त्युदयो न स्यादिति तदाश्रिता विकल्पा न प्राप्यन्ते । सर्वसंख्यया चतुर्विंशतौ भङ्गाः ११। तथा शरीरपर्याप्त्या पर्याप्तस्य पराघाते क्षिप्ते २५। अत्र भङ्गाः ६, तद्यथा→ बादरस्य प्रत्येकसाधारणयशःकी-र्त्त्ययशःकीर्त्तिपदैश्चत्वारः, सूक्ष्मस्य प्रत्येकसाधारणाभ्यामयशःकीर्त्त्या सह द्वौ । तथा बादरवायुकायिकस्य वैक्रियं कुर्वतः शरीरपर्याप्त्या पर्याप्तस्य पराघाते क्षिप्ते २५, अत्र च प्राग्वदेक एव भङ्गः । सर्वसंख्यया पञ्चविंशतौ भङ्गाः ७ । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते २६, अत्रापि भङ्गाः प्रागिव ६ । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते आतपोद्योतयोरन्यतरस्मिन्नुदिते २६, अत्रापि भङ्गाः ६, तद्यथा→ बादरस्योद्योतेन सहितस्य प्रत्येकसाधारणयशःकीर्त्त्ययशःकीर्त्तिपदैश्चत्वारः, आतपसहितस्य प्रत्येकयशःकीर्त्त्ययशःकीर्त्तिपदैर्द्वौ । बादरवायुकायिकस्य वैक्रियं कुर्वतः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे

---

१- तुलना- सप्ततिकाभाष्यगाथा- ८८ ।

क्षिप्ते प्रागुक्ता पञ्चविंशतिः षड्विंशतिः स्यात्, तत्र प्राग्वदेक एव भङ्गः, तेजस्कायिकवायुकायिकयोरातपो-द्योतयशःकीर्त्तिनामुदयाऽभावात् तदाश्रिता विकल्पा न प्राप्यन्ते, सर्वसंख्यया षड्विंशतौ त्रयोदश भङ्गाः । तथा प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां षड्विंशतावाऽऽतपोद्योतयोरन्यतरस्मिन् प्रक्षिप्ते २७, अत्र भङ्गाः ६, ये प्रागातपोद्यातान्यतरसहितायां षड्विंशतौ प्रतिपादिताः । सर्वसंख्यया चैकेन्द्रियाणां भङ्गाः ४२ ।

द्वीन्द्रियाणामुदयस्थानानि ६, तद्यथा→ २१।२६।२८।२९।३०।३१। तत्र तिर्यग्द्विकं द्वीन्द्रियजातिस्त्रसं बादरं पर्याप्तापर्याप्तयोरेकतरं दुर्भगमनादेयं यशःकीर्त्ययशःकीर्त्यो रेकतरेत्येता नव प्रकृतयो द्वादशसंख्याभिर्ध्रुवोदयाभिः सह २१, एषा चापान्तरालगतौ वर्तमानस्य द्वीन्द्रियस्याऽवाप्यतेऽत्र भङ्गाः ३, तद्यथा→अपर्याप्तनामोदये वर्तमानस्यायशःकीर्त्या सहैकः, पर्याप्तकनामोदये वर्तमानस्य यशःकीर्त्य-यशःकीर्तिभ्याम् २ । तस्यैव च शरीरस्थस्यौदारिकमौदारिकाङ्गोपाङ्गं हुण्डं सेवार्त्तमुपघातं प्रत्येकमिति षट् प्रकृतयः प्रक्षिप्यन्ते, तिर्यगानुपूर्वी चापनीयते जाताः २६, अत्रापि भङ्गाः ३ प्रागिव । ततः शरीरपर्याप्त्या पर्याप्तस्याप्रशस्तविहायोगति-पराघातयोः प्रक्षिप्तयोः २८, अत्र यशःकीर्त्ययशःकीर्त्तिभ्यां भङ्गौ २, अपर्याप्तकाप्रशस्तविहायोगत्योरत्रोदयाभावात् । ततः प्राणापानपर्याप्त्या पर्याप्तस्य उच्छ्वासे क्षिप्ते २९, अत्रापि तावेव द्वौ भङ्गौ । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते २९ । अत्रापि भङ्गौ २ प्रागिव । सर्वेऽप्येकोनत्रिंशति भङ्गाः ४ । ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायामेकोनत्रिंशति सुस्वरदुःस्वरयोरेकतरस्मिन् प्रक्षिप्ते ३०, अत्र सुस्वरदुःस्वरयशः-कीर्त्ययशःकीर्तिपदैः भङ्गाः ४ । अथवा प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनूदिते उद्योते तूदिते ३०, अत्र यशःकीर्त्ययशःकीर्तिभ्यां भङ्गौ २। सर्वे त्रिंशति ६ । ततो भाषापर्याप्त्या पर्याप्तस्य स्वरसहितायां त्रिंशति उद्योते प्रक्षिप्ते ३१, अत्र सुस्वरदुःस्वरयशःकीर्त्ययशःकीर्तिपदैः ४ भङ्गाः । सर्वसंख्यया द्वीन्द्रियाणां भङ्गाः २२ । एवं त्रीन्द्रियाणां चतुरिन्द्रियाणां च प्रत्येकं षट् षट् उदयस्थानानि भावनीयानि । प्रत्येकं च भङ्गाः द्वाविंशतिः द्वाविंशतिः, सर्वसंख्यया विकलेन्द्रियाणां भङ्गाः ६६ ।

प्राकृततिर्यक्पञ्चेन्द्रियाणामुदयस्थानानि षट्, तद्यथा→२१।२६।२८।२९।३०।३१। तत्र तिर्यग्द्विकं पञ्चेन्द्रियजातिस्त्रसं बादरं पर्याप्तापर्याप्तयोरेकतरं सुभगदुर्भगयोरेकतरमादेयाऽनादेययोरेकतरं यशःकीर्त्ययशःकीर्त्यो रेकतरेत्येता नवप्रकृतयो द्वादशसंख्याभिर्ध्रुवोदयाभिः सह २१, एषा चापान्तरालगतौ वर्तमानस्य तिर्यक्पञ्चेन्द्रियस्यावगन्तव्याऽत्र भङ्गाः ९, तत्र पर्याप्तकनामोदये वर्त्तमानस्य सुभगदुर्भगाभ्या-

मादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां चाष्टौ भङ्गाः, अपर्याप्तकनामोदये वर्तमानस्य दुर्भगानादेयाऽ-यशःकीर्तिभिरेकः ।

*अपरे* पुनराहुः—> सुभगादेये युगपदुदयमायातो दुर्भगानादेये च, ततः पर्याप्तस्य सुभगादेययुगदुर्भगानादेययुगाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां भङ्गाः ४, अपर्याप्तस्य त्वेक एवमुत्तरत्रापि मतान्तरमवगन्तव्यम् ।

ततः शरीरस्थस्यानुपूर्वीमपनीयौदारिकमौदारिकाङ्गोपाङ्गं षण्णां संस्थानानामेकतम-त्संस्थानं संहननानामेकतमत्संहननमुपघातं प्रत्येकमिति षट्कं प्रक्षिप्यते, ततो जाता २६ । अत्र भङ्गाः २८९। तत्र पर्याप्तस्य षड्भिः संस्थानैः षड्भिः संहननैः सुभगदुर्भगाभ्यामादेयानादेयाभ्यां यशःकीर्त्ययशः-कीर्त्तिभ्यां च भङ्गाः २८८, अपर्याप्तस्य हुण्डसेवार्त्तदुर्भगानादेयायशःकीर्तिपदैरेकः तस्यामेव षड्विंशतौ शरीरेण पर्याप्तस्य पराघातेऽन्यतरगतौ च पक्षिप्तायां २८, तत्र ये प्रागुक्ताः भङ्गाः २८८ तेऽत्र गतिद्विकेन गुणिता अवगन्तव्याः ५७६ । ततः प्राणापानेन पर्याप्तस्योच्छ्वासे क्षिप्ते २९, अत्रापि भङ्गाः प्रागिव ५७६ । अथवा शरीरेण पर्याप्तस्योच्छ्वासेऽनुदिते उद्योते तूदिते २९, अत्रापि भङ्गाः ५७६ । सर्वसंख्ययैकोनत्रिंशति भङ्गाः ११५२ । ततो भाषया पर्याप्तस्यान्यतरस्वरक्षेपे ३०, अत्र यानि प्रागुच्छ्वासेन ५७६ तान्येव स्वरद्विकेन गुण्यन्ते, ततो जातानि ११५२ । अथवा प्राणापानेन पर्याप्तस्य स्वरेऽनुदिते उद्द्योते तूदिते ३०, अत्रापि प्रागिव भङ्गाः ५७६ । सर्वसंख्यया त्रिंशति भङ्गाः १७२८ । ततः स्वरसहितायां त्रिंशति उद्योते प्रक्षिप्ते ३१, अत्र च ये प्राग् स्वरसहितायां त्रिंशति भङ्गाः ११५२ उक्तास्त एवात्रापि द्रष्टव्याः । सर्वसंख्ययाऽवैक्रियतिर्यक्पञ्चेन्द्रियाणामुदये[१] भङ्गाः ४९०६ ।

तथा तेषामेव तिर्यक्पञ्चेन्द्रियाणां वैक्रियं कुर्वतामुदयस्थानानि पञ्च, तद्यथा—>२५।२७।२८।२९।३०। तत्र वैक्रियं वैक्रियाङ्गोपाङ्गं समचतुरस्रमुपघातं प्रत्येकमिति पञ्च प्रकृतयः प्रागुक्तायां तिर्यक्पञ्चेन्द्रिययोग्यायामेकविंशतौ प्रक्षिप्यन्ते, तिर्यगानुपूर्वी चापनीयते, ततः २५ स्यादत्र सुभगदुर्भगाभ्या-मादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां च भङ्गाः ८। ततः शरीरेण पर्याप्तस्य पराघाते प्रशस्तविहा-योगतौ च प्रक्षिप्तायां २७ तत्रापि प्रागिव भङ्गाः ८। ततः प्राणापानेन पर्याप्तस्योच्छ्वासे क्षिप्ते २८, अत्राऽपि ८। अथवा शरीरेण पर्याप्तस्योच्छ्वासेऽनुदिते उद्योते तूदिते २८, अत्रापि ८ । सर्वसंख्ययाऽष्टाविंशतौ भङ्गाः १६ । ततो भाषया पर्याप्तस्योच्छ्वाससहितायामष्टाविंशतौ सुस्वरे क्षिप्ते २९, अत्रापि प्रागिव

---

१- ०यया प्राकृतति० - ला० पा० ।

भङ्गाः ८ । अथवा प्राणापानेन पर्याप्तस्य स्वरेऽनुदिते उद्योते तूदिते २९, अत्रापि प्रागिव भङ्गाः ८ । सर्वसंख्ययैकोनत्रिंशति १६ । ततः सुस्वरसहितायामेकोनत्रिंशति उद्योते क्षिप्ते ३०, अत्रापि भङ्गाः ८ । सर्वसंख्यया वैक्रियं कुर्वतां ५६ भङ्गाः । सर्वेषां तिर्यक्पञ्चेन्द्रियाणां सर्वसंख्यया भङ्गाः ४९६२ ।

सामान्यमनुष्याणामुदयस्थानानि ५, तद्यथा—>२१।२६।२८।२९।३०। एतानि सर्वाण्यपि यथा प्राक् तिर्यक्पञ्चेन्द्रियाणामुक्तानि तथैवात्रापि वक्तव्यानि । नवरमेकोनत्रिंशत्त्रिंशच्चोद्योतरहिता वक्तव्या, वैक्रियाहारकसंयतान्मुक्त्वा शेषमनुष्याणामुद्योतोदयाभावात् । तत एकोनत्रिंशति भङ्गाः ५७६, त्रिंशति ११५२, सर्वसंख्यया प्राकृतमनुष्याणां भङ्गाः २६०२ ।

वैक्रियमनुष्याणामुदयस्थानानि ५, तद्यथा—> २५।२७।२८।२९।३०। तत्र मनुष्यगतिः पञ्चेन्द्रियजातिर्वैक्रियं वैक्रियाङ्गोपाङ्गं समचतुरस्रमुपघातं त्रसं बादरं पर्याप्तं प्रत्येकं सुभगदुर्भगयोरेकतरमादेयानादेययोरेकतरं यशःकीर्त्ययशःकीर्त्योरेकतरेति १२ प्रकृतयो द्वादशसंख्याभिर्ध्रुवोदयादिभिः सह २५, अत्र सुभगदुर्भगादेयानादेययशःकीर्त्ययशःकीर्तिपदैः ८ भङ्गाः । देशविरतानां संयतानां च वैक्रियं कुर्वतां सर्वप्रशस्त एव(क) भङ्गो वेदितव्यस्ततः शरीरेण पर्याप्तस्य पराघाते प्रशस्तविहायोगतौ च प्रक्षिप्तायां सत्यां २७, अत्रापि त एव भङ्गाः ८ । तत्र प्राणापानेन पर्याप्तस्योच्छ्वासे क्षिप्ते २८, अत्रापि प्रागिव भङ्गाः ८ । अथवा संयतानामुत्तरवैक्रियं कुर्वतां शरीरेण पर्याप्तानामुच्छ्वासेऽनुदिते उद्योते तूदिते २८, अत्रैक एव भङ्ग संयतानां दुर्भगानादेयायशःकीर्त्युदयाभावात्, सर्वसंख्ययाऽष्टाविंशतौ भङ्गाः ९ । ततो भाषया पर्याप्तस्योच्छ्वाससहितायामष्टाविंशतौ सुस्वरे क्षिप्ते २९, अत्रापि भङ्गाः ८ । अथवा संयतानां स्वरेऽनुदिते उद्योते तूदिते २९, अत्रापि प्रागिवैक एव भङ्गः । सर्वसंख्ययैकोनत्रिंशद्भङ्गा[1] नव । सुस्वरसहितायामेकोनत्रिंशति संयतानामुद्योते क्षिप्ते ३०, अत्रापि भङ्ग एकः । सर्वसंख्यया वैक्रियमनुष्याणां भङ्गाः ३५ ।

आहारकसंयतानामुदयस्थानानि ५, तद्यथा—>२५।२७।२८।२९।३०। तत आहारकमाहारकाङ्गोपाङ्गं समचतुरस्रमुपघातं प्रत्येकमिति पञ्च प्रकृतयः प्रागुक्तायां मनुष्यगतिप्रायोग्यायामेकविंशतौ प्रक्षिप्यते, मनुष्यानुपूर्वी चापनीयते, ततो जाताः २५, केवलमिह पदानि सर्वाण्यपि प्रशस्तान्येव भवन्ति, आहारकसंयतानां दुर्भगानादेयाऽयशःकीर्त्युदयाभावादेक एवात्र भङ्गः । ततः शरीरेण पर्याप्तस्य पराघाते प्रशस्तविहायोगतौ च प्रक्षिप्तायां २७,[2] अत्रापि भङ्ग एकः । ततः प्राणापानेन पर्याप्तस्योच्छ्वासे क्षिप्ते

१- ०त्रिंशति भङ्गा-पा०ला०। २- ०प्रक्षिप्तयोः २७-पा०ला० ।

२८, भङ्ग एकः । अथवा शरीरेण पर्याप्तस्योच्छ्वासेऽनुदिते उद्योते तूदिते २८, भङ्ग एकः । सर्वसंख्यया २८, द्वौ भङ्गौ । ततो भाषया पर्याप्तस्योच्छ्वाससहितायामष्टाविंशतौ सुस्वरे क्षिप्ते २९ भङ्ग एकः । अथवा प्राणापानेन पर्याप्तस्य स्वरेऽनुदिते उद्योते तूदिते २९, अत्राप्येक एव भङ्गः । सर्वसंख्यया २९, द्वौ भङ्गौ । ततो भाषया पर्याप्तस्य सुस्वरसहितायामेकोनत्रिंशत्युद्योते क्षिप्ते ३०, भङ्ग एकः । सर्वसंख्ययाऽऽहारकशरीरिणां भङ्गाः ७।

केवलिनामुदयस्थानानि दश, तद्यथा→ २०।२१।२६।२७।२८।२९।३०।३१।९।८। तत्र मनुष्यगतिः पञ्चेन्द्रियजातिस्त्रसं बादरं पर्याप्तं सुभगमादेयं यशःकीर्तिरित्येताः ८ ध्रुवोदयाभिर्द्वादशसंख्याभिः सह २०, अत्रैको भङ्गः, एषा चाऽतीर्थंकरकेवलिनः समुद्घातगतस्य कार्मणकाययोगे वर्तमानस्याव-गन्तव्या । सैव २० तीर्थंकरसहिता २१, अत्राप्येको भङ्गः, एषा च तीर्थंकरकेवलिनः समुद्घातगतस्य कार्मणकाययोगे वर्तमानस्य द्रष्टव्या । तथा तस्यामेव विंशतावौदारिकं संस्थानानामेकतमत् संस्थानमौदारि-काङ्गोपाङ्गं वज्रर्षभनाराचसंहननमुपघातं प्रत्येकमिति षट्के क्षेपे २६, एषा चाऽतीर्थंकरकेवलिन औदारिकमिश्रकाययोगे वर्तमानस्य ज्ञेया । अत्र षड्भिः संस्थानैः ६ भङ्गाः स्युः, परं ते सामान्यमनुष्योद-यस्थानेष्वपि सम्भवन्तीति न पृथग्गण्यन्ते । एषैव २६ तीर्थंकरसहिता २७ स्यादेषा तीर्थंकरस्यौदारिकमिश्र-काययोगे वर्त्तमानस्यावसेयाऽत्र संस्थानं समचतुरस्रमेव वक्तव्यम्, तत एक एवात्र भङ्गः । सैव २६ पराघातोच्छ्वासान्यतरखगत्यन्यतरस्वरसहिता ३०, एषा चाऽतीर्थंकरस्य सयोगिकेवलिन औदारिककाययोगे वर्त्तमानस्यावगन्तव्याऽत्र संस्थानषट्कप्रशस्ताप्रशस्तविहायोगतिसुस्वरदुःस्वरैर्भङ्गाः २४, ते च सामान्यम-नुष्योदयस्थानेष्वपि प्राप्यन्त इति न पृथग्गण्यन्ते । एषैव च ३० तीर्थंकरनामसहिता ३१, सा च सयोगिकेवलिनस्तीर्थंकरस्यौदारिककाययोगे वर्त्तमानस्यावसेया एषैव[१] च ३१ वाग्योगे निरुद्धे ३०, उच्छ्वासे निरुद्धे २९। अतीर्थंकरकेवलिनः[२] प्रागुक्ता ३०, वाग्योगे निरुद्धे सति २९, अत्रापि षड्भिः संस्थानैर्विहायोगतिद्विकेन च भङ्गाः १२ प्राप्यन्ते, ते च प्रागिव न पृथग्गण्यन्ते । तत उच्छ्वासे निरुद्धे २८, अत्रापि संस्थानादिगताः १२ भङ्गा न पृथग्गणयितव्याः, सामान्यमनुष्योदयस्थानग्रहणेन गृही-तत्वात् । तथा मनुष्यगतिः पञ्चेन्द्रियजातिस्त्रसं बादरं पर्याप्तं सुभगमादेयं यशःकीर्तिस्तीर्थंकरमिति नवोदयः, एषा(प) च तीर्थकृतोऽयोगिकेवलिनश्चरमसमये वर्त्तमानस्य प्राप्यते । स एवातीर्थंकरस्य तीर्थंकरनामरहितो-ऽष्टोदयः । इह केवल्युदयस्थानमध्ये २०।२१।२७।२९।३०।३१।९।८। रूपेष्वष्टसूदयस्थानेषु प्रत्येकमेकैको

१-०सेया, एक एवात्र भङ्गः। एषैव-पा०। २-२९, अत्र स्थानद्वये एकैको भङ्गः। अती०-पा०।

विशेषभङ्गाः प्राप्यत इत्यष्टौ भङ्गास्तत्र विंशत्यष्टकयोर्भङ्गावतीर्थकृतः, शेषेषूदयस्थानेषु षट्सु तीर्थकृतः ६ भङ्गाः । सर्वसंख्यया मनुष्याणामुदयस्थानेषु भङ्गाः २६५२ ।

देवानामुदयस्थानानि ६, तद्यथा→२१।२५।२७।२८।२९।३०। तत्र देवद्विकं पञ्चेन्द्रियजातिस्त्रसं बादरं पर्याप्तं सुभगदुर्भगयोरेकतरमादेयानादेययोरेकं यशःकीर्त्ययशःकीर्त्योरेकतरेति ९ ध्रुवोदयाभिर्द्वादशसंख्याभिः सह २१, अत्र सुभगदुर्भगादेयानादेययशःकीर्त्ययशःकीर्तिपदैर्भङ्गाः ८ । दुर्भगानादेयाऽयशःकीर्तीनामुदयः पिशाचादीनामवगन्तव्यः । ततः शरीरस्थस्य वैक्रियं वैक्रियाङ्गोपाङ्गमुपघातं प्रत्येकं समचतुरस्रमिति ५ प्रकृतयः प्रक्षिप्यन्ते, देवानुपूर्वी चापनीयते, ततो जाता २५, अत्रापि त एव ८ भङ्गाः । ततः शरीरेण पर्याप्तस्य पराघाते प्रशस्तविहायोगतौ च प्रक्षिप्तायां २७, अत्रापि भङ्गाः ८, देवानामप्रशस्तविहायोगतेरुदयाभावात् ततः प्राणापानेन पर्याप्तस्योच्छ्वासे क्षिप्ते २८, अत्रापि भङ्गाः ८ । अथवा शरीरेण पर्याप्तस्योच्छ्वासेऽनुदिते उद्योते तूदिते २८, अत्रापि भङ्गाः ८ । सर्वसंख्ययाऽष्टाविंशतौ भङ्गाः १६ । ततो भाषया पर्याप्तस्य सुस्वरे क्षिप्ते २९ भङ्गाः ८, देवानां दुःस्वरोदयाभावात् । अथवा प्राणापानेन पर्याप्तस्य सुस्वरेऽनुदिते उद्योते तूदिते २९, उत्तरवैक्रियं हि कुर्वतो देवस्योद्योतोदयो लभ्यते, अत्रापि भङ्गाः ८ । सर्वसंख्ययैकोनत्रिंशति भङ्गाः १६ । ततो भाषया पर्याप्तस्य सुस्वरसहितायामेकोनत्रिंशत्युद्योते क्षिप्ते ३०, अत्रापि भङ्गाः ८ । सर्वसंख्यया भङ्गाः ६४ । नैरयिकाणामुदयस्थानानि पञ्च, तद्यथा→२१।२५।२७।२८।२९। तत्र नरकद्विकं पञ्चेन्द्रियजातिस्त्रसं बादरं पर्याप्तं दुर्भगमनादेयमयशःकीर्तिरिति नव द्वादशसंख्याभिःर्ध्रुवोदयाभिः सह २१, भङ्ग एकः । एवमन्यत्रापि । ततः शरीरस्थस्य वैक्रियं वैक्रियाङ्गोपाङ्गं हुण्डमुपघातं प्रत्येकमिति ५ प्रकृतयः क्षिप्यन्ते, नरकानुपूर्वी चापनीयते, ततः २५ । ततः शरीरेण पर्याप्तस्य पराघाताऽप्रशस्तविहायोगत्योः प्रक्षिप्तयोः २७ । ततः प्राणापानेन पर्याप्तस्योच्छ्वासे क्षिप्ते २८ । ततो भाषया पर्याप्तस्य दुःस्वरे क्षिप्ते २९ । सर्वसंख्यया नैरयिकाणां पञ्च भङ्गाः । सकलोदयस्थानभङ्गाः पुनः ७७९१ ॥२६॥

संप्रति कस्मिन्नुदयस्थाने कति भङ्गाः प्राप्यन्ते, एतदाह —

**एग बियालेक्कारस तेत्तीसा छस्सयाणि तेत्तीसा ।**
**बारससत्तरससयाणहिगाणि बिपंचसीईहिं ॥२७॥**[1]

---

१- तुलना- सप्ततिकाभाष्यगाथा- १२२ ।

**अउणत्तीसेक्कारससयाहिगा सतरसपंचसट्ठीहिं ।**
**इक्केक्कगं च वीसादट्ठुदयंतेसु उदयविही ॥२८॥**[1]

एग० अत० त्रिंशत्यादिष्वष्टपर्यन्तेषु द्वादशसूदयस्थानेषु यथासंख्यमेकादिसंख्या उदय-विधयः ॥२७॥२८॥

संप्रति सत्तास्थानान्याह —

**तिदुनउई उगुनउई अट्ठच्छलसी असीई उगुसीई ।**
**अट्ठयछप्पणत्तरि नव अट्ठ य नामसंताणि ॥२९॥**

तिदु० नाम्नः सत्तास्थानानि १२, तद्यथा→९३।९२।८९।८८।८६।८०।७९।७८।७६।७५।९।८। तत्र सर्वप्रकृतिसमुदायः ९३ । सैव तीर्थकरोना ९२ । त्रिनवतिरेवाहारकद्विकाहारकबन्धनाहारकसंघातोना ८९ । सैव तीर्थोना ८८ । ततो देवद्विके नरकद्विके वाऽन्यतरस्मिन्नुद्वलिते ८६, अथवाऽशीतिसत्कर्मणो नरकगतिप्रायोग्यं बध्नतो [नरकद्विक-वैक्रिय-चतुष्टयबन्धे ८६, अथवाऽशीतिसत्कर्मणो देवगतिप्रायोग्यं बध्नतो देवद्विकवैक्रियचतुष्टयबन्धे ८६ । ततो नरकद्विकवैक्रियचतुष्टयोद्वलने ८० । [अथवा देवद्विकवैक्रियचतुष्टयोद्वलने कृते ८० ।] ततो नरद्विकोद्वलिते ७८ । एतान्यक्षपकाणां सत्तास्थानि । क्षपकाणां पुनरमूनि→त्रिनवतेर्नरकद्विकतिर्यग्द्विकैकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजातिस्थावरातपोद्योतसूक्ष्मसाधारणरूपे त्रयोदशके क्षीणे ८० । द्विनवतेः क्षीणे ७९ । एकोननवतेः क्षीणे ७६ । अष्टाशीतेः क्षीणे ७५ । नरगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्त्तिर्तीर्थकराणीति नवकं सत्तास्थानम्, तच्चायोगिकेवलिनस्तीर्थकरस्य चरमसमये वर्त्तमानस्य प्राप्यते । तदेवातीर्थकरकेवलिनश्चरमसमये तीर्थकरनामोनमष्टकम् ॥२९॥

संप्रति संवेधमाह—

**अट्ठ य बारस बारस बंधोदयसंतपयडिठाणाणि ।**
**ओहेणादेसेण य जत्थ जहासंभवं विभजे ॥३०॥**

अट्ठ० नाम्नो बन्धोदयसत्प्रकृतिसत्तास्थानानि यथाक्रममष्ट-द्वादश-द्वादशसंख्यानि, तान्योघेन सामान्येनादेशेन च विशेषेण च यथासम्भवं यानि यत्र यथा सम्भवन्ति तानि तत्र तथा

१- तुलना- सप्ततिकाभाष्यगाथा १२३ ।

विभजेत् । तत्रामुकं बन्धस्थानं बध्नत एतावन्त्युदयस्थानान्येतावन्ति च सत्तास्थानानि । एवं च तेषां परस्परं संवेध इत्यादेशः ॥३०॥

तत्र पूर्वं सामान्येन संवेधचिन्तामाह ---

**नव पंचोदय संता तेवीसे पण्णवीस छव्वीसे**
**अट्ठ चउरट्ठवीसे नवसत्तुगतीस तीसंमि ॥३१॥**
**एगेगमेगतीसे एगे एगुदय अट्ठ संतम्मि ।**
**उवरयबंधे दस दस वेयगसंतम्मि ठाणाणि ॥३२॥**

नव० एगे० २३ बन्धे २५ बन्धे २६ बन्धे च प्रत्येकं नव नवोदयस्थानानि, पञ्च पञ्च सत्तास्थानानि । तत्र त्रयोविंशतिबन्धोऽपर्याप्तैकेन्द्रियप्रायोग्य एव, तद्बन्धकाश्चैकेन्द्रिय-द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियतिर्यक्पञ्चेन्द्रिया मनुष्याश्च । एतेषां च २३ बन्धकानां यथायोगं सामान्येन नवोदयस्थानानि, तद्यथा—>२१।२४।२५।२६।२७।२८।२९।३०।३१। पञ्च सत्तास्थानानि, तद्यथा—>९२।८८।८६।८०।७८। तत्रैकविंशत्युदये वर्तमाना सर्वेषामपि पञ्चापि सत्तास्थानि, केवलं मनुष्याणां ७८ वर्जानि चत्वारि सत्तास्थानानि वक्तव्यानि, यतोऽष्टसप्ततिर्मनुष्यद्विके उद्वलिते प्राप्यते, न च मनुष्याणां तदुद्वलनसम्भवः । २४ उदयेऽपि पञ्चापि सत्तास्थानानि, केवलं वायोर्वैक्रियं कुर्वतः २४ उदये वर्तमानस्य ८०।७८ वर्जानि त्रीणि सत्तास्थानानि, यतस्तस्य वैक्रियषट्कं मनुष्यद्विकं च नियमादस्ति, यतो वैक्रियं साक्षादनुभवन् वर्त्तत इति न तदुद्वलयति, तदभावाच्च न देवद्विक-नरकद्विके अपि, समकालं वैक्रियषट्कस्योद्वलनसंभवात् तथास्वाभाव्याद्, वैक्रियषट्के चोद्वलिते सति पश्चान्मनुष्यद्विकमुद्वलयति न पूर्वमित्यशीत्यष्टसप्ततिसत्तास्थानाऽसम्भवः । २५ उदयेऽपि पञ्चापि सत्तास्थानानि । तत्राष्टसप्ततिरवै-क्रियवायुकायिकतेजस्कायिकानधिकृत्य प्राप्यते नान्यान्, यतस्तेजस्कायिकवायुकायिकवर्जोऽन्यः सर्वोऽपि पर्याप्तको नियमान्मनुष्यद्विकं बध्नाति । २६ उदयेऽपि पञ्चापि नवरमष्टसप्ततिरवैक्रियवायुकायिक - तेजस्कायिकानां द्वित्रिचतुःपञ्चेन्द्रियाणां वा तेजोवायुभवादनन्तरागतानां पर्याप्तापर्याप्तानां, ते हि यावन्मनुष्यद्विकं न बध्नन्ति तावत्तेषामष्टसप्ततिः प्राप्यते, नान्येषां । २७ उदये ७८ वर्जानि ४, सप्तविंशत्युदयो हि तेजो-वायुवर्जपर्याप्तबादरैकेन्द्रियवैक्रियतिर्यग्मनुष्याणां, तेषां चावश्यं मनुष्यद्विक-सम्भवदष्टसप्ततिर्नावाप्यते । २८।२९।३०।३१। उदयेषु नियमात् ७८ वर्जानि ४ सत्तास्थानानि । तदेवं त्रयोविंशतिबन्धकानां यथायोगं नवाप्युदयस्थानान्यधिकृत्य ४० सत्तास्थानानि स्युः । २५।२६ बन्धकानाम-

ष्येवमेव, केवलं पर्याप्तैकेन्द्रियप्रायोग्य२५।२६।बन्धकानां देवानां २१।२६।२७।२८।२९।३० रूपेषु षट्सूदयस्थानेषु ९२।८८ इति द्वे द्वे सत्तास्थाने वक्तव्ये । अपर्याप्तविकलेन्द्रिय-तिर्यक्पञ्चेन्द्रियमनुष्यप्रायोग्यां तु पञ्चविंशतिं देवा न बध्नन्ति, देवानां तत्रोत्पादाऽभावात् ।[1] अष्टाविंशतौ बध्यमानायामष्टावुदयस्थानानि,[2] तद्यथा—>२१।२५।२६।२७।२८।२९।३०।३१। इह अष्टाविंशतिर्द्विधा—>देवगतिप्रायोग्या नरकगतिप्रायोग्या च, तत्र देवगतिप्रायोग्याया बन्धेऽष्टाप्युदयस्थानानि नानाजीवापेक्षया प्राप्यन्ते । नरकगतिप्रायोग्यायास्तु बन्धे द्वे, तद्यथा—>३०।३१। अष्टाविंशतिबन्धकानां सामान्येन ४ सत्तास्थानानि, तद्यथा—>९२।८९।८८।८६।

तत्र देवगतिप्रायोग्याऽष्टाविंशतिबन्धकानां २१ उदयः क्षायिकसम्यग्दृष्टीनां वेदकसम्यग्दृष्टीनां वा पञ्चेन्द्रियतिर्यग्मनुष्याणामपान्तरालगतौ वर्त्तमानानामवसेयः, न मिथ्यादृष्टेर्यतो भवादौ सर्वपर्याप्तिपर्याप्त एव मिथ्यादृष्टिर्देवगतिप्रायोग्य२८बन्धकः । २१।२५।२६।२७।२८।२९। उदये वर्त्तमानोऽपर्याप्त एव, ततस्तत्र न देवगतिप्रायोग्य२८बन्धको मिथ्यादृष्टिः । ननु यद्येवं वैक्रियतिर्यग्मनुष्याणां २५।२७।२८।२९। उदयेष्वपि वर्तमानानां मिथ्यादृष्टीनां देवगतिप्रायोग्य२८बन्धकत्वमुक्तं तत्कथं सङ्गच्छते ? सत्यम्, तत्र भवादौ पर्याप्तयः पूरिता एव, पश्चाच्च वैक्रियाङ्गनिष्पत्तिकाले औदारिकादितनुनिवृत्तौ[3] पर्याप्तय उदयान्निवर्त्तन्तेऽतस्तत्र मिथ्यात्विनोऽपि तद्बन्धो न विरुद्धः । ततः २१ उदये वर्त्तमानानां देवगतिप्रायोग्याऽष्टाविंशतिबन्धकानां द्वे सत्तास्थाने, तद्यथा—>९२।८८ एकविंशत्युदये वर्त्तमानो जीवो देवगतिप्रायोग्याऽष्टाविंशतिबन्धकः सम्यग्दृष्टिरेव स्याद्, यदि तस्य तीर्थंकरनाम सद्भवति तदा तद्बन्धोऽप्यवश्यंभावीत्येकोनत्रिंशद्बन्धकता स्यादतः २१ उदये वर्त्तमानस्य देवगतिप्रायोग्याष्टाविंशतिबन्धकस्य सत्तायां ९३ न स्यात् । पञ्चविंशत्युदयेऽपि २८ बन्धकानामाहारकसंयतवैक्रियतिर्यग्मनुष्याणां सामान्येन त एव द्वे सत्तास्थाने । तत्राहारकसंयतो नियमादाहारकसत्कर्मा ततस्तस्य ९२ सत्तास्थानम् । शेषाश्च तिर्यञ्चो मनुष्याश्चाहारकसत्कर्माणस्तद्रहिताश्च स्युस्ततस्तेषां द्वे अपि सत्तास्थाने । २६।२७।२८।२९। उदयेष्वपि त एव द्वे सत्तास्थाने सामान्येनाऽवगन्तव्ये । ३० उदये देवगतिनरकगतिप्रायोग्य२८बन्धकानां सामान्येन ४ सत्तास्थानानि, तद्यथा—>९२।८९।८८।८६। तत्र ९२।८८ प्रागिव । एकोननवतिः पुनरियं कश्चिन्मनुष्यस्तीर्थंकरनामसत्कर्मा वेदकसम्यग्दृष्टिः पूर्वं बद्धनरकायुष्को नरकाभिमुखः सम्यक्त्वात्प्रच्युत्य मिथ्यात्वं गतस्तस्य तदा तीर्थंकरनामबन्धाभावान्नरकगतिप्रायोग्यां २८ बन्धतः ८९ सत्तायां प्राप्यते । ८६ एवम्—>इह

१-०न्ति, अपर्याप्तेषु तेषु देवानामुत्पा० - पा० । २-०नायां चतुर्विंशतिवर्जान्येकविंशतेरेकत्रिंशत्पर्यन्तान्यष्टा० पा० ।

३-०औदारिकतनु० - ला०पा० ।

तीर्थकराहारकचतुष्कदेवद्विकनरकद्विक वैक्रियचतुष्टयोनास्त्रिनवतिरशीतिः स्यात्, ततस्तत्सत्कर्मा पञ्चेन्द्रिय-तिर्यग्मनुष्यो वा जातः सन् सर्वाभिः पर्याप्तिभिः पर्याप्तो यदि विशुद्धस्ततो देवगतिप्रायोग्यां २८ बध्नाति, तद्बन्धे च देवद्विकं वैक्रियचतुष्टयं सत्तायां प्राप्यत इति तस्य ८६ । अथ सर्वसंक्लिष्टस्ततो नरकगतिप्रायोग्यां २८ बध्नाति, तद्बन्धे च नरकद्विकं वैक्रियचतुष्टयं चाऽवश्यं बध्यमानत्वात् सत्तायां प्राप्यते इत्येवमपि तस्य ८६ । ३१ उदये ३ सत्तास्थानानि, तद्यथा—>९२।८८।८६। तीर्थकरनामसत्कर्मणस्तिर्यक्षूत्पादाऽभा-वादेकोननवतिरिह न प्राप्यते, भावना प्राग्वत् । [तदेवं २८ बन्धेऽष्टावप्युदयस्थानान्यधिकृत्य १९ संख्यानि सत्तास्थानानि भवन्ति] ।

तथा २९।३० बद्ध्यमानायां प्रत्येकं नव नवोदयस्थानानि, सप्त सप्त सत्तास्थानानि । तत्रोदयस्थानान्यमूनि, तद्यथा—>२१।२४।२५।२६।२७।२८।२९।३०।३१। सप्त सत्तास्थानानि, तद्यथा—>९३।९२।८९।८८।८६।८०।७८। तत्र विकलेन्द्रिय-तिर्यक्पञ्चेन्द्रियप्रायोग्यां २९बध्नतां पर्याप्तापर्याप्तकैकेन्द्रियविकलेन्द्रियतिर्यक्पञ्चेन्द्रियाणां २१ उदये ५ सत्तास्थानानि, तद्यथा—>९२।८८।८६।८०।७८। एवं २४।२५।२६ उदयेष्वपि वक्तव्यम्, २७।२८।२९।३०।३१ उदयेषु ७८ वर्जानि चत्वारि सत्तास्थानानि, भावना यथा त्रयोविंशतिबन्धकानां प्रागुक्ता । मनुजगतिप्रायोग्यां २९ बध्नतामेकेन्द्रिय-विकलेन्द्रिय-तिर्यक्पञ्चेन्द्रियाणां तिर्यग्गतिमनुष्यगतिप्रायोग्यां पुनर्बध्नतां मनुष्याणां च स्वस्वोदयस्थानेषु यथायोगं वर्त्तमानानां ७८वर्जानि तान्येव ४ सत्तास्थानान्यवगन्तव्यानि । देवनैरयिकाणां तिर्यक्पञ्चेन्द्रियमनुष्यगतिप्रायोग्यां २९ बध्नतां स्वस्वोदयेषु वर्त्तमानानां द्वे द्वे सत्तास्थाने, तद्यथा—>९२।८८ । केवलं नैरयिकस्य मिथ्यादृष्टेस्तीर्थकरसत्कर्मणो मनुष्यगतिप्रायोग्यां २९ बध्नतः स्वोदयेषु पञ्चसु यथायोगं वर्त्तमानस्यैकोननवतिरेका वक्तव्या । यतस्तीर्थकरनामसहितस्याहारकचतुष्टयरहितस्यैव मिथ्यात्वगमनसम्भवस्ततस्त्रिनवतेराहारकचतुष्केऽपनीते सत्येकोननवतिरेव तस्य सत्तायां स्याद् देवगतिप्रायोग्यां २९ तीर्थकर-नामसहितां बध्नतः पुनरविरतसम्यग्दृष्टेर्मनुष्यस्यैकविंशत्युदये वर्त्तमानस्य द्वे सत्तास्थाने, तद्यथा—>९३।८९। एवं २५।२६।२७।२८।२९।३० उदयेष्वपि त एव द्वे सत्तास्थाने वक्तव्ये । आहारकसंयतानां स्वस्वोदये वर्त्तमानानामेक एव ९३रूपं सत्तास्थानमवगन्तव्यम् । तदेवं सामान्येन २९ बन्धे २१ उदये सप्त सत्तास्थानानि, २४ उदये ५, २५ उदये सप्त, २६ उदये ७, २७ उदये ६, २८ उदये ६, ३० उदये ६, ३१ उदये ४ । [सर्वसंख्यया सत्तास्थानानि ५४] । तथा यथा तिर्यग्गतिप्रायोग्यां २९ बध्नतामेकेन्द्रिय-विकलेन्द्रिय-तिर्यक्पञ्चेन्द्रिय-मनुज-देव-नैरयिकाणामुदय[सत्ता]स्थानानि भावितानि,

तथा त्रिंशतमप्युद्योतसहितां तिर्यग्गतिप्रायोग्यां बध्नत एकेन्द्रियादीनामुदयसत्तास्थानानि भावनीयानि । मनुष्यगतिप्रायोग्यां तीर्थकरसहितां त्रिंशतं बध्नतां देव-नैरयिकाणामुदयस्थानान्युच्यन्ते । तत्र देवस्य यथोक्तां त्रिंशतं बध्नतः २१उदये वर्त्तमानस्य द्वे सत्तास्थाने ९३।८९। २१उदये वर्त्तमानस्य नैरयिकस्यैकं सत्तास्थानं ८९, ९३रूपं सत्तास्थानं तस्य न स्यात् तीर्थकराहारककर्मणो नरकेषूत्पादाभावात् । एवं २५।२७।२८।२९।३०। उदयेष्वपि भावनीयम् । नवरं नैरयिकस्य त्रिंशदुदयो न विद्यते, ३०उदयो ह्युद्योते सति प्राप्यते न च नैरयिकस्योद्योतोदयः स्यात्, तदेवं सामान्येन ३०बन्धकानां २१उदये ७, २४ उदये ५, २५ उदये ७, २६ उदये ५, २७ उदये ६, २८ उदये ६, २९ उदये ६, ३० उदये ६, ३१ उदये ४ । [सर्वसंख्यया ५२] ॥३१॥

तथैकत्रिंशति बध्यमानायामेकमुदयस्थानं ३०, यत एकत्रिंशद्देवगतिप्रायोग्यं तीर्थकराहारकसहितं कर्म बध्नतोऽप्रमत्तसंयतस्यापूर्वकरणस्य वा प्राप्यते, न च ते वैक्रियमाहारकं कुर्वन्ति, ततः पञ्चविंशत्यादय उदया न प्राप्यन्ते । एकं सत्तास्थानं ९३, तीर्थकराहारकचतुष्टययोरपि सत्तासम्भवात् ।

तथैकस्मिन् यशःकीर्तिरूपे कर्मणि बध्यमाने एकमुदयस्थानम् ३०, एकां हि यशःकीर्तिं बध्नन्त्यपूर्वकरणादयस्ते चाऽतिविशुद्धत्वाद् वैक्रियमाहारकं वा नारभन्ते । ततः पञ्चविंशत्यादीन्युदयस्थानानीहापि न प्राप्यन्ते, अष्टौ सत्तास्थानानि, तद्यथा—९३।९२।८९।८८।८०।७९।७६।७५। तत्राद्यानि ४ सत्तास्थानान्युपशमश्रेण्यामथवा क्षपकश्रेण्यां यावदनिवृत्तिगुणस्थाने गत्वा त्रयोदशनामानि न क्षिप्यन्ते, त्रयोदशसु नामसु क्षीणेषु नानजीवापेक्षयोपरितनानि चत्वारि लभ्यन्ते, तानि च तावल्लभ्यन्ते यावत्सूक्ष्मसम्परायगुणस्थानम् । तथोपरते [बन्धे] बन्धाभावे इत्यर्थः, वेदनं वेदो, वेद एव वेदकस्तस्मिन्नुदये इत्यर्थः, सत्तायां च प्रत्येकं दश दश स्थानानि । तत्रामूनि दशोदयस्थानानि, तद्यथा—२०।२१।२६।२७।२८।२९।३०।३१।९।८। दश सत्तास्थानानि, तद्यथा—९३।९२।८९।८८।८०।७९।७६।७५।९।८। तत्र विंशत्युदये द्वे सत्तास्थाने, ७९।७५। एवं २६।२८ उदययोरपि द्रष्टव्यम् । २१उदये इमे द्वे सत्तास्थाने, ८०।७९। एवं २७ उदयेऽपि एकोनत्रिंशति ४ सत्तास्थानानि ८०।७६।७९।७५। यत एकोनत्रिंशत् तीर्थकरस्यातीर्थकरस्य च स्यात्, तत्राद्ये द्वे तीर्थकरमधिकृत्य द्रष्टव्ये, अन्तिमे द्वे अतीर्थकरमधिकृत्य । ३० उदये ८ सत्तास्थानानि, नवाष्टकवर्जानि । तत्राद्यानि ४ उपशान्तकषायस्य । ८० क्षीणकषायस्य सयोगिकेवलिनो वा । आहारकसत्कर्मणस्तीर्थकरस्य तस्यैवातीर्थकरस्य ७९ । आहारकचतुष्टयरहितस्य तीर्थकरस्य क्षीणकषायस्य सयोगिकेवलिनो वा ७६ । तस्यैवातीर्थकरस्य ७५। ३१ उदये द्वे सत्तास्थाने, ८०।७६। एते च

तीर्थकरकेवलिनोऽवगन्तव्ये, अतीर्थकरकेवलिनः ३१उदयस्यैवाभावात् । नवोदये ३, तद्यथा→ ८०।७६।९। तत्राद्ये द्वे यावत् द्विचरमस्तावदयोगिकेवलिनस्तीर्थकरस्य वेदितव्ये, चरमसमये तु नव । अष्टोदये ३ सत्तास्थानानि, ७९।७५।८। तत्राद्ये द्वे अयोगिकेवलिनोऽतीर्थकरस्य द्विचरमसमयं यावद्वेदितव्ये, चरमसमये त्वष्टौ ।।३२।।

संप्रत्युक्तक्रमेणैषां जीवस्थानानि गुणस्थानानि चाधिकृत्य स्वामी निर्दिश्यते—

**तिविगप्पपगइठाणेहिं जीवगुणसन्निएसु ठाणेसु ।**
**भंगा पउंजियव्वा जत्थ जहा संभवो भवइ ।।३३।।**

तिवि० त्रयो विकल्पा बन्धोदयसत्तारूपास्तेषां सम्बन्धिभिः प्रकृतिस्थानैर्जीवस्थानेषु गुणस्थानेषु च भङ्गाः पूर्वोक्तानुसारेण च प्रयोक्तव्याः ।।३३।।

तत्र पूर्वं जीवस्थानान्यधिकृत्याह—

**तेरससु जीवसंखेवएसु नाणंतराय तिविगप्पो ।**
**एगंमि तिदुविगप्पो करणं पइ एत्थ अविगप्पो ।।३४।।**

तेर० जीवसंक्षेपाः=जीवस्थानानीत्यर्थः । पर्याप्तसंज्ञिपञ्चेन्द्रियवर्जेषु शेषेषु त्रयोदशसु जीवस्थानेषु ज्ञानावरणान्तराययोर्बन्धोदयसत्तारूपास्त्रयो विकल्पाः प्राप्यन्ते, तद्यथा→पञ्चविधो बन्धः पञ्चविध उदयः पञ्चविधा सत्ता, ज्ञानावरणान्तराययोर्ध्रुवबन्धोदयसत्ताकत्वात् । तथैकस्मिन् संज्ञिपर्याप्तपञ्चेन्द्रियलक्षणे जीवस्थाने त्रयो वा विकल्पा द्वौ वा, तत्र त्रयो विकल्पा इमे→५ बन्धः ५ उदयः ५ सत्ता । एते च सूक्ष्मसम्परायगुणस्थानकं यावत्प्राप्यन्ते, ततः परं बन्धव्यवच्छेदे उपशान्तमोहे क्षीणमोहे च द्वौ विकल्पौ, तद्यथा→५ उदयः ५ सत्ता । तथा करणं=द्रव्यमनोरूपं प्रतीत्य यः संज्ञी सयोगिकेवल्ययोगिकेवली वा भवस्थस्तस्मिन् अत्र=ज्ञानावरणेऽन्तराये च अविकल्पः, आमूलं तदुच्छेदे सति केवलित्वभावात् ।।३४।।

दर्शनावरणं जीवस्थानेष्वाह—

**तेरे नव चउ पणगं नव संतेगम्मि भंगमेकारा ।**
**वेयणियाउयगोए विभज्ज मोहं परं वोच्छं ।।३५।।**

तेर० पर्याप्तसंज्ञिपञ्चेन्द्रियवर्जेषु शेषेषु १३ जीवस्थानेषु नवविधो बन्धश्चतुर्विधः पञ्चविधो

बोदयो नवविधा सत्ता। तथैकस्मिन् पर्याप्तसंज्ञिपञ्चेन्द्रियरूपे ११ भङ्गास्ते च यथा प्राग् संवेधचिन्तायामुक्तास्तथैवात्र वक्तव्याः । तथा वेदनीयायुर्गोत्रेषु यानि बन्धादिप्रकृतिस्थानानि तानि यथागमं जीवस्थानेषु विभजेत्, तत्रेयं वेदनीयगोत्रयोर्विकल्पनिरूपणार्थं *मलभाष्यगाथा* →

*'पज्जत्तगसन्नियरे अट्ठ चउक्कं च वेयणियभंगा सत्तग तिगं च गोए पत्तेयं जीवठाणेसु'* ॥

[ ]

पर्याप्ते संज्ञिनि वेदनीयस्य ८ भङ्गास्तद्यथा→असातस्य बन्धोऽसातस्योदयः सातासाते सती अथवा सातस्य बन्धः सातस्योदयः सातासाते सती, एतौ द्वौ भङ्गौ मिथ्यादृष्टेः प्रमत्तं यावत्प्राप्येते । तथा सातबन्धोऽसातोदयः सातासाते सती अथवा सातबन्धः सातोदयः सातासाते सती, एतौ मिथ्यादृष्टेः सयोगिकेवलिगुणस्थानकं यावत्प्राप्येते । असातोदयः सातासाते सती अथवा सातोदयः सातासाते सती, एतावयोगिकेवलिनि द्विचरमसमयं यावत्प्राप्येते । चरमसमये त्वसातोदयोऽसातसत्ता यस्य द्विचरमसमये सातं क्षीणं, यस्य त्वसातं क्षीणं तस्य सातोदयः सातसत्ता । इह सयोगिकेवल्ययोगिकेवली च द्रव्यमनोऽभिसम्बन्धात् संज्ञी व्यवह्रियते, ततः संज्ञिनि पर्याप्ते वेदनीयस्य ८ भङ्गा उच्यमाना न विरुद्धाः । तथेतरेषु पर्याप्तसंज्ञिव्यतिरिक्तेषु १३ जीवस्थानेषु प्रत्येकं प्रत्येकं चत्वारो भङ्गाः ।

तथा गोत्रे=गोत्रस्य संज्ञिनि पर्याप्ते ७ भङ्गास्ते च प्राग्वत् । तथेतरेषु १३ जीवस्थानेषु प्रत्येकं त्रयस्त्रयो भङ्गाः, शेषा न सम्भवन्ति, तिर्यक्षूच्चैर्गोत्रस्योदयाभावात् ।

सम्प्रत्यायुषो भङ्गनिरूपणार्थमियं *मलभाष्यगाथा* →

*'पज्जत्तापज्जत्तग समणे पज्जत्त अमण सेसेसु अट्ठावीसं दसगं नवगं पणगं च आउस्स'* ॥

[ ]

समनाः=संज्ञी, तत्र पर्याप्ते संज्ञिन्यायुषो भङ्गाः २८, ते च सामान्येन प्रागप्युक्ताः, अपर्याप्ते संज्ञिनि भङ्गकानां दशकं, पर्याप्तेऽमनस्यसंज्ञिनि पञ्चेन्द्रिये भङ्गकानां नवकं, शेषेष्वेकादशसु जीवस्थानेषु पुनर्भङ्गानां प्रत्येकं पञ्चकं। तत्रापर्याप्तसंज्ञिनि १० भङ्गा इत्थम्→एक परभवायुर्बन्धकालात्पूर्वम्। द्वौ तिर्यगायुषो बन्धकाले। द्वौ बन्धानन्तरम्। एवं तिरश्चोऽपर्याप्तसंज्ञिनः पञ्च भङ्गाः, एवं मनुष्यस्यापि पञ्च भङ्गा वक्तव्याः। सर्वसंख्यया दश, शेषा न संभवन्ति। अपर्याप्तो हि संज्ञी तिर्यग् मनुष्यो वा, न देवनारकौ, न चापि स देवायुर्नरकायुर्वा बध्नाति । तथा ये प्राक् संज्ञितिरश्चां नव भङ्गा उक्तास्त एवासंज्ञिपर्याप्तेऽपि नव भङ्गा वक्तव्याः, यतोऽसंज्ञी पर्याप्तस्तिर्यगेव स्यान्न मनुष्यादिः।

तथा येऽपर्याप्तसंज्ञितिरश्चः पञ्च भङ्गा उक्ताः प्राग् त एव भङ्गाः शेषेष्वपि ११जीवस्थानेषु वक्तव्याः, सर्वेषामपि तिर्यक्त्वाद् देवादिषूत्पादाभावाच्च।

अतः परं मोहनीयं जीवस्थानेषु वक्ष्ये ॥३५॥

**अट्ठसु पंचसु एगे एग दुगं दस य मोहबंधगए।**
**तिग चउ नव उदयगए तिग तिग पन्नरस संतम्मि ॥३६॥**

अट्ठसु० अष्टसु पञ्चसु एकस्मिंश्च यथाक्रममेकं द्वे दश च मोहनीयप्रकृतिबन्धगतानि स्थानानि स्युस्तत्राष्टसु पर्याप्तापर्याप्तसूक्ष्मापर्याप्तबादरद्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रियासंज्ञिसंज्ञिरूपेष्वेकं बन्धस्थानं २२रूपम्। त्रीण्युदयस्थानानि, तद्यथा→८।९।१०। एकैकस्मिन्नुदयस्थाने त्रीणि त्रीणि सत्तास्थानानि, तद्यथा→२८।२७।२६ तथा पञ्चसु पर्याप्तबाद-द्वीन्द्रियर-त्रीन्द्रिय -चतुरिन्द्रियासंज्ञिरूपेषु जीवस्थानेषु द्वे द्वे बन्धस्थाने, तद्यथा→२२।२१। उदयस्थानानि चत्वारि ७।८।९।१०। सत्तास्थानानि त्रीणि २८।२७।२६। तत्र द्वाविंशतिबन्धेऽष्ट-नव दशरूपाणि। त्रीण्युदयस्थानान्येकैकस्मिंश्चोदयस्थाने त्रीणि त्रीणि सत्तास्थानानि। एकविंशतिबन्धेऽमूनि त्रीण्युदयस्थानानि→७।८।९। एकैकस्मिंश्चोदयस्थाने एकैकं सत्तास्थानम् २८, एकविंशतिबन्धो हि सास्वादनभावमुपागतेषु प्राप्यते। सास्वादनाश्चावश्यमष्टाविंशतिसत्कर्माणस्तेषां दर्शनत्रिकस्य नियमतो भावात्। तथैकस्मिन् संज्ञिपर्याप्ते जीवस्थाने द्वाविंशत्यादीनि १० बन्धस्थानानि, एकादीनि नवोदयस्थानानि, सत्तास्थानानि पञ्चदशापि ॥३६॥

नामकर्म जीवस्थानेष्वाह—

**पण दुग पणगं पण चउ पणगं पणगा हवंति तिन्नेव।**
**पण छ प्पणगं छ च्छप्पणगं अट्ठट्ठ दसगं ति ॥३७॥**

**सत्ते व अपज्जत्ता सामी तह सुहुम बायरा चेव।**
**विगलिंदिया उ तिन्नि उ तह असन्नी य सन्नी य ॥३८॥**

पण० सत्ते० अनयोर्गाथयोः पदानां यथाक्रमं सम्बन्धः। इयमत्र भावना→सप्तानामपर्याप्तानां पञ्च पञ्च बन्धस्थानानि, तद्यथा→२३।२५।२६।२९।३०। अपर्याप्ता हि सप्तापि तिर्यग्मनुष्यप्रायोग्यमेव बध्नन्ति न देवनरक प्रायोग्यं। ततो यथोक्तान्येव। उदयस्थाने पुनरपर्याप्तबादरसूक्ष्मैकेन्द्रिययो-

१. ...ऽकेन्द्रिय- वी० -पा०।

रिमे→२१।२४। विकलेन्द्रियासंज्ञिसंज्ञ्यपर्याप्तानां प्रत्येकमिमे द्वे द्वे उदयस्थाने २१।२६। तथा प्रत्येकं सप्तानामपर्याप्तानां पञ्च पञ्च सत्तास्थानानि, तद्यथा→९२।८८।८६।८०।७८। एतेषां च स्वरूपं प्रागिव द्रष्टव्यम्। तथा सूक्ष्मस्यपर्याप्तस्य पञ्च बन्धस्थानानि, तद्यथा→२३।२५।२६।२९।३०। एतानि मनुष्यतिर्यक्प्रायोग्याण्येव द्रष्टव्यानि, तत्रैव सूक्ष्मपर्याप्तस्योत्पादसम्भवात्। उदयस्थानानि ४, तद्यथा→२१।२४।२५।२६। पञ्च सत्तास्थानानि, तद्यथा→९२।८८।८६।८०।७८। केवलं पञ्चविंशत्युदये षड्विंशत्युदये च प्रत्येकं प्रत्यकं, यः साधारणपदेन सह भङ्गस्तत्राष्टसप्ततिवर्जानि ४ सत्तास्थानानि वक्तव्यानि। शरीरपर्याप्त्या हि पर्याप्तस्तेजोवायुवर्जः सर्वोऽपि मनुष्यगतिमनुष्यानुपूर्व्यौ नियमाद् बध्नाति। पञ्चविंशतिषड्विंशत्युदयौ च शरीरपर्याप्त्या पर्याप्तस्य भवतस्ततः साधारणस्य सूक्ष्मपर्याप्तस्य पञ्चविंशत्युदये षड्विंशत्युदये चाष्टसप्ततिर्नावाप्यते, प्रत्येकपदे पुनस्तेजोवायुकायिकावप्यन्तर्भवतः इति तदपेक्षया तत्राष्टसप्ततिर्लभ्यते। तथा पर्याप्तबादरैकेन्द्रियस्य पञ्च बन्धस्थानानि, तद्यथा→२३।२५।२६।२९।३०। एतानि तिर्यग्मनुष्यप्रायोग्याणि। उदयस्थानानि ५, तद्यथा→ २१।२४।२५।२६।२७। सत्तास्थानि ५, तद्यथा→ ९२।८८।८६।८०।७८। इह पञ्चविंशत्युदये षड्विंशत्युदये च प्रत्येकं प्रत्येकाऽयशःकीर्त्तिभ्यामेकैको भङ्गः। यौ च द्वौ भङ्गावेकविंशतौ ये च वैक्रियबादरवायुकायिकवर्जाश्चतुर्विंशतौ भङ्गाश्चत्वारस्ते सर्वसंख्ययाऽष्टौ पञ्चसत्तास्थानकाः, शेषास्त्वेकविंशतिसंख्याश्चतुःसत्तास्थानकाः।

तथा विकलेन्द्रियाणां त्रयाणां ५ बन्धस्थानानि, तद्यथा→ २३।२५।२६।२९।३०। एतान्यपि तिर्यग्मनुष्यप्रायोग्याणि। षडुदयस्थानानि, तद्यथा→२१।२६।२८।२९।३०।३१। सत्तास्थानानि ५, तद्यथा→९२।८८।८६।८०।७८। अत्र यावेकविंशत्युदये द्वौ भङ्गौ यौ च षड्विंशत्युदये एते चत्वारः, पञ्च सत्तास्थानका यतोऽष्टसप्ततिस्तेजोवायुभवादुद्वृत्य पर्याप्तद्वीन्द्रियानधिकृत्य कियत्कालं प्राप्यते, शेषास्तु षोडश भङ्गाश्चतुःसत्तास्थानकास्तेष्वष्टसप्ततेरप्राप्यमाणत्वात्। तेजोवायुवर्जा हि शरीरेण पर्याप्ता नियमतो मनुष्यद्विकं बध्नन्ति, ततोऽष्टाविंशत्याद्युदयेष्वष्टसप्ततिर्न प्राप्यते। एवं त्रीन्द्रिय-चतुरिन्द्रियाणामपि पर्याप्तानां वक्तव्यम्। तथाऽसंज्ञिपञ्चेन्द्रियस्य पर्याप्तस्य षड् बन्धस्थानानि, तद्यथा→ २३।२५।२६।२८।२९।३०। असंज्ञिपञ्चेन्द्रिया हि पर्याप्ता नरकगति-देवगतिप्रायोग्यमपि बध्नन्ति, ततस्तेषामष्टाविंशतिरपि बन्धस्थानं लभ्यते। षडुदयस्थानि, तद्यथा→ २१।२५।२६।२८।२९।३०।३१। सत्तास्थानानि पञ्च, तद्यथा→९२।८८।८६।८०।७८। अत्रैकविंशतिसत्का अष्टौ भङ्गाः, षड्विंशत्युदयसत्काश्चाष्टाशीत्यधिकशतद्वयसंख्याः पञ्च सत्तास्थानकाः। शेषाः सर्वेऽपि चतुःसत्तास्थानका, युक्तिरत्र प्रागुक्ता द्रष्टव्या।

तथा संज्ञिपञ्चेन्द्रियपर्याप्तस्य सर्वाणि बन्धस्थानानि, तानि चाष्टौ→ विंशतिचतुर्विंशति-नवाष्टरहितानि। सर्वाण्यप्युदयस्थानानि, तान्यप्यष्टौ, विंशतिनवाष्टोदया हि केवलिनः स्युः, चतुर्विंशत्युदयश्चैकेन्द्रियाणामत एते वर्ज्यास्तत्र केवली संज्ञित्वेन न विवक्षित इति तदुदयप्रतिषेधः। नवाष्टरहितानि सर्वाण्यपि सत्तास्थानानि, तानि च दश। अत्राप्येकविंशत्युदयभङ्गा अष्टौ, षड्विंशत्युदयभङ्गाश्चाष्टाशीत्यधिकशतद्व- यसंख्याः पञ्चसत्तास्थानकाः, शेषाश्चतुःसत्तास्थानकाः। अपर्याप्तसूक्ष्मैकेन्द्रियायादीनां सप्तानां बन्धादिप्र- कृतीनां संवेधः पूर्वोक्तानुसारेण स्वयमभ्यूह्यः ॥३७।३८॥

सम्प्रति गुणस्थानान्यधिकृत्याह——

**नाणंतराय तिविहमवि दससु दो होंति दोसु ठाणेसु।**
**मिच्छासाणे बिइए नव चउ पण नव य संतंसा ॥३९॥**

नाणं० मिथ्यादृष्ट्यादिषु सूक्ष्मसम्परायपर्यन्तेषु दशसु गुणस्थानेषु ज्ञानावरणमन्तरायं च त्रिविधमपि स्यात्, पञ्चविधो बन्धः पञ्चविध उदयः पञ्चविधा सत्ता इत्यर्थः। तथा द्वयोरुपशान्तमोह-क्षीणमोहयोर्बन्धाभावे पञ्चोदयः पञ्च सत्ता, परत उदय-सत्तयोरप्यभावः। तथा द्वितीये=द्वितीयस्य दर्शनावरणीयस्य मिथ्यादृष्टौ सास्वादने च नव[विधो]बन्धश्चतुर्विधः पञ्चविधो वोदयो नव[विधा] सत्ता इति द्वौ भङ्गौ। द्वयोरप्यनयोर्गुणस्थानकयोः स्त्यानर्द्धित्रिकस्य नियमतो बन्धात् ॥३९॥

**मिस्साइ नियट्टीओ छ च्चउ पण नव य संतकम्मंसा।**
**चउबंध तिगे चउ पण नवंस दुसु जुयल छस्संता ॥४०॥**

मिस्सा० मिश्रादिष्वप्रमत्तपर्यन्तेषु, निवृत्तौ च=अपूर्वकरणे चापूर्वकरणाद्धायाः प्रथमे संख्येयतमे भागे चेत्यर्थः, परतो निद्राद्विकबन्धव्यवच्छेदेन षड्विधबन्धारम्भवात्, तत एतेषु ६ बन्धः। ४।५विधो वा उदयो ।९ सत्तेति द्वौ भङ्गौ। ततोऽत ऊर्ध्वमपूर्वकरणेपि चतुर्विध एव बन्धस्ततस्त्रिकेऽपूर्वकर-णानिवृत्तिबादरसूक्ष्मसम्परायरूपे ४ बन्धः, ४।५ वा उदयः, ९ सत्तेति द्वौ भङ्गौ। 'अंस' इति सत्ताभिधीयते। एतच्चोक्तमुपशमश्रेणिमधिकृत्य। क्षपकश्रेण्यां गुणस्थानकत्रयेऽपि पञ्चविधोदयस्य सूक्ष्मस-म्पराये च नवविधायाः सत्तायाः अप्राप्यमाणत्वात्। 'दुसु जुयल छस्संत' त्ति इह क्षपकश्रेण्यामनिवृत्तिबादरस-म्परायाद्धायाः संख्येयतमेषु भागेषु [गतेषु] सत्स्वेकस्मिन् भागे संख्येयतमेऽवतिष्ठमाने स्त्यानर्द्धित्रिकस्य सत्ताव्यवच्छेदः स्यात्, ततस्तदनन्तरमनिवृत्तिबादरेऽपि षड्विधैव सत्ता स्यादतो द्वयोरनिवृत्तिबादरसूक्ष्मस-

न्तरायर्योर्युगलमिति बन्धोदयावुच्येते। चतुरिति चानुवर्तते, ततः ४ बन्धः, ४ उदयः, ४|६। सत्ता। अत्र पञ्चविध उदयो न प्राप्यते, क्षपकाणामत्यन्तविशुद्धत्वान्निद्राद्विकस्योदयाभावात्[१] ।।४०।।

**उवसंते चउ पण नव खीणे चउरुदय छच्च चउ संतं।**
**वेयणियाउयगोए विभज्ज मोहं परं वुच्छं ।।४१।।**

उव० उपशान्तमोहे बन्धाभावे ४|५ वा उदयः, ९ सत्ता, उपशमकोपशान्तमोहा हि अत्यन्तविशुद्धा न स्युस्ततस्तेषु निद्राद्विकस्याप्युदयः सम्भवति। क्षीणमोहे ४ उदयः, ६ सत्ताऽयं भङ्गो द्विचरमसमयं यावत्, चरमसमये तु निद्रा-प्रचलयोः सत्ताव्यवच्छेदादयं भङ्गः ४ उदय, ४ सत्ता।

तथा वेदनीय-गोत्रयोर्भङ्गनिरूपणार्थमिय *मन्तर्भाष्यगाथा* →

*'चउ छस्सु दोण्णि सत्तसु एगे चउ गुणिसु वेयणियभंगा। गोए पण चउ दो तिसु एगऽट्ठसु दोण्णि एक्कम्मि।'*[ ] मिथ्यादृष्ट्यादिषु प्रमत्तान्तेषु षट्सु गुणस्थानेषु प्रथमाश्चत्वारो भङ्गाः। तथाऽप्रमत्तादिषु सयोग्यन्तेषु सप्तसु गुणस्थानेषु द्वौ भङ्गौ, तौ च तृतीय-चतुर्थौ ज्ञातव्यौ, एते हि सातमेव बध्नन्ति नासातम्। तथैकस्मिन्नयोगिकेवलिनि चत्वारो भङ्गास्तत्र पञ्चमषष्ठौ द्विचरमसमयं यावत्प्राप्येते, चरमसमये त्वन्त्यौ द्वौ। तथा गोत्रस्य मिथ्यादृष्टावाद्याः पञ्च भङ्गाः, सास्वादनस्य प्रथमवर्जाः शेषाः ४, प्रथमो हि भङ्गस्तेजोवायुकायिकेषु लभ्यते, तद्भवादुद्वृत्तेषु वा कियत्कालं, न च तेजोवायुषु सासादनभावो लभ्यते, नापि तद्भवादुद्वृत्तेषु वा तत्कालम्। तथा त्रिषु मिश्राविरतदेशविरतेषु चतुर्थ-पञ्चमरूपौ द्वौ भङ्गौ, मिश्रादयो नीचैर्गोत्रं न बध्नन्ति। *अन्ये त्वाचार्या* ब्रुवते→देशविरतस्य पञ्चम एवैको भङ्गस्तथा प्रमत्तादिष्वष्टसु गुणस्थानेषु प्रत्येकमेकैको भङ्गस्तत्र प्रमत्ताप्रमत्तनिवृत्त्यनिवृत्तिसूक्ष्मेषु केवलः पञ्चमो भङ्गस्तेषामुच्चैर्गोत्रस्यैव बन्धोदयसम्भवादुपशान्तमोहे क्षीणमोहे सयोगिकेवलिनि बन्धाभावात् प्रत्येकमयं भङ्गः→उच्चैर्गोत्रस्योदय उच्चैर्गोत्रनीचैर्गोत्रे सती । तथैकस्मिन्नयोगिकेवलिनि च द्वौ भङ्गौ, उच्चोदय उच्चनीचे सती, भङ्गोऽयं द्विचरमसमयं यावत्। उच्चोदय उच्चं सत्, भङ्गोऽयं चरमसमये, नीचैर्गोत्रं हि द्विचरमसमये एव क्षीणमिति चरमसमये न सत् प्राप्यते।

आयुर्भङ्गनिरूपणार्थमि *यमन्तर्भाष्यगाथा*→

*'अट्ठच्छाहिगवीसा सोलस वीसं च बार छ दोसु। दो चउसु तीसु एक्कं मिच्छाइसु आउगे भंगा'* ।।[२]
[ ] मिथ्यादृष्टिगुणस्थाने २८ आयुषो भङ्गाः। सास्वादनस्य २६ भङ्गा, यतस्तिर्यञ्चो

---

१. ०सुद्धत्व। निद्रा० -हे०। २. तुल्न। सप्ततिकाभाष्य गाथा- १३।

मनुष्या वा सास्वादनभावे वर्त्तमाना नरकायुर्न बध्नन्ति, ततः प्रत्येकं तिरश्चां मनुष्याणां च परभवायुर्बन्धकाले एकैको भङ्गो न प्राप्यते। सम्यग्मिथ्यादृष्टेः १६, सम्यग्मिथ्यादृष्टयो हि नायुर्बन्धमारभन्ते, तत आयुर्बन्धकाले नारकाणां यौ द्वौ भङ्गौ, द्वे च तिरश्चां चत्वारो भङ्गा, ये च मनुष्याणामपि चत्वारः, यौ च देवानां द्वौ, तानेतान् द्वादश वर्जयित्वा शेषाः १६ स्युः । अविरतसम्यग्दृष्टेः २० कथमिति चेदुच्यते-तिर्यग्मनुष्याणां प्रत्येकमायुर्बन्धकाले ये तिर्यग्नरकमनुष्यगतिविषयास्त्रयस्त्रयो भङ्गा, यश्च देव-नैरयिकाणां प्रत्येकमायुर्बन्धकाले तिर्यग्गतिविषये एकैको भङ्गस्तेऽविरतसम्यग्दृष्टेर्न सम्भवन्ति, ततः शेषा विंशतिरेव स्यात्। देशविरते १२ भङ्गा, यतो देशविरतिस्तिर्यग्मनुष्याणामेव स्यात्ते च तिर्यग्मनुष्या देशविरता आयुर्बध्नन्तो देवायुरेव बध्नन्ति, ततस्तिरश्चां मनुष्याणां च प्रत्येकं परभवायुर्बन्धकालात्पूर्वमेकैको भङ्गः→मनुष्यायुष उदयो मनुष्यायुषः सत्ता, तिर्यगायुष उदयस्तिर्यगायुषः सत्ता परभवायुर्बन्धकालेऽपि चैकैको भङ्गः, देवायुषो बन्धो मनुष्यायुष उदयो देवमनुष्यायुषी सती, देवायुषो बन्धस्तिर्यगायुष उदयो देवतिर्यगायुषी सती। आयुर्बन्धोत्तरकालं च चत्वारो, यतः केचित्तिर्यञ्चो मनुष्याश्चतुर्णामेकमन्यतमदायुर्बध्वा देशविरतिं प्रतिपद्यन्ते, ततस्तदपेक्षया चत्वारः भङ्गाः प्राप्यन्ते, सर्वसंख्यया १२। तथा द्वयोः प्रमत्ताप्रमत्तयोः प्रत्येकं ६ भङ्गाः। तथा चतुर्ष्वपूर्वकरणानिवृत्तिसूक्ष्मोपशान्तमोहेषूपशमश्रेणिमधिकृत्य प्रत्येकं द्वौ भङ्गौ, तद्यथा→ मनुष्यायुष उदयो मनुष्यायुषः सत्ताऽयमायुर्बन्धकालात्पूर्वम्, अथवा मनुष्यायुष उदयो मनुष्यदेवायुषी सती, अयं भङ्गो बन्धोत्तरकालम्, एते ह्यायुर्न बध्नन्त्यतिविशुद्धत्वात्, पूर्वबद्धे च देवायुष्युपशमश्रेणिं प्रतिपद्यन्ते, नान्यायुषि, पूर्वबद्धायुष्कस्तु क्षपकश्रेणिं न प्रतिपद्यते[1], तत उपशमश्रेणिमधिकृत्येत्युक्तम्। क्षपकश्रेण्यां त्वेतेषामेकैक एव भङ्गस्तद्यथा→मनुष्यायुष उदयो मनुष्यायुषः सत्ता। तथा त्रिषु क्षीणमोहसयोग्ययोगिरूपेषु प्रत्येकमेकैको भङ्गस्तद्यथा→मनुष्यायुष उदयो मनुष्यायुषः सत्ता। अतः परं मोहनीयं वक्ष्ये ॥४१॥

**गुणठाणगेसु अट्ठसु एक्केक्कं मोहबंधठाणेसु।**
**पंच अनियट्टिठाणे बंधोवरमो परं तत्तो ॥४२॥**

गुण० मोहनीयसत्कबन्धस्थानेषु मध्ये एकैकं बन्धस्थानं मिथ्यादृष्ट्यादिष्वष्टसु गुणस्थानेषु स्यात्, तद्यथा→मिथ्यादृष्टेः २२, सास्वादनस्य २१, सम्यग्मिथ्यादृष्टेरविरतसम्यग्दृष्टेश्च प्रत्येकं १७,

---

१ - ०युषस्तु क्षपकश्रेणिं न प्रतिपद्यन्ते - पा० ला०।

देशविरतस्य १२, प्रमत्ताप्रमत्ताऽपूर्वकरणानां प्रत्येकं ९। अत्राप्रमत्तापूर्वकरणयोर्भङ्ग एकैक एव वक्तव्योऽरतिशोकयोर्बन्धस्य प्रमत्तगुणस्थानक एव व्यवच्छेदात्। प्राक् च प्रमत्ताऽपेक्षया नवकबन्धस्थाने द्वौ भङ्गौ। तथाऽनिवृत्तिगुणस्थाने पञ्च बन्धस्थानानि, तद्यथा→ ५।४।३।२।१। ततोऽनिवृत्तिस्थानात् परं सूक्ष्मसंपरायादौ बन्धोपरमः ॥४२॥

उदयस्थानान्याह—

**सत्ताइ दस उ मिच्छे सासायणमीसए नवुक्कोसा।**
**छाई नव उ अविरए देसे पंचाइ अट्ठे व ॥४३॥**

**विरए खओवसमिए चउराई सत्त छच्चऽपुव्वम्मि।**
**अनियट्टिबायरे पुण इक्को व दुवे व उदयंसा ॥४४॥**

**एगं सुहुमसरागो वेएइ अवेयगा भवे सेसा।**
**भंगाणं च पमाणं पुव्वुद्दिट्ठेण नायव्वं ॥४५॥**

सत्ताइ० विरए० एगं० मिथ्यादृष्टेः सप्तादीनि दशपर्यन्तानि ४ उदयस्थानानि। तत्र मिथ्यादृष्टौ सर्वसंख्यया पूर्वोक्ता एव भङ्गकानामष्टौ चतुर्विंशतयः। तथा सास्वादने मिश्रे च सप्तादीनि नवोत्कर्षाणि=नवपर्यन्तानि त्रीणि त्रीण्युदयस्थानानि, तत्र सर्वसंख्यया भङ्गानां चतस्रः २४, मिश्रेपि चतस्रः २४। तथाऽविरतसम्यग्दृष्टौ षडादीनि नवपर्यन्तानि ४ उदयस्थानानि, सर्वसंख्यया ८ चतुर्विंशतयः। देशविरते पञ्चादीन्यष्टपर्यन्तानि ४ उदयस्थानानि, अत्र सर्वसंख्यया २४।

तथा विरते क्षायोपशमिके प्रमत्तेऽप्रमत्ते चेत्यर्थः, विरतो हि श्रेणेरधस्ताद्वर्तमानः क्षायोपशमिको विरत इति व्यवह्रियते, ततश्च प्रमत्तेऽप्रमत्ते च प्रत्येकं चतुरादीनि सप्तपर्यन्तानि ४ उदयस्थानानि, अत्र सर्वसंख्यया प्रमत्तस्याप्रमत्तस्य च प्रत्येकमष्टावष्टौ २४। तथाऽपूर्वकरणे चतुरादीनि षट्पर्यन्तानि ३ उदयस्थानानि, तत्र संज्वलनक्रोधादीनामन्यतम एकः क्रोधादिः, त्रयाणां वेदानामन्यतमो वेदो, द्वयोर्युगलयोरन्यतरद्युगलमित्येतासां चतसृणां प्रकृतीनामुदयोऽपूर्वकरणे ध्रुवोऽत्रैका भङ्गानां २४। ततो भये वा जुगुप्सायां वा क्षिप्तायां पञ्चानामुदयोऽत्र द्वे २४ भङ्गानां, भय-जुगुप्सयोस्तु युगपत्प्रक्षिप्तयोः षण्णामुदयोऽत्रैका भङ्गानां २४, सर्वसंख्ययाऽपूर्वकरणे चतस्रः २४। तथाऽनिवृत्तिबादरे पुनरेको द्वौ

वा उदयांशावुदयस्थाने इत्यर्थः। तत्र चतुर्णां संज्वलनानामन्यतम एकः क्रोधादिस्त्रयाणां वेदानामन्यतमो वेद इति द्विकोदयोऽत्र भङ्गाः १२। ततो वेदोदयव्यवच्छेदे एकोदयः, स चतुर्विधे त्रिविधे द्विविधे एकविधे च बन्धे प्राप्यते,[1] तत्र यद्यपि प्राक् चतुर्विधे ४, त्रिविधे ३, द्विविधे २, एकविधे बन्धे एक इति दश भङ्गा उक्तास्तथाप्यत्र सामान्येन चतुर्विधादिबन्धापेक्षया चत्वार एव भङ्गा विवक्ष्यन्ते।

तथा सूक्ष्मसम्परायो बन्धाभावे एकं किट्टीकृतसंज्वलनलोभं वेदयते, अत्रैक एव भङ्गः, एवमेकोदयभङ्गाः सर्वसंख्यया ५। तथा शेषा उपरितना उपशान्तमोहादयः सर्वेऽप्यवेदकाः। अत्र मिथ्यादृष्ट्यादिगुणस्थानेषूदयस्थानभङ्गानां प्रमाणं पूर्वोद्दिष्टेन=पूर्वोक्तेन प्राग् सामान्योक्तमोहनीयोदय-स्थानचिन्ताधिकारोक्तेन प्रकारेण ज्ञातव्यम् ॥४३॥४४॥४५॥

मिथ्यादृष्ट्यादीनधिकृत्य दशादिष्वेकपर्यवसानेषु भङ्गसंख्यामाह—

**एक्क छडेक्कारेक्कारसेव एक्कारसेव नव तिन्नि।**
**एए चउवीसगया बारदुगे पंच एक्कम्मि ॥४६॥**

एक्के० इह दशादीनि चतुरन्तान्युदयस्थानान्यधिकृत्य यथासंख्यं संख्यापदयोजना कार्या, सा चैवम्—दशोदये एका चतुर्विंशतिः, नवोदये ६, अष्टोदये ११, सप्तोदये ११, षडुदये ११, पञ्चकोदये ९, चतुरुदये ३ एतेऽनन्तरोक्ता संख्याविशेषाश्चतुर्विंशतिगताश्चतुर्विंशतयो ज्ञातव्याः। एताश्च सर्वसंख्यया द्विपञ्चाशत्। तथा द्विके=द्विकोदये भङ्गाः १२, एकोदये पञ्च ॥४६॥

एतेषामेव भङ्गानां विशिष्टतरसंख्यामाह—

**बारसपणसट्ठसया उदयविगप्पेहिं मोहिया जीवा ॥**
**चुलसीई सत्तुत्तरि पयविंदसएहिं विन्नेया ॥४७॥**[2]

बार० इह दशादिषु चतुःपर्यवसानेषूदयस्थानेषु भङ्गानां ५२ चतुर्विंशतयो लब्धास्ततो द्विपञ्चाशत् चतुर्विंशत्या गुण्यन्ते, तथाकृते द्विकोदयभङ्गाः[3] १२ एकोदयभङ्गाः ५ प्रक्षिप्यन्ते, ततो

१-०विधे च ४ च प्राप्यते-हे०। २ ०'एएसिं उदयविगप्पपयवंदनिरूवणत्थमन्तर्भाष्यगाथा'-'बारसपणसट्ठसया०' इत्यनेन सप्ततिकाचूर्णिगतवचनेन गाथेयं चूर्णिकृताऽन्तर्भाष्यगाथात्वेनोक्ताऽपि श्रीमलयगिरिपादैः श्रीगुणरत्नसूरिभिश्च नान्तर्भाष्यगाथात्वेनोल्लिखिता, इत्यस्माभिरप्यत्र त एवानुसृताः। ३-०तयो ज्ञातव्या, एताश्च लब्धास्ततो द्विपञ्चाशत्, तथा द्विके द्विको० -हे०।

यथोक्ता संख्या स्यात्। पदसंख्यामाह-'चुल' पूर्ववद्व्याख्यानि। यथा दशोदय एको दशभिर्गुण्यते, नवोदयाः ६ नवभिर्गुण्यन्ते जाताः ५४, अष्टोदया ११ अष्टभिर्गुणिता जाताः ८८। सप्तोदयाः ११ सप्तभिर्गुणिता [जाताः] ७७। षडुदयाः ११ षड्भिर्गुणिताः ६६। पञ्चोदया नव पञ्चभिर्गुणिताः ४५। चतुरुदयाः ३ चतुर्भिर्गुणिताः १२। सर्वे[1] मीलिताः ३५२। एषु एकैका चतुर्विंशतिरस्ति इति २४ गुणिताः ८४४८। द्वादश द्विकोदया द्वाभ्यां गुणिताः २४ पदानि, एकोदयपदानि पञ्च, एवं २९ क्षेपे ८४७७ जातानि। संप्रति मिथ्यादृष्ट्यादिषु प्रत्येकमुदयभङ्गनिरूपणार्थमियं *मन्तर्भाष्यगाथा →*

*'अट्ठग चउ चउरट्ठगाय चउरो य होंति चउवीसा। मिच्छाइ अपुव्वंता बारस पणगं च अनियट्टे'* ॥

[ ]

मिथ्यादृष्ट्यादिष्वपूर्वकरणपर्यवसानेषु गुणस्थानकेषु चतुर्विंशतयो यथासंख्यमष्टादिसंख्याः स्युः। तथाऽनिवृत्तौ द्विकोदये द्वादश भङ्गा, एकोदये पञ्च। चशब्दोऽनिवृत्तिबादरे एकोदये चत्वारः, एकः सूक्ष्मसम्पराये इति विशेषं द्योतयति ॥४७॥

सम्प्रत्येतेषामेवोदयभङ्गानामुदयपदानां योगोपयोगादिभिर्गुणनार्थमुपदेशमाह—

**जोगोवओगलेसाइएहिं गुणिया हवंति कायव्वा।**
**जे जत्थ गुणट्ठाणे होंति ते तत्थ गुणकारा ॥४८॥**

जोगो० मिथ्यादृष्ट्यादिगुणस्थानकेषु ये योगोपयोगादयस्तैरुदयभङ्गा गुणिताः कर्त्तव्याः, ये योगादयो यस्मिन् गुणस्थानके यावन्तो भवन्ति तावन्तस्तस्मिन् गुणस्थाने गुणकाराः-तैस्तावद्भिस्तस्मिन् गुणस्थाने उदयभङ्गा गुणयितव्या इत्यर्थः। तत्र प्रथमतो योगैर्गुणनभावना क्रियते। इह मिथ्यादृष्ट्यादिषु सूक्ष्मसम्परायपर्यवसानेषु सर्वसंख्ययोदयभङ्गाः १२६५। तत्र वाग्योगचतुष्टयमनोयोगचतुष्टयौदारिककाययोगाः सर्वेष्वपि मिथ्यादृष्ट्यादिषु गुणस्थानकेषु सम्भवन्तीति ते नवभिर्गुण्यन्ते, ततो जातानि ११३८५। तथा मिथ्यादृष्टेर्वैक्रियकाययोगेऽष्टापि चतुर्विंशतयः प्राप्यन्ते। वैक्रियमिश्रे औदारिकमिश्रे कार्मणकाययोगे च प्रत्येकं चतस्रः, एताश्च या अनन्तानुबन्ध्युदयसहितास्ता एव द्रष्टव्या, यास्त्वनन्तानुबन्ध्युदयरहितास्ता

---

१. यथा दशोदय एक एकेन गुण्यते। नवोदयाः ६ षड्भिर्गुण्यन्ते जाताः ५४, अष्टोदयाः ११ एकादशभिर्गुणिता जाताः ८८। सप्तोदयाः ११ एकादशभिर्गुणिता [जाताः] ७७। षडुदयाः ११ एकादशभिर्गुणिताः ६६। पञ्चोदयाः ९ नवभिर्गुणिताः ४५। चतुरुदयाः ३ त्रिभिर्गुणिताः १२। सर्वे-हे० ला० पा०।

अत्र न प्राप्यन्ते। यत इह येन पूर्वं वेदकसम्यग्दृष्टिना सतानन्तानुबन्धिनो विसंयोज्य परिणामपरावृत्त्या मिथ्यात्वं गतेन भूयस्तान् बद्धुमारभ्यन्ते तस्यैव मिथ्यादृष्टेर्बन्धावलिकामात्रं कालं यावदनन्तानुबन्ध्युदयो न प्राप्यते, अनन्तानुबन्धिनश्च विसंयोज्य भूयोऽपि मिथ्यात्वं प्रतिपद्यते जघन्यतोऽप्यन्तर्मुहूर्तावशेषायुष्क एवानन्तानुबन्ध्युदयरहितस्य मिथ्यादृष्टेः कालकरणप्रतिषेधात्। ततोऽन्तरालगतो वर्त्तमानस्य भवान्तरे वा प्रथमत उत्पन्नस्य मिथ्यादृष्टेः सतोऽनन्तानुबन्ध्युदयरहिता उदयविकल्पा न प्राप्यन्तेऽत्र च कार्मणकाय-योगोऽप्यान्तरालगतौ औदारिकमिश्रवैक्रियमिश्रकाययोगौ च भवान्तर उत्पद्यमानस्य, एतच्च बाहुल्यमाश्रित्यो-क्तमन्यथा तिर्यग्मनुष्याणामपि मिथ्यादृशां वैक्रियकारिणां वैक्रियमिश्रमवाप्यते एव परं *चूर्णिकृता* तन्नात्र विवक्षितं, ततः कार्मणयोगादौ प्रत्येकं चतस्रश्चतुर्विंशतयोऽनन्तानुबन्ध्युदयरहिता न प्राप्यन्ते।

तथा सास्वादनस्य कार्मणकाययोगे वैक्रियकाययोगे औदारिकमिश्रकाययोगे च प्रत्येकं चतस्रश्चतुर्विंशतयः सम्यग्मिथ्यादृष्टेर्वैक्रियकाययोगे ४। अविरतसम्यग्दृष्टेर्वैक्रियकाययोगे ८। देशविरतस्य वैक्रियवैक्रियमिश्रकाययोगे च प्रत्येकं ८। प्रमत्तसंयतस्यापि वैक्रियेवैक्रियमिश्रे च प्रत्येकं ८। अप्रमत्तसंयतस्य वैक्रिययोगे ८। सर्वसंख्यया ८४ चतुर्विंशतयः। एताश्चतुर्विंशत्या गुणिता जातानि २०१६, तानि पूर्वराशौ प्रक्षिप्यन्ते तथा सास्वादनस्य वैक्रियमिश्रे वर्त्तमानस्य ये चत्वारोऽप्युदयस्थानविकल्पास्तद्यथा→सप्तोदय एकविधोऽष्टोदयो द्विविधो नवोदय एकविधोऽत्र नपुंसकवेदो न लभ्यते, वैक्रियकाययोगिषु नपुंसकवेदिषु नारकेषु मध्ये सासादनस्योत्पादाभावात्। ये चाविरतसम्यग्दृष्टेर्वैक्रियमिश्रे कार्मणकाययोगे च प्रत्येकमष्टावष्टौ उदयस्थानविकल्पा एषु स्त्रीवेदो न लभ्यते, वैक्रियकाययोगिषु स्त्रीवेदिषु मध्येऽविरतसम्यग्दृष्टेरुत्पादाभावात्, एतच्च प्रायोवृत्तिमाश्रित्योक्तमन्यथा कदाचित् स्त्रीवेदिष्वपि मध्ये तदुत्पादो भवति।[१] तेन *मल्लिस्वामि-न्यादिभिर्न* व्यभिचारः। प्रमत्तसंयतस्याहार- ककाययोगे आहारकमिश्रे चाऽप्रमत्तस्याहारककाययोगे ये प्रत्येकमुदयस्थानविकल्पाः ८ तेऽपि स्त्रीवेदरहिता द्रष्टव्याः, आहारकं हि चतुर्दशपूर्विणः स्यादेते च सर्वेऽप्युदयस्थानविकल्पाः सर्वसंख्यया ४४। एतेषु चोक्तप्रकारेण द्वौ द्वावेवादौ लब्धौ, ततः प्रत्येकं १६ भङ्गास्ततः ४४ षोडशभिर्गुण्यन्ते जातानि ७०४, तानि पूर्वराशौ प्रक्षिप्यन्ते तथाऽविरतसम्यग्दृष्टेरौदारि-कमिश्रे ये ८ उदयस्थानविकल्पास्ते पुंवेदसहिता एव प्राप्यन्ते, तिर्यग्मनुष्येषु स्त्रीवेदनपुंसकवेदेषु मध्येऽविरत-सम्यग्दृष्टेरुत्पादाभावात्। एतेषु चैकेन वेदेन प्रत्येकमष्टावष्टावेव लभ्यन्ते, ततोऽष्टावष्टभिर्गुणयित्वा पूर्वराशौ प्रक्षिप्यन्ते तत आगतानि १४१६९, एतावन्तो मिथ्यादृष्टयादिषु सूक्ष्मसम्परायान्तेषु गुणस्थानेषूदयस्थान-

१. भवति उक्तं च *चूर्णौ-'कयाइ हुज्ज इत्थिवेयगेसु वि'* तेन- पा० ।

विकल्पा योगगुणिताः प्राप्यन्ते। प्रति गुणस्थानकं चैवं→मिथ्यादृष्टावुदयभङ्गाः ८, चतुर्विंशत्या गुणिता जातमिदं १९२, नव योगाः पूर्ववत्, दशमो वैक्रियकाययोगो, एवं दशभिर्गुण्यते जातं १९२०। तथा वैक्रियमिश्रादियोगत्रये प्रत्येकं ४ चतुर्विंशतयः २४ गुणिता जातं ९६, वैक्रियमिश्रादित्रयगुणितं जातं २८८, पूर्वराशौ क्षिप्तं जातं २२०८। सासादने ४ उदयभङ्गाः, २४ गुणिता जातं ९६, १२ योगैर्गुणितं जातं ११५२, सासादनस्य वैक्रियमिश्रस्थस्य ४ भङ्गास्तत्र नपुंसकवेदो न स्यात्ततः प्रत्येकं १६ भङ्गास्तैः ४ गुण्यन्ते जातं ६४, एतत्पूर्वराशौ क्षिप्तं जातं १२१६, एवं मिश्राविष्वपि पूर्वोक्तानुसारेण ज्ञेयम्।

अधुना पदवृन्दानि योगगुणितानि भाव्यन्ते, तत्रोदयपदप्ररूपणार्थमियं ***मन्तर्भाष्यगाथा*** →
***'अट्ठट्ठी बत्तीसं बत्तीसं सट्ठिमेव बावन्ना। चोयालं चोयालं वीसा वि य मिच्छमाईसु'*** ॥[1]

[ ]

मिथ्यादृष्ट्यादिष्वपूर्वकरणपर्यवसानेषु यथासंख्यमष्टषष्ट्यादिसंख्यानि उदयपदानि भवन्ति, सर्वसंख्यया ३५२। एतानि चतुर्विंशतिगतानीति चतुर्विंशत्या गुण्यन्ते, जातानि ८४४८। द्विकोदयाः १२ द्वाभ्यां गुण्यन्ते जाताश्चतुर्विंशतिरेकोदयपदानि ५, सर्वसंख्यया २९। सा च पूर्वराशौ प्रक्षिप्यते, ततो जातानि ८४७७। एतानि वाग्योगचतुष्टयमनोयोगचतुष्टयौदारिककाययोगसहितानि प्राप्यन्ते इति नवभिर्गुण्यन्ते जातानि ७६२९३ । एवमन्येष्वपि योगेषु पूर्वोक्तानुसारेण भावनीयं, सर्वसङ्ख्यया ९५७१७ योगगुणितानि पदवृन्दानि भवन्ति।

सम्प्रत्युपयोगगुणिता उदयभङ्गा भाव्यन्ते-तत्र मिथ्यादृष्टौ सास्वादने च प्रत्येकं पञ्च पञ्च उपयोगाः। मिश्राविरतदेशविरतानां ६। प्रमत्तादीनां सूक्ष्मसम्परायान्तानाम् ७। मिथ्यादृष्ट्यादिषु चतुर्विंशतिगता उदयस्थानविकल्पा अष्टसंख्यादिका ये प्रागुक्तास्ते यथायोगमुपयोगैर्गुण्यन्ते, ततो जातानि सर्वसंख्यया ३२०। ये ***त्वाचार्या*** मिश्रेऽपि मत्यज्ञान-श्रुताज्ञान-विभङ्गज्ञान-चक्षुर्दर्शनाऽचक्षुर्दर्शनरूपान् पञ्चैवोपयोगानिच्छन्ति तेषां मते ३१६। एतानि चतुर्विंशतिगतानीति चतुर्विंशत्या गुण्यन्ते ततो जातानि ७६८०, ***मतान्तरेण*** ७५८४। ततो द्विकोदयभङ्गाः १२ एकोदयभङ्गाः [५]। सर्वे मिलिताः १७, ते सप्तभिर्गुण्यन्ते जातं ११९, तत्पूर्वराशौ प्रक्षिप्यते, ततः पूर्वराशिर्जातः ७७९९, ***मतान्तरेण*** ७७०३। एतावन्त उपयोगगुणिता उदयभङ्गाः।

सम्प्रति पदवृन्दानि उपयोगगुणितानि भाव्यन्ते-तत्रोदयस्थानपदानि चतुर्विंशतिगतानि ***'अट्ठट्ठी बत्तीसं'*** [अन्तर्भाष्यगाथा] इत्यादिना यानि प्रागुक्तानि तानि यथायोगमुपयोगैर्गुण्यन्ते, जातानि

१- गाथेयं चूर्णिकृद्भिरन्तर्भाष्यगाथात्वया निर्दिष्टा।

सर्वसंख्यया २१२०। ये तु मिथ्यादृष्टाविव मिश्रेऽपि पञ्चोपयोगानिच्छन्ति तन्मते सर्वसंख्यया २०८८। एतानि चतुर्विंशतिगतानीति चतुर्विंशत्या गुण्यन्ते जातानि ५०८८०, *मतान्तरेण* ५०११२। ततो द्विकोदयपदानि २४, एकोदयपदानि ५, सर्वमीलने २९। सा सप्तभिरुपयोगैर्गुण्यते, जाते २०३, पूर्वराशौ प्रक्षिप्येते, ततो जातः पूर्वराशिः ५१०८३, *मतान्तरेण* पुनः ५०३१५। एतावन्त्युपयोगगुणितानि पदवृन्दानि।

लेश्यागुणिता उदयभङ्गा भाव्यन्ते, तत्र मिथ्यादृष्ट्यादिष्वविरतान्तेषु प्रत्येकं षड् लेश्याः, देशविरतप्रमत्ताप्रमत्तेषु तेजःपद्मशुक्लरूपास्तिस्रः तिस्रः, कृष्णादिलेश्यासु देशविरत्यादिप्रतिपत्तेरभावादपूर्वकरणादौ शुक्ललेश्यैका। मिथ्यादृष्ट्यादिषु च ये चतुर्विंशतिगता उदयस्थानविकल्पा अष्टचतुरादिसंख्यास्ते यथायोगं लेश्याभिर्गुण्यन्ते, जाते २२०, एते चतुर्विंशतिगते इति चतुर्विंशत्या गुण्येते जातानि ५२८०। [ततो] द्विकोदयभङ्गाः द्वादश, एकोदयभङ्गाः पञ्च, एवं १७ क्षेपे जातानि ५२९७, एतावन्तो लेश्यागुणिता उदयभङ्गाः।

लेश्यागुणितानि पदवृन्दानि भाव्यन्ते-तत्रोदयस्थानपदानि चतुर्विंशतिगतान्यष्टषष्ट्यादीनि, तानि यथायोगं लेश्याभिर्गुण्यन्ते, ततः सर्वसंख्यया जातानि १५९२ एतानि चतुर्विंशतिगतानीति चतुर्विंशत्या गुण्यन्ते जातानि ३८२०८। ततो द्विकोदयैकोदयपदानि २९ प्रक्षिप्यन्ते, ततो जातानि ३८२३७। एतावन्ति लेश्यागुणितानि पदवृन्दानि। उक्तान्युदयस्थानानि ॥४८॥

सत्तास्थानान्याह—

**तिण्णेगे एगेगं तिग मीसे पंचचउसु नियट्टिए तिन्नि**
**एक्कार बायरम्मी सुहुमे चउ तिन्नि उवसंते ॥४९॥**

तिण्णेगे० एकस्मिन् मिथ्यादृष्टौ त्रीणि सत्तास्थानानि, तद्यथा→२८।२७।२६। अत्र भावना प्रागेवोक्ता। तथैकस्मिन् सासादने एकं २८, मिश्रे ३, तद्यथा→२८।२७।२४ तथाऽविरतादिषु चतुर्षु प्रत्येकं ५, तद्यथा→२८।२४।२३।२२।२१। निवृत्तौ ३, तद्यथा→२८।२४।२१। तत्राद्ये द्वे उपशमश्रेण्याम् [एकविंशतिः क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां] क्षपकश्रेण्यां वा, तथा बादरेऽनिवृत्तिबादरे ११, तद्यथा→२८।२४।२१।१३।१२।११।५।४।३।२।१। सूक्ष्मसम्पराये ४ सत्तास्थानानि, तद्यथा→२८।२४।२१।१। तत्राद्यानि त्रीण्युपशमश्रेण्याम्, एका प्रकृतिः क्षपकश्रेण्याम्। तथोपशान्ते=उपशान्तमोहे ३ सत्तास्थानानि, तद्यथा→।२८।२४।२१। संवेधस्तु स्वयमभ्यूह्यः। सर्वत्रापि सत्तास्थाने भावना यथाऽधस्तादोघसंवेधचिन्तायां कृता तथाऽत्रापि कार्या ॥४९॥

सम्प्रति नाम वि(चि)चिन्तयिषुराह—

**छन्नव छक्कं तिग सत्त दुग दुग तिग दुग तिगट्ठ चऊ।**

**दुग छच्चउ दुग पण चउ चउ दुग चउ पणग एग चऊ ॥५०॥**

**एगेगमट्ठ एगेगमट्ठ छउमत्थकेवलिजिणाणं।**

**एग चऊ एग चऊ अट्ठ चऊ दु छक्कमुदयंसा ॥५१॥**

छन्न० एगे० मिथ्यादृष्टौ नाम्नः ६ बन्धस्थानानि, तद्यथा→२३।२५।२६।२८।२९।३०। तत्रापर्याप्तकैकेन्द्रियप्रायोग्यं बध्नतस्त्रयोविंशतिः, तस्यां च बध्यमानायां बादरसूक्ष्मप्रत्येकसाधारणैर्भङ्गाः४। पर्याप्तकैकेन्द्रियप्रायोग्यमपर्याप्तद्वि-त्रि-चतुरिन्द्रियतिर्यक्पञ्चेन्द्रिय-मनुष्यप्रायोग्यं च बध्नतः २५। तत्र पर्याप्तकैकेन्द्रियप्रायोग्यायां २५ बध्यमानायां भङ्गाः २०, अपर्याप्तकद्वीन्द्रियादिप्रायोग्यायां तु बध्यमानायां प्रत्येकमेकैको भङ्गः सर्वसंख्यया २५। पर्याप्तकैकेन्द्रियप्रायोग्यं बध्नतः २६, तस्यां च बध्यमानायां भङ्गाः १६। देवगतिप्रायोग्यं नरकगतिप्रायोग्यं वा बध्नतः २८, तत्र देवगतिप्रायोग्यायां भङ्गाः ८, नरकगतिप्रायोग्यायां १, सर्वसंख्यया ९। पर्याप्तद्वीन्द्रियादिप्रायोग्यं बध्नतां २९, तत्र पर्याप्त-द्वि-त्रि-चतुरिन्द्रियप्रायोग्यायामेकोनत्रिंशति बध्यमानायां प्रत्येकं ८ भङ्गाः। तिर्यक्पञ्चेन्द्रियप्रायोग्यायां ४६०८, मनुष्यगतिप्रायोग्यायां ४६०८, सर्वसंख्यया ९२४०। या तु देवगतिप्रायोग्या तीर्थकरनामसहिता [२९] सा मिथ्यादृष्टेर्न बन्धमायाति। पर्याप्तद्वि-त्रि-चतुरिन्द्रिय-तिर्यक्पञ्चेन्द्रियप्रायोग्यं बध्नतः ३०, तत्र पर्याप्तद्वीन्द्रियादिप्रायोग्यायां बध्यमानायां प्रत्येकं ८ भङ्गाः। तिर्यक्पञ्चेन्द्रियप्रायोग्यायां ४६०८, सर्वसंख्यया ४६३२। या च मनुष्यगतिप्रायोग्या तीर्थकरनामसहिता ३०, या च देवगतिप्रायोग्याऽऽहारकद्विकसहिता, ते उभे अपि मिथ्यादृष्टेर्न बन्धमायातः।

त्रयोविंशत्यादिषु बन्धस्थानेषु यथासंख्यं भङ्गसंख्यानिरूपणार्थमियं ***मन्तभाष्यगाथा→***
***'चउ पणवीसा सोलस, नव चत्ताला सया य बाणउया बत्तीसुत्तरछायालसया मिच्छस्स बंधविही'*** ॥
[ ]
स्पष्टा। मिथ्यादृष्टेर्नवोदयस्थानानि, तद्यथा→२१।२४।२५।२६।२७।२८।२९।३०।३१। एतानि सर्वाण्यपि प्रागिव वक्तव्यानि। केवलमाहारकसंयतानां वैक्रियसंयतानां केवलिनां सम्बन्धीनि न वक्तव्यानि, तेषां मिथ्यादृष्टित्वाभावात्। सर्वसंख्यया मिथ्यादृष्टावुदयस्थानभङ्गाः ७७७३। मिथ्यादृष्टेः सत्तास्थानानि षट्, तद्यथा→९२।८९।८८।८६।८०।७८। संवेधस्तु स्वयमभ्यूह्यः। सम्प्रति सास्वादनस्य बन्धोदयसत्तास्थाना-

न्युच्यन्ते। त्रीणि बन्धस्थानानि, तद्यथा→२८|२९|३०। तत्र नरकगतिप्रायोग्या २८ सास्वादनस्य न बन्धमायाति। देवगतिप्रायोग्यायाश्च बन्धकास्तिर्यक्पञ्चेन्द्रिया मनुष्याश्च। तस्यां चाष्टाविंशतौ बध्यमानायां ८ भङ्गाः। तथा सासादना एकेन्द्रिया विकलेन्द्रियास्तिर्यक्पञ्चेन्द्रिया मनुष्या देवा नैरयिकाश्च तिर्यक्पञ्चेन्द्रियप्रायोग्यां मनुष्यगतिप्रायोग्यां वा २९ बध्नन्ति, न शेषामत्र च भङ्गाः ६४००। तथा सासादना एकेन्द्रिया विकलेन्द्रियास्तिर्यक्पञ्चेन्द्रिया मनुष्या देवा नारका वा यदि त्रिंशतं बध्नन्ति तर्हि तिर्यक्पञ्चेन्द्रियप्रायोग्यामेवोद्योतसहिताम्, न शेषाम्। तां च बध्नतां भङ्गानां ३२००। सर्वबन्धस्थानभङ्गसंख्या ९६०८।

उक्तरूपभङ्गसंख्यानिरूपणार्थमियं *मन्तर्भाष्यगाथा →*

*'अट्ठ य सय चोवट्ठिं बत्तीस सया य सासणे भेया। अट्ठावीसाइसुं सव्वाणऽट्ठहिग छण्णउई' ॥*

[ ]

स्पष्टा। सास्वादनस्योदयस्थानानि ७, तद्यथा→२१|२४|२५|२६|२९|३०|३१। तत्र २१ उदय एकेन्द्रिय-विकलेन्द्रिय-तिर्यक्पञ्चेन्द्रिय-मनुष्य-देवानधिकृत्यावगन्तव्यो। नरकेषु सासादनो नोत्पद्यत इति कृत्वा तत्रैकेन्द्रियाणामेकविंशत्युदये बादरपर्याप्तकेन सह यशःकीर्त्त्ययशःकीर्त्तिभ्यां द्वौ भङ्गौ, तावेव सम्भवतो न शेषाः। सूक्ष्मेष्वपर्याप्तेषु मध्ये सास्वादनस्योत्पादाभावात्। अत एव विकलेन्द्रियाणां तिर्यक्पञ्चेन्द्रियाणां मनुष्याणां च प्रत्येकमपर्याप्तकेन सह य एकैको भङ्गः, स इह न सम्भवति किन्तु शेषा एव। ते च विकलेन्द्रियाणां ६, तिर्यक्पञ्चेन्द्रियाणां ८, मनुष्याणामपि ८, देवानामपि ८। सर्वसंख्यया २१ उदये ३२। २४ उदय एकेन्द्रियेषु मध्ये उत्पन्नमात्रस्य, अत्रापि बादरपर्याप्तकेन सह यशःकीर्त्त्ययशःकीर्त्तिभ्यां यौ द्वौ भङ्गौ तावेव सम्भवतो न शेषाः, सूक्ष्मेषु साधारणेषु तेजोवायुषु च मध्ये सासादनस्योत्पादाभावात्। २५ उदये देवेषु मध्ये उत्पन्नमात्रस्य प्राप्यते, न शेषस्य, तत्र ८ भङ्गास्ते च सुभगदुर्भगादेयानादेययशःकीर्त्त्ययशःकीर्त्तिपदैरवसेयाः। २६ उदयो विकलेन्द्रिय-तिर्यक्पञ्चेन्द्रिय-मनुष्येषु मध्ये उत्पन्नमात्रस्यात्राप्यपर्याप्तकेन सह य एकैको भङ्गः स न सम्भवति, शेषास्तु सम्भवन्ति, ते च विकलेन्द्रियाणां ६। तिर्यक्पञ्चेन्द्रियाणां २८८, मनुष्याणामपि २८८, सर्वसंख्यया २६उदये ५८२। २७|२८। उदयौ न सम्भवतस्तौ ह्युत्पत्त्यनन्तरमन्तर्मुहूर्त्ते गते सति भवतः, सास्वादन[भाव]श्चोत्पत्त्यनन्तरमुत्कर्षतः किञ्चिदूनषडावलिकामात्रम्। २९ उदयो देवनैरयिकाणां स्वस्थानगतानां पर्याप्तानां प्रथमसम्यक्त्वात् प्रच्यवमानानां प्राप्यते। तत्र देवस्यैकोनत्रिंशदुदये भङ्गाः ८, नैरयिकस्य १, सर्वसंख्यया ९। ३०उदयस्तिर्यग्मनुष्याणां पर्याप्तानां प्रथमसम्यक्त्वात् प्रच्यवमानानां देवानां चोत्तरवैक्रिये वर्त्तमानानां सास्वादनानां, तत्र तिरश्चां मनुष्याणां च ३० उदये प्रत्येकं ११५२, देवस्य ८, सर्वसंख्यया २३१२।

३१उदयस्तिर्यक्पञ्चेन्द्रियाणां पर्याप्तानां प्रथमसम्यक्त्वात् प्रच्यवमानानाम्, अत्र भङ्गाः ११५२।

उक्तरूपाया एव भङ्गसंख्याया निरूपणार्थमियं ***मन्तर्भाष्यगाथा*** →

***'बत्तीस दोन्नि अट्ठ य बासीयसया य पंच नव उदया । बारहिया तेवीसा एगब्भेकारस सया य' ॥***

[            ]

स्पष्टा। सर्वभङ्गसंख्यया ४०९७।

सासादनस्य द्वे सत्तास्थाने, तद्यथा→ ९२।८८। तत्र ९२ य आहारकचतुष्टयं बध्वा उपशमश्रेणितः प्रतिपतन् सासादनभावमुपगच्छति तस्य लभ्यते, न शेषस्याष्टाशीतिश्चतुर्गतिकानामपि सासादनानाम् ।

सम्प्रति संवेध उच्यते—तत्राष्टाविंशतिं बध्नतः सासादनस्य द्वे उदयस्थानानि, तद्यथा→३०।३१। अष्टाविंशतिर्हि सासादनस्य बन्धयोग्या स्याद् देवगतिविषया। न च करणाऽपर्याप्तः सासादनो देवगतिप्रायोग्यं बध्नाति, ततः शेषा उदया न सम्भवन्ति। तत्र मनुष्यमधिकृत्य ३० उदये द्वे अपि सत्तास्थाने, तिर्यक्पञ्चेन्द्रिय सास्वादनानधिकृत्याष्टाशीतिरेव, यतः ९२ उपशमश्रेणीतः प्रतिपततो लभ्यते, न च तिरश्चामुपशमश्रेणीसम्भवः। ३१ उदयेऽप्यष्टाशीतिरेव, यतः ३१ उदयस्तिर्यक्पञ्चेन्द्रियाणाम्, न च तिरश्चां द्विनवतिः सम्भवति। २९ तिर्यक्पञ्चेन्द्रियमनुष्यप्रायोग्यां बध्नतः सासादनस्य सप्ताप्युदय-स्थानानि, तत्रैकेन्द्रिय-विकलेन्द्रिय-तिर्यक्पञ्चेन्द्रिय-मनुष्य-देव-नैरयिकाणां सासादनानां स्वीयस्वीयोद-यस्थानेषु वर्त्तमानानामेकमेव सत्तास्थानं ८८। नवरं मनुष्यस्य ३०उदये वर्त्तमानस्योपशमश्रेणीतः प्रतिपति(त)तः सास्वादनस्य ९२। एवं त्रिंशद्बन्धकस्यापि वक्तव्यं।

सम्प्रति सम्यग्मिथ्यादृष्टेर्बन्धोदयसत्तास्थानान्युच्यन्ते। द्वे बन्धस्थाने, तद्यथा→२८।२९। तत्र तिर्यग्मनुष्याणां मिश्राणां देवगतिप्रायोग्यमेव बन्धमायाति, ततस्तेषां २८।२९। मनुष्यगतिप्रायोग्यं बध्नतां देवनैरयिकाणामुदयस्थानानि ३, तद्यथा→२९।३०।३१। द्वे सत्तास्थाने, तद्यथा→९२।८८।

अधुना संवेध उच्यते। सम्यग्मिथ्यादृष्टेरष्टाविंशतिबन्धकस्य द्वे उदयस्थाने, तद्यथा→३० ।३१। एकैकस्मिन् उदयस्थाने द्वे सत्तास्थाने, तद्यथा→९२।८८। २९बन्धकस्यैकमुदयस्थानं २९। अत्रापि ते एव द्वे सत्तास्थाने।

तथा अविरतसम्यग्दृष्टेः ३ बन्धस्थानानि, तद्यथा→२८।२९।३०। तत्र तिर्यग्मनुष्याणामविरतानां देवगतिप्रायोग्यं बध्नतां २८, मनुष्याणां देवगतिप्रायोग्यं तीर्थकरसहितं बध्नतां २९, देवनैरयिकाणां मनुष्यगतिप्रायोग्यं बध्नतां २९, तेषामेव मनुष्यगतिप्रायोग्यं तीर्थकरसहितं बध्नतां ३०। उदयस्थानानि ८, तद्यथा→२१।२५।२६।२७।२८।२९।३०।३१। तत्र २१उदयो नैरयिकतिर्यक्पञ्चेन्द्रियमनुष्यदेवानाश्रित्यावसेयो, [यतः] क्षायिकसम्यग्दृष्टेःपूर्वबद्धायुष्कस्यैतेषु सर्वेष्वपि तस्य सम्भवात्। अविरतश्चाऽपर्याप्तेषु मध्ये नोत्पद्यते, ततोऽपर्याप्तोदयवर्जाः शेष भङ्गा २५ द्रष्टव्याः। २५।२७ उदयौ देव-नैरयिकान् वैक्रियतिर्यग्मनुष्यांश्चाश्रित्यावसेयौ। तत्र नैरयिकः क्षायिकसम्यग्दृष्टिर्वेदकसम्यग्दृष्टिर्वा देवस्त्रिविधः सम्यग्दृष्टिरपि। २६ उदयस्तिर्यग्मनुष्याणां क्षायिकवेदकसम्यग्दृष्टीनाम्, औपशमिकसम्यग्दृष्टिस्तिर्यग्मनुष्येषु मध्ये नोत्पद्यते। वेदकसम्यग्दृष्टिता च तिरश्चो द्वाविंशतिसत्कर्मणोऽवगन्तव्या। २८।२९ उदयौ नैरयिक-वैक्रिय तिर्यग्मनुष्य-प्राकृततिर्यग्मनुष्यदेवानां। ३०उदयस्तिर्यक्पञ्चेन्द्रियमनुष्यदेवानाम्। ३१ उदयस्तिर्यक्पञ्चेन्द्रियाणाम्। सत्तास्थानानि ४, तद्यथा→९३।९२।८९।८८। तत्र योऽप्रमत्तसंयतोऽपूर्वकरणो वा तीर्थकराहारकसहितां ३१ बध्वा पश्चादविरतसम्यग्दृष्टिर्देवो जातस्तमाश्रित्य ९३, यस्त्वाहारकं बध्वा परिणामपरावृत्त्या मिथ्यात्वमनुगम्य चतसृणां गतीनामन्यतमस्यां गतावुत्पन्नस्तस्य तत्र तत्र गतौ भूयोऽपि सम्यक्त्वं प्रतिपन्नस्य ९२, देव-मनुष्येषु मध्ये मिथ्यात्वमप्रतिपन्नस्यापि ९२ प्राप्यते। ८९ देव-नैरयिक-मनुष्याणामविरतानाम्, ते हि त्रयोऽपि तीर्थकरनाम समर्जयन्ति। ८८ चतुर्गतिकानामविरतसम्यग्दृष्टीनां। संवेधस्तु स्वयमभ्यूह्यः।

तथा देशविरतस्य द्वे बन्धस्थाने, तद्यथा→२८।२९। तत्र २८ मनुष्यस्य तिर्यक्पञ्चेन्द्रियस्य वा देशविरतस्य देवगतिप्रायोग्या। सैव तीर्थकरसहिता २९, सा च मनुष्यस्यैव, तिरश्चस्तीर्थकरसत्कर्माभावात्। उदयस्थानानि ६, तद्यथा→२५।२७।२८।२९।३०।३१। सत्तास्थानानि ४, तद्यथा→९३।९२।८९।८८। तत्र योऽप्रमत्तोऽपूर्वकरणो वा तीर्थकराहारकं बध्वा परिणामह्रासेन देशविरतो जातस्तस्य ९३। शेषाणां भावनाऽविरतसम्यग्दृष्टेरिव कार्या। संवेधस्तु सर्वत्रापि स्वयमभ्यूह्यः।

तथा प्रमत्तसंयतस्य द्वे बन्धस्थाने, तद्यथा→२८।२९। एते च देशविरतस्येव भावनीये। उदयस्थानानि ५, तद्यथा→२५।२७।२८।२९।३०। एतानि सर्वाण्यप्याहारकसंयतस्य वैक्रियसंयतस्य वाऽवगन्तव्यानि। ३०स्वभावस्थसंयतस्यापि। सत्तास्थानानि ४, तद्यथा→९३।९२।८९।८८।

तथाऽप्रमत्तसंयतस्य बन्धस्थानानि ४, तद्यथा→२८।२९।३०।३१। द्वे उदयस्थाने,

तद्यथा →२९।३०। तत्र २९ यो नाम पूर्वं प्रमत्तसंयतः सन्नाहारकं वैक्रियं वा निर्वर्त्य पश्चादप्रमत्त[संयतस्य] भावं गच्छति तस्य प्राप्यते। एवं ३० उदयोऽपि। स्वभावस्थस्याप्यप्रमत्तसंयतस्य ३० उदयः स्यात्। सत्तास्थानानि ४, तद्यथा→९३।९२।८९।८८।

तथाऽपूर्वकरणस्य ५ बन्धस्थानानि, तद्यथा→२८।२९।३०।३१।१ तत्रैका तु यशः-कीर्त्तिः, सा च देवगतिप्रायोग्यबन्धव्यवच्छेदे सत्यवगन्तव्या। एकमुदयस्थानं ३०, अत्र वज्रर्षभनाराचसंहनन-षट्संस्थानसुस्वरदुःस्वरप्रशस्ताप्रशस्तविहायोगतिभिर्भङ्गाः २४। *अन्ये त्वाचार्या* ब्रुवते→आद्यसंह-ननत्रयान्यतरसंहननयुक्ता अप्युपशमश्रेणिं प्रतिपद्यन्ते, *तन्मतेन* भङ्गाः ७२। एवमनिवृत्तिबादरसूक्ष्म सम्परायोपशान्तमोहेष्वपि द्रष्टव्यम्। सत्तास्थानानि ४, तद्यथा→९३।९२।८९।८८। तथाऽनिवृत्तिबादरस्यै-कैकं बन्धस्थानं यशःकीर्त्तिः, एकमुदयस्थानं ३०, अष्टौ सत्तास्थानानि ९३।९२।८९।८८।८०।७९।७६।७५। तत्राद्यानि ४ उपशमश्रेण्यां क्षपकश्रेण्यां वा यावन्नामत्रयोदशकं न क्षीयते, त्रयोदशसु च नामसु यथाक्रमं विनिवत्यादेः क्षीणेषूपरितनानि ४ सत्तास्थानानि स्युर्बन्धोदयसत्तास्थानभेदाभावादत्र संवेधो न स्यात्।

तथा सूक्ष्मसम्परायस्याऽनिवृत्तिबादरस्यैवावगन्त्यानि।

तथा छद्मस्थजिना उपशान्तमोहाः क्षीणमोहाश्च, केवलिजिनाः सयोगिकेवलिनोऽयो-गिकेवलिनश्च। तत्रोपशान्तमोहस्यैकमुदयस्थानम् ३०। सत्तास्थानानि ४, तद्यथा→९३।९२।८९।८८। क्षीणकषायस्यैकमुदयस्थानं ३०, अत्र भङ्गाः २४। वज्रर्षभनाराचसंहननयुक्तस्यैव क्षपकश्रेण्यारम्भ-कत्वम्, तत्रापि तीर्थकरसत्कर्मणः क्षीणमोहस्य सर्वं संस्थानादि प्रशस्तमित्येक एव भङ्गः। सत्तास्था-नानि ४, तद्यथा→८०।७९।७६।७५। तत्र ७९।७५। अतीर्थकरसत्कर्मणः। शेषे तु तीर्थकरसत्कर्मणः।

सयोगिकेवलिनः ८ उदयस्थानानि, तद्यथा→२०।२१।२६।२७।२८।२९।३०।३१। सत्तास्थानानि ४, तद्यथा→८०।७९।७६।७५। अयोगिकेवलिनो द्वे उदयस्थाने, ९।८। सत्तास्थानानि ६, तद्यथा→८०।७९।७६।७५।९।८। तदेवं गुणस्थानेषु बन्धोदयसत्तास्थानान्युक्तानि ॥५०॥५१॥

साम्प्रतं गत्यादिमार्गणास्थानेषु तानि चिन्तयन्नाह —

**दो छक्कट्ठ चउक्कं पण नव एक्कार छक्कगं उदया।**
**नेरइआइसु संता ति पंच एक्कारस चउक्कं ॥५२॥**

दो० नैरयिकतिर्यग्मनुष्यदेवानां यथाक्रमं द्वे षडष्टौ चत्वारि बन्धस्थानानि। तत्र

नैरयिकाणामिमे द्वे→२९।३०। तिरश्चां षट्→२३।२५।२६।२८।२९।३०। नराणामष्ट→२३।२५।२६।२८।२९।३०।३१।१। देवानां चत्वारि २५।२६।२९।३०। तथा नारकाणामुदयस्थानानि पञ्च→२१।२५।२७।२८।२९। तिरश्चां नव→२१।२४।२५।२६।२७।२८।२९।३०।३१। नराणामेकादश→२०।२१।२५।२६।२७।२८।२९।३०।३१।९।८। देवानां षट्→२१।२५।२७।२८।२९।३०। तथा नारकाणां सत्तास्थानानि त्रीणि→९२।८९।८८। तिरश्चां पञ्च→९२।८८।८६।८०।७८। नराणामेकादश→९३।९२।८९।८८।८६।८०।७९।७६।७५।९।८। देवानां चत्वारि→९३।९२।८९।८८। संवेधस्तु स्वयमभ्यूह्यो, विस्तरभयान्न लिख्यते ॥५२॥

सम्प्रतीन्द्रियमाश्रित्याभिधीयते —

**इग विगलिंदिय सगले पण पंच य अट्ठ बंधट्ठाणाणि।**
**पण छक्केक्कारुदया पण पण बारसय संताणि ॥५३॥**

इग० एकेन्द्रियविकलेन्द्रियपञ्चेन्द्रियाणां यथाक्रमं बन्धस्थानानि→ पञ्च पञ्च अष्टौ। तत्रैकन्द्रियाणाममूनि पञ्च→२३।२५।२६।२९।३०। विकलेन्द्रियाणां त्रयाणामपीमान्येव पञ्च। पञ्चेन्द्रियाणां सर्वाण्यपि बन्धस्थानानि। तथैकेन्द्रियाणां पञ्चोदयस्थानानि→२१।२४।२५।२६।२७। विकलानां षट्→२१।२६।२८।२९।३०।३१। पञ्चेन्द्रियाणामेकादश→२०।२१।२५।२६।२७।२८।२९।३०।३१।९।८। तथैकेन्द्रिय - विकलेन्द्रियाणां सत्तास्थानानि पञ्च→९२।८८।८६।८०।७८। पञ्चेन्द्रियाणां सर्वाण्यपि सत्तास्थानानि ॥५३॥

**इय कम्मपगइट्ठाणाइँ सुट्ठु बंधुदयसंतकम्माणं।**
**गइआइएहिं अट्ठसु चउप्पगारेण नेयाणि ॥५४॥**

इय० इत्युक्तेन प्रकारेण बन्धोदयसत्कर्मणां सम्बन्धीनि कर्मप्रकृतिस्थानानि सुष्ठु=अत्यन्तमुपयोगं कृत्वा गत्यादिभिश्चतुर्दशभिर्मार्गणास्थानैरष्टस्वनुयोगद्वारेषु— *'संतपय परूवणया'* [आ.नि. गा.१३] इत्यादिरूपेषु ज्ञातव्यानि। तत्र सत्पदप्ररूपणया संवेधो गुणस्थानेषु सामान्येनोक्तो, विशेषस्तु गतीरिन्द्रियाणि चाश्रित्यैतदनुसारेण काययोगादिष्वपि मार्गणास्थानेषु वक्तव्यः। शेषाणि तु द्रव्यप्रमाणाद्यनुयोगद्वाराणि *कर्मप्रकृतिप्राभृतादीन्* ग्रन्थान् सम्यक् परिभाव्य वक्तव्यानि, परमधुना तेषामभावाल्लेशतो-

ऽपि दर्शयितुं न शक्यन्ते। कथं पुनर्ज्ञातव्यानीत्याह-चतुःप्रकारेण=प्रकृतिस्थित्यनुभागप्रदेशरूपेण। तत्र प्रकृतिगतानि बन्धोदयसत्तास्थानानि प्राय उक्तानि। एतदनुसारेण स्थित्यनुभागप्रदेशगतान्यपि भावनीयानि। इह बन्धोदयसत्तास्थानसंवेधे=चिन्त्यमाने उदयग्रहणेनोदीरणापि गृहीता द्रष्टव्या, उदये सत्यवश्यमुदीरणाया अपि भावात् ॥५४॥

तथा चाह —

**उदयस्सुदीरणाए सामित्ताओ न विज्जइ विसेसो।**
**मोत्तूण य इगुयालं सेसाणं सव्वपगईणं ॥५५॥**

उद० इह कालप्राप्तानां कर्मपरमाणूनामनुभवनमुदयः। अकालप्राप्तानामुदयावलिकाबहिःस्थितानां कषायसहितेनाऽसहितेन वा योगसंज्ञकेन वीर्यविशेषेणोदयप्राप्तैः कर्मपरमाणुभिः सहाऽनुभवनमुदीरणाऽनयोः स्वामित्वमाश्रित्य नास्ति विशेषो, मुक्त्वा एकचत्वारिंशत्प्रकृतीः ॥५५॥

ताः प्रकृतीः आह —

**नाणंतरायदसगं दंसणनव वेयणिज्ज मिच्छत्तं।**
**सम्मत्तं लोभ वेयाउगाणि नवनाम उच्चं च ॥५६॥**

नाणं० पञ्चानां ज्ञानावरणप्रकृतीनां पञ्चानामन्तरायप्रकृतीनां चतसृणां चक्षुरचक्षुरवधिकेवलदर्शनावरणप्रकृतीनामुदय उदीरणा च सर्वजीवानां युगपत् तावत् प्रवर्तते यावत्क्षीणमोहगुणस्थानकाद्धाया आवलिकाशेषो न स्याद्, आवलिकायां तु शेषीभूतायामुदय एव नोदीरणा, आवलिकागतस्योदीरणानर्हत्वात्। निद्रापञ्चकस्य शरीरपर्याप्त्या पर्याप्तानां शरीरपर्याप्त्यनन्तरसमयादारभ्य यावदिन्द्रियपर्याप्तिपरिसमाप्तिर्नोपजायते तावदुदय एव नोदीरणा, शेषकालं तूदयोदीरणे युगपत्प्रवर्तेते युगपच्च निवर्तेते। द्वयोर्वेदनीययोः पुनः प्रमत्तगुणस्थानकं यावदुदय उदीरणा च प्रवर्तते, परस्तूदय एव नोदीरणा। तथा प्रथमसम्यक्त्वमुत्पादयतोऽन्तरकरणे कृते सति प्रथमस्थितावावलिकाशेषायां मिथ्यात्वस्योदय एव नोदीरणा। तथा वेदकसम्यग्दृष्टिना क्षायिकसम्यक्त्वमुत्पादयता सम्यग्मिथ्यात्वमिथ्यात्वयोः क्षपितयोः सम्यक्त्वं सर्वापवर्तनयाऽपवर्त्याऽन्तर्मुहूर्तस्थितिकं कृतम्, तत उदयोदीरणाभ्यामनुभूयमानमनुभूयमानमावलिकाशेषं यदा स्यात् तदा सम्यक्त्वस्योदय एव नोदीरणाऽथवोपशमश्रेणिं प्रतिपद्यमानस्यान्तरकरणे कृते सति प्रथमस्थितावा-

वलिकाशेषायां सम्यक्त्वस्योदय एव नोदीरणा। संज्वलनलोभस्योदय उदीरणा च युगपत् तावत्प्रवर्त्तेते यावत्सूक्ष्मसम्परायाद्धाया आवलिकाशेषस्तत आवलिकामात्रं कालमुदय एव नोदीरणा। तथा त्रयाणां वेदानामन्यतमेन तेन तेन वेदेन श्रेणिप्रतिपन्नस्यान्तरकरणे कृते तस्य तस्य वेदस्य प्रथमस्थिताववलिकाशेषायामुदय एव नोदीरणा। चतुर्णामप्यायुषां स्वस्वभवपर्यन्तावलिकायामुदय एव नोदीरणाऽन्यच्च मनुष्यायुषः प्रमत्तगुणस्थानकादूर्ध्वमुदीरणा न स्यात् किन्तूदय एव केवलः। तथा मनुष्यगति-पञ्चेन्द्रियजाति-त्रस-बादर-पर्याप्त-सुभगादेय-यशःकीर्त्ति-तीर्थंकररूपाणां नवनामप्रकृतीनामुच्चैर्गोत्रस्य च सयोगिकेवलिगुणस्थानकं यावद् युगपदुदयो- दीरणे, अयोग्यवस्थायां तूदय एव नोदीरणा ॥५६॥

सम्प्रति [कस्मिन्] गुणस्थानके काः प्रकृतीर्बध्नातीति बन्धविशेषनिरूपणार्थमाह—

**तित्थगराहारगविरहियाओ अज्जेइ सव्वपगईओ।**
**मिच्छत्तवेयगो सासणो वि इगुवीससेसाओ ॥५७॥**

तित्थ० मिथ्यात्ववेदको मिथ्यादृष्टिरतीर्थंकराहारकरहितास्तीर्थंकराहारक-शरीराहारकाङ्गोपाङ्गवर्जाः शेषाः सर्वा अपि प्रकृतीः ११७ संख्या अर्जयति=बध्नाति। तथा सासादनोऽप्येकोनविंशतिशेषाः=एकोनविंशतिवर्जाः शेषाः १०१प्रकृतीर्बध्नाति ॥५७॥

**छायालसेस मीसो अविरयसम्मो तियालपरिसेसा।**
**तेवण्ण देसविरओ विरओ सगवण्णसेसाओ ॥५८॥**

छाया० स्पष्टा ॥५८॥

अधुना प्रतिषेद्धव्याः प्रकृतयो बह्व्यो, बन्धयोग्यास्तु स्तोका इति बन्धयोग्या एवाह—

**इगुसट्ठिमप्पमत्तो बंधइ देवाउयस्स इयरो वि।**
**अट्ठावण्णमपुव्वो छप्पण्णं वा वि छव्वीसं ॥५९॥**

इगु० अप्रमत्त एकोनषष्टिप्रकृतीर्बध्नाति। तथेतरोऽप्यप्रमत्तोऽपि देवायुषो बन्धकः। एतेनैतत्सूच्यते—>प्रमत्तसंयत एवायुर्बन्धं प्रथमत आरभते, आरभ्य च कश्चिदप्रमत्तभावमपि गच्छति, तत एवमप्रमत्तोऽपि देवायुषो बन्धकः स्यात्। शेषव्याख्या *कर्मस्तवा*नुसारेण कर्त्तव्या ॥५९॥

बावीसा एगुणं बंधइ अट्ठारसंतमनियट्टी।
सत्तर सुहुमसरागो सायममोहो सजोगि त्ति ॥६०॥
एसो उ बंधसामित्तओघो गइयाइएसु वि तहेव।
ओहाओ साहिज्जा जत्थ जहा पयडिसब्भावो ॥६१॥

बावी० एसो० स्पष्टा(ष्टे) ॥६०॥६१॥

सम्प्रति किं सर्वा अपि प्रकृतयः सर्वासु गतिषु प्राप्यन्ते किं वा नेत्याह——

तित्थगरदेवनिरयाउगं च तिसु तिसु गईसु बोद्धव्वं।
अवसेसा पयडीओ हवंति सव्वासु वि गईसु ॥६२॥

तित्थ० स्पष्टा ॥६२॥

इह गुणस्थानकेषु प्राग्बन्धोदयसत्तास्थानसंवेध उक्तः, गुणस्थानकानि च प्राय उपशमश्रेणिगतानि क्षपकश्रेणिगतानि च, तत्र प्रथमत उपशमश्रेणिमाह——

पढमकसायचउक्कं दंसणतिग सत्तगा वि उवसंता।
अविरतसम्मत्ताउ जाव नियट्टित्ति नायव्वा ॥६३॥

पढ० प्रथमकषाया अनन्तानुबन्धिनो दर्शनत्रिकं एताः सप्तका अपि=सप्तापि प्रकृतय उपशान्ता अविरतगुणस्थानकादारभ्य यावदनिवृत्तिगुणस्थानं तावज्ज्ञातव्या। अपूर्वकरणवर्जाः शेषा यथायोगमुपशमका, अपूर्वकरणे त्वेता नियमत उपशान्ता एव लभ्यन्ते ।

तत्र प्रथमतोऽनन्तानुबन्धिनामुपशमनोच्यतेऽविरतसम्यग्दृष्टिदेशविरतविरतानामन्यतमोऽन्यतमस्मिन् योगे वर्त्तमानस्तेजःपद्मशुक्ललेश्याऽन्यतमलेश्यायुक्तः साकारोपयोगोपयुक्तोऽन्तःसागरोपमकोटाकोटीस्थितिकर्मा करणकालात्पूर्वमप्यन्तर्मुहूर्त्तं कालं यावदवदायमानचित्तसन्ततिरवतिष्ठते। तथा संक्ष परावर्त्तमानाः प्रकृतीः शुभा एव बध्नाति, नाशुभाः। अशुभानां च प्रकृतीनामनुभागं चतुःस्थानकं सन्तं द्विःस्थानकं करोति, शुभानां च द्विस्थानकं सन्तं चतुःस्थानकं। स्थितिबन्धे च पूर्णे पूर्णे सत्यन्यं स्थितिबन्धं पूर्वपूर्वस्थितिबन्धापेक्षया पल्योपमसंख्येयभागहीनं करोति।

इत्थमन्तर्मुहूर्त्तकालं यावदवस्थाय ततो यथाक्रमं त्रीणि करणानि प्रत्येकमान्तर्मौहूर्त्तिकानि करोति, तद्यथा—>यथाप्रवृत्तकरणमपूर्वकरणमनिवृत्तिकरणं, चतुर्थी तूपशान्ताद्धा।

तत्र यथाप्रवृत्तकरणे प्रविशन् प्रतिसमयमनन्तगुणवृद्ध्या विशुद्ध्या प्रविशति, पूर्वोक्तं शुभप्रकृतिबन्धादिकं तथैव तत्र कुरुते, न च स्थितिघातादिकं कुरुते, तद्योग्यविशुद्ध्यभावात्। प्रतिसमयं च नानाजीवापेक्षयाऽसंख्येयलोकाकाशप्रदेशप्रमाणान्यध्यवसायस्थानानि स्युः, षट्स्थानपतितानि च। अन्यच्च प्रथमसमयापेक्षया द्वितीयसमयेऽध्यवसायस्थानानि विशेषाधिकानि, एवं तावद्वाच्यं यावद् यथाप्रवृत्तकरणचरमसमयः तत्र प्रथमसमये जघन्या विशोधिः सर्वस्तोका, ततो द्वितीयसमये जघन्या विशोधिरनन्तगुणा, एवं तावद्वाच्यं यावद् यथाप्रवृत्तकरणाद्धायाः संख्येयो भागो गतः स्यात्। ततः प्रथमसमये उत्कृष्टा विशोधिरनन्तगुणा, ततोऽपि यतो जघन्यस्थानान्निवृत्तस्तस्योपरितनी जघन्या विशोधिरनन्तगुणा, ततो द्वितीयसमये उत्कृष्टा विशोधिरनन्तगुणा, तत उपरि जघन्या विशोधिरनन्तगुणा, एवमुपर्यधश्चैकैकं विशोधिस्थानमनन्तगुणतया तावन्नेयं यावद् यथाप्रवृत्तकरणस्य चरमसमये जघन्यं विशोधिस्थानम्। तत उत्कृष्टानि यानि विशोधिस्थानान्यनुक्तानि तिष्ठन्ति तानि निरन्तरमनन्तगुणया वृद्ध्या तावन्नेतव्यानि यावच्चरमसमये उत्कृष्टं विशोधिस्थानम्।

सम्प्रत्यपूर्वकरणमुच्यते- तत्राऽपूर्वकरणे प्रतिसमयमसंख्येयलोकाकाशप्रदेशप्रमाणान्यध्यवसायस्थानानि स्युः, प्रतिसमयं च षट्स्थानपतितानि। तत्र प्रथमसमये जघन्या विशोधिः सर्वस्तोका, सा च यथाप्रवृत्तकरणचरमसमयसत्कोत्कृष्टविशोधिस्थानादनन्तगुणा, ततः प्रथमसमयोत्कृष्टा एव विशोधिरनन्तगुणा, ततोऽपि द्वितीयसमये जघन्या विशोधिरनन्तगुणा, ततोऽपि तस्मिन्नेव द्वितीयसमये उत्कृष्टा विशोधिरनन्तगुणा, एवं प्रतिसमयं तावद्वाच्यं यावच्चरसमये उत्कृष्टा विशोधिः।

अस्मिंश्चापूर्वकरणे प्रथमसमये एव स्थितिघातो रसघातो गुणश्रेणिर्गुणसंक्रमोऽन्यश्च स्थितिबन्ध इति पञ्च पदार्था युगपत्प्रवर्त्तन्ते। तत्र स्थितिघातो नाम- स्थितिसत्कर्मणोऽग्रिमभागादुत्कर्षतः प्रभूतसागरोपमशतप्रमाणं जघन्यतः पल्योपमसंख्येयभागमात्रं स्थितिखण्डमुत्किरति=खण्डयतीत्यर्थः, उत्कीर्य च याः स्थितीरधो न खण्डयिष्यति तत्र तद्दलिकं प्रक्षिपति, अन्तर्मुहूर्त्तेन च कालेन स्थितिखण्डमुत्कीर्यते। ततः पुनरप्यधस्तात् पल्योपमसंख्येयभागमात्रं स्थितिखण्डमन्तर्मुहूर्त्तकालेनोत्किरति, पूर्वोक्तप्रकारेणैव च निक्षिपति। एवमपूर्वकरणाद्धायां प्रभूतानि स्थितिखण्डसहस्राणि व्यतिक्रामन्ति। तथा

च सत्यपूर्वकरणस्य प्रथमसमये यत्सत्कर्माऽऽसीत् तस्यैव चरमसमये संख्येयगुणहीनं जातम्।

रसघातो नाम-अशुभप्रकृतीनां यदनुभागसत्कर्म तस्यानन्ततमं भागं मुक्त्वा शेषाननुभागभागानन्तर्मुहूर्त्तेनैव कालेन विनाशयति। ततः पुनरपि तस्य प्राग्मुक्तस्यानन्ततमभागस्यानन्ततमं भागं मुक्त्वा शेषाननुभागभागानन्तर्मुहूर्त्तेन कालेन विनाशयति, एवमनेकाऽनुभागखण्डसहस्राण्येकस्मिन् स्थितिखण्डे व्यतिक्रामन्ति, तेषां च स्थितिखण्डानां सहस्रैरपूर्वकरणं परिसमाप्यते।

गुणश्रेणिर्नाम-अन्तर्मुहूर्त्तप्रमाणानां स्थितीनामुपरि याः स्थितयो वर्त्तन्ते तन्मध्याद्दलिकं गृहीत्वोदयावलिकाया उपरितनीषु स्थितिषु प्रतिसमयसंख्येयगुणतया निक्षिपति। तद्यथा→प्रथमसमये स्तोकं, द्वितीयसमयेऽसंख्येयगुणमेवं तावन्नेयं यावदन्तर्मुहूर्त्तचरमसमयस्तच्चाऽन्तर्मुहूर्त्तमपूर्वकरणाऽनिवृत्तिकरणकालाभ्यामनागतिरिक्त द्रष्टव्यम्। एष प्रथमसमयगृहीतदलिकस्य निक्षेपविधिरेवं द्वितीयादिसमयगृहीतानामपि दलिकानां निक्षेपो वाच्यः। अन्यच्च गुणश्रेणिरचनाय प्रथमसमये यद्दलिकं गृह्यते तत्स्तोकं, ततोऽपि द्वितीयसमयेऽसंख्येयगुणमेवं तावज्ज्ञेयं यावद् गुणश्रेणिकरणचरमसमय अपूर्वकरणसमयेष्वनिवृत्तिकरणसमयेषु चानुभवतः क्रमशः क्षीयमाणेषु गुणश्रेणिदलिकनिक्षेपः शेषे शेषे भवति, उपरि च न वर्द्धते।

गुणसङ्क्रमो नामाऽपूर्वकरणस्य प्रथमसमयेऽनन्तानुबन्ध्यादीनामशुभप्रकृतीनां दलिकं यत्परप्रकृतिषु सङ्क्रामयति तत्स्तोकं, ततो द्वितीयसमये परप्रकृतिषु सङ्क्रम्यमाणमसंख्येयगुणमेवं तृतीयादिष्वपि वक्तव्यम्।

अन्यः स्थितिबन्धो नाम-अपूर्वकरणस्य अन्य[१] एवाऽपूर्वः स्तोकः स्थितिबन्ध आरभ्यते। स्थितिबन्ध-स्थितिघातौ च युगपदाराभ्येते युगपदेव च निष्ठां यातः। एवमेते पञ्च पदार्था अपूर्वकरणे प्रवर्तन्ते।

अनिवृत्तिकरणं नाम यत्र प्रविष्टानां सर्वेषामपि तुल्यकालानामेकमेवाध्यवसायस्थानम्। नवरं प्रथमसमयभाविविशोधिस्थानापेक्षया द्वितीयसमयभाविविशोधिस्थानमनन्तगुणमेवं तावद्वाच्यं यावदनिवृत्तिकरणचरमसमयोऽत एवास्मिन् प्रविष्टानां तुल्यकालानामसुमतां सम्बन्धिनामध्यवसायस्थानानां परस्परं निवृत्तिर्व्यावृत्तिर्नास्तीत्यनिवृत्तिरिति नाम। अस्मिंश्चानिवृत्तिबादरकरणे यावन्तः समयास्तावन्त्यध्यवसायस्थानानि पूर्वस्मात् पूर्वस्मात् अनन्तगुणवृद्धानि। अत्रापि चाऽऽद्यसमयादेवारभ्य पूर्वोक्ताः पञ्च पदार्था

१-ऽणस्य प्रथमसमयेऽन्य-पा०।

युगपत्प्रवर्तन्तेऽनिवृत्तिकरणाद्धायाश्च संख्येयतमेषु भागेषु गतेष्वेकस्मिन् भागेऽवतिष्ठमानेऽनन्तानुबन्धिनामध-स्तादावलिकामात्रं मुक्त्वाऽन्तर्मुहूर्तप्रमाणमन्तरकरणमभिनवस्थितिबन्धकाद्धासमेनान्तर्मुहूर्तप्रमाणेन कालेन करोति, अन्तरकरणसत्कं च दलिकमुत्कीर्यमाणं परप्रकृतिषु बद्ध्यमानासु प्रक्षिपति, प्रथमस्थितिगतं च दलिकमावलिकामात्रं वेद्यमानासु परप्रकृतिषु स्तिबुकसङ्क्रमेण सङ्क्रमयति। अन्तरकरणे कृते सति द्वितीये समयेऽनन्तानुबन्धिनामुपरितनस्थितिगतं दलिकमुपशमयितुमारभते। तद्यथा→प्रथमसमये स्तोकमुपश-मयति, द्वितीयसमयेऽसंख्येयगुणमेवं यावदन्तर्मुहूर्तमेतावता च कालेन साकल्यतोऽनन्तानुबन्धिन उपशमिताः स्युः। उपशमिता नाम-यथा रेणुनिकरः सलिलबिन्दुनिवहैरभिषिच्य अभिषिच्य द्रुघणादिभिर्निःकुट्टितो निःस्यन्दः स्यात्, तथा कर्मरेणुनिकरोऽपि विशोधिजलेन परिषिच्य परिषिच्य अनिवृत्तिकरणरूपद्रुघण-निःकुट्टितः सङ्क्रमणोदयोदीरणानिधत्तिनिकाचनाकरणानामयोग्यः स्यात्।

*अन्ये त्वाचार्या* ब्रुवते-अनन्तानुबन्धिनामुपशमना न, किन्तु क्षपणैव। सा चैवं स्यात्→ इह श्रेणिमप्रतिपद्यमाना अपि अविरताश्चतुर्गतिका अपि वेदकसम्यग्दृष्टयो देशविरतास्तिर्यञ्चो मनुष्या वा सर्वविरता मनुष्या एव सर्वाभिः पर्याप्तिभिः पर्याप्ता अनन्तानुबन्धिनां क्षपणार्थं यथाप्रवृत्तादीनि त्रीणि करणानि कुर्वन्ति। करणवक्तव्यता च सर्वापि प्रागिव निरवशेषा द्रष्टव्या। नवरमिहानिवृत्तिकरणे प्रविष्टः सन्नन्तरकरणं न करोति, किन्तु *कर्मप्रकृत्यु*क्तस्वरूपेणोद्वलनासङ्क्रमेणाऽधस्तादावलिकामात्रं मुक्त्वोपरि निरवशेषाननन्तानुबन्धिनो विनाशयति। आवलिकामात्रं तु स्तिबुकसङ्क्रमेण वेद्यमानासु प्रकृतिषु सङ्क्रमयति। ततोऽनन्तरमन्तर्मुहूर्तात्परतोऽनिवृत्तिकरणपर्यवसाने शेषकर्मणां स्थितिघात-रसघात-गुणश्रेणयो न स्युः, किन्तु स्वभावस्थ एव स जीवो जायते।

तदेवमुक्तानन्तानुबन्धिनां विसंयोजनाऽधुना दर्शनत्रिकस्योपशमना भण्यते-तत्र मिथ्यात्व-स्योपशमना मिथ्यादृष्टेर्वेदकसम्यग्दृष्टेश्च। सम्यक्त्वसम्यग्मिथ्यात्वयोस्तु वेदकसम्यग्दृष्टेरेव। तत्र मिथ्यादृष्टे-र्मिथ्यात्वोपशमना प्रथमसम्यक्त्वमुत्पादयतः। सा चैवं→पञ्चेन्द्रियः संज्ञी सर्वाभिः पर्याप्तिभिः पर्याप्तः करणकालात्पूर्वमप्यन्तर्मुहूर्तकालं प्रतिसमयमनन्तगुणवृद्ध्या विशुद्ध्या प्रवर्तमानोऽभव्यसिद्धिकविशुद्ध्यपे-क्षयाऽनन्तगुणविशुद्धिको मतिश्रुताज्ञानविभङ्गज्ञानानामन्यतमस्मिन् साकारोपयोगे उपयुक्तोऽन्यतमस्मिन् योगे वर्तमानो जघन्यपरिणामेन तेजोलेश्यायां मध्यमपरिणामेन पद्मलेश्यायामुत्कृष्टपरिणामेन शुक्ललेश्यायां वर्तमानो मिथ्यादृष्टिश्चतुर्गतिकोऽन्तःसागरोपमकोटाकोटीस्थितिसत्कर्मा इत्यादि पूर्वोक्तं तावद्वाच्यं यावद्

यथाप्रवृत्तकरणमपूर्वकरणं च परिपूर्णं स्यान्नवरमिहापूर्वकरणे गुणसंक्रमो न वाच्यः, किन्तु स्थितिघात-रसघातस्थितिबन्ध-गुणश्रेणय एव वाच्याः, गुणश्रेणिदलिकरचनाऽप्युदयसमयादारभ्यावगन्तव्या। ततोऽनिवृत्तिकरणेऽप्येवमेव वाच्यम्। अनिवृत्तिकरणाद्धायाश्च संख्येयेषु भागेषु गतेषु सत्स्वेकस्मिन् संख्येयतमे भागेऽवशिष्टमानेऽन्तर्मुहूर्त्तमानमधो मुक्त्वा मिथ्यात्वस्यान्तरकरणमन्तर्मुहूर्त्तप्रमाणं प्रथमस्थितेः किञ्चित्समधिकमभिनवस्थितिबन्धाद्धासमेनाऽन्तर्मुहूर्त्तेन कालेन करोति। अन्तरकरणसत्कं च दलिकमुत्कीर्य प्रथमस्थितौ द्वितीयस्थितौ च प्रक्षिपति। प्रथमस्थितौ च वर्त्तमान उदीरणाप्रयोगेण यत्प्रथमस्थितिगतं समाकृष्योदये प्रक्षिपति सा उदीरणा। यत्पुनर्द्वितीयस्थितेः सकाशादुदीरणाप्रयोगेणैव दलिकं समाकृष्योदये प्रक्षिपति स आगाल, उदीरणाया एव विशेषप्रतिपत्त्यर्थमागाल इति द्वितीयं नाम। उदयोदीरणाभ्यां च प्रथमस्थितिमनुभवन् तावद्गतो यावदावलिकाद्विकं शेषं तिष्ठति, तस्मिंश्च स्थिते आगालो व्यवच्छिद्यतेऽत उदीरणैव केवला प्रवर्त्तते, साऽपि तावद् यावदावलिकाशेषो न स्यात् ततः केवलेनैवोदयेनावलिकामात्रमनुभवति। आवलिकामात्रचरमसमये द्वितीयस्थितिगतं दलिकमनुभागभेदेन त्रिधा करोति, तद्यथा—सम्यक्त्वं सम्यग्मिथ्यात्वं मिथ्यात्वं च। ततोऽनन्तरसमये मिथ्यात्वदलिकस्योदयाभावादौपशमिकं सम्यक्त्वमवाप्नोति। एष च सम्यक्त्वप्रथमलाभो मिथ्यात्वस्य सर्वोपशमनात् स्यात्। सम्यक्त्वं चेदं प्रतिपद्यमानः कश्चिद्देशविरतिसहितं प्रतिपद्यते, कश्चित्सर्वविरतिसहितम्। ततो देशविरतप्रमत्ताप्रमत्तसंयतेष्वपि मिथ्यात्वमुपशान्तं लभ्यते।

सम्प्रति वेदकसम्यग्दृष्टेर्दर्शनत्रयस्योपशमनाविधिरुच्यते- इह वेदकसम्यग्दृष्टिः संयमे वर्त्तमानः सन्नन्तर्मुहूर्त्तमात्रेण कालेन दर्शनत्रयमुपशमयति, उपशमयतश्च करणत्रयविधिः पूर्ववत् तावद्वाच्यो यावदनिवृत्तिकरणाद्धायाः संख्येयेषु भागेषु गतेषु सत्स्वन्तरकरणं करोति, तच्च कुर्वन् सम्यक्त्वस्य प्रथमस्थितिमन्तर्मुहूर्त्तप्रमाणां स्थापयति, मिथ्यात्वमिश्रयोश्चावलिकामात्रमुत्कीर्यमाणं च दलिकं त्रयाणामपि सम्यक्त्वस्य प्रथमस्थितौ प्रक्षिपति, मिथ्यात्वमिश्रयोः प्रथमस्थितिदलिकं सम्यक्त्वप्रथमस्थितिदलिकमध्ये स्तिबुकसङ्क्रमेण सङ्क्रमयति, सम्यक्त्वस्य पुनः प्रथमस्थितौ विपाकानुभवनः क्रमेण क्षीणायामौपशमिकसम्यग्दृष्टिः स्यादुपरितनदलिकस्य चोपशमना त्रयाणामपि मिथ्यात्वादीनामनन्तानुबन्धिनामुपरितनदलिकस्यैव ज्ञेया। एवमन्येषामप्युपशमना विस्तरभयान्न लिख्यतेऽन्तरकरणं च कृत्वा नपुंसकवेदमुपशमयति, तस्मिंश्चोपशान्तेऽष्टौ कर्माण्युपशान्तानि जातानि। स्त्रीवेदे उपशान्ते ९। हास्यादिषट्कोपशान्तौ १५। तस्मिन्नेव च समये पुरुषवेदस्य बन्धोदयोदीरणाव्यवच्छेदः। पुरुषवेदे चोपशान्ते १६। ततोऽप्रत्याख्यान-प्रत्याख्यानावरणक्रोधयोरुपशान्तौ १८। ततः संज्वलनक्रोधोपशान्तौ च १९। अप्रत्याख्यानप्रत्याख्यानमा-

नोपशान्तौ २१। संज्वलनमानोपशान्तौ २२। ततोऽप्रत्याख्यानप्रत्याख्यानावरणमायोपशान्तौ २४। संज्वलनमायोपशान्तौ २५। तदेवमनिवृत्तिबादरे सप्तभ्य आरभ्य पञ्चविंशतिं यावदुपशान्तानि कर्माणि लभ्यन्ते ॥६३॥

तथा चाह—

**सत्तट्ठ नव य पनरस सोलस अट्ठारसे[1] इगुवीसा ।**
**एगाहि दु चउवीसा पणवीसा बायरे जाण ॥६४॥**

स्पष्टा । अत्राप्यप्रत्याख्यानप्रत्याख्यानावरणलोभोपशान्तौ २७ कर्माण्युपशान्तानि स्युस्तानि च सूक्ष्मसम्पराये प्राप्यन्ते। आह च—

*'सत्तावीसं सुहुमे अट्ठावीसं पि मोहपयडीओ । उवसंतवीयरागे उवसंता होंति नायव्वा ॥'*
[ ]

सूक्ष्मसम्परायाद्धायाश्चान्तर्मुहूर्त्तप्रमाणायां प्रविष्टः सन् उपरितनस्थितेः सकाशात् कतिपयाः किट्टीः समाकृष्य प्रथमस्थितिं सूक्ष्मसम्परायाद्धातुल्यां करोति वेदयति च, शेषं सूक्ष्मकिट्टीकृतं दलिकं समयद्वयोनाऽऽवलिकाद्विकबद्धं चोपशमयति। सूक्ष्मसम्परायाद्धायाश्चरमसमये संज्वलनलोभ उपशान्तः स्यात् । तत्समयमेव ज्ञानावरणपञ्चकदर्शनावरणचतुष्कान्तरायपञ्चकयशःकीर्त्युच्चैर्गोत्राणां [बन्ध]व्यवच्छेदस्ततोऽनन्तरसमये उपशान्तकषायः स्यात्। तस्मिंश्चाष्टाविंशतिरपि मोहनीयप्रकृतय उपशान्ता ज्ञातव्याः। उपशान्तकषायश्च जघन्येनैकं समयमुत्कर्षेण त्वन्तर्मुहूर्त्तं कालं यावत् तत ऊर्ध्वं नियमादसौ भवक्षयेणाद्धायेण वा प्रतिपतति, तत्राद्धाक्षयेण प्रतिपतन् यथैवारूढस्तथैव प्रतिपतति। यत्र यत्र बन्धोदयोदीरणा व्यवच्छिन्नास्तत्र तत्र प्रतिपतता सता ते आरभ्यन्ते। प्रतिपतंश्च तावत्प्रतिपतति यावत्प्रमत्तगुणस्थानम्। कश्चित्पुनस्ततोऽप्यधस्तनं गुणस्थानद्विकं याति, कोऽपि सास्वादनभावमपि। यः पुनर्भवक्षयेण प्रतिपतति स प्रथमसमये एव सर्वाण्यपि बन्धनादीनि करणानि प्रवर्त्तयति।

उत्कर्षतश्चैकस्मिन् भवे द्वौ वारावुपशमश्रेणिं प्रतिपद्यते, तस्य नियमात् तस्मिन् भवे क्षपकश्रेण्यभावः। यः पुनरेकं वारं प्रतिपद्यते तस्य क्षपकश्रेणिः स्यादपि। *आगमाभिप्रायेण* त्वेकस्मिन् भवे एकामेव श्रेणिं प्रतिपद्यते ॥६४॥

१- गाथेयं श्रीमलयगिरिपादैः मूलतया नोपात्ता।

क्षपकश्रेणिमाह—

**पढमकसायचउक्कं एत्तो मिच्छत्तमीससम्मत्तं।**
**अविरय देसे विरए पमत्ति अपमत्ति खीयंति॥६५॥**

पढ० इह यः क्षपकश्रेणिमारभते सोऽवश्यं नरो वर्षाष्टकस्योपरि वर्त्तमानः। स च प्रथमतोऽनन्तानुबन्धिनो विसंयोजयति। तद्विसंयोजना प्रागेवोक्ता। ततो मिथ्यात्वमिश्रसम्यक्त्वानि युगपत्क्षपयति। इह यदि बद्धायुः क्षपकश्रेणिमारभतेऽनन्तानुबन्धिनां च क्षयानन्तरं मरणसम्भवतो व्युपरमते, ततः कदाचिन्मिथ्यात्वोदयाद् भूयोऽप्यनन्तानुबन्धिन उपचिनोति, तद्बीजस्य मिथ्यात्वस्याऽविनाशात्। क्षीणमिथ्यादर्शनस्तु नोपचिनोति। क्षीणसप्तकस्त्वप्रतिपतितपरिणामोऽवश्यं त्रिदशेषूत्पद्यते। प्रतिपतितपरिणामस्तु नानापरिणामसम्भवाद् यथापरिणाममन्यतमस्यां गतावुत्पद्यते। बद्धायुष्कोऽपि यदि तदानीं न कालं करोति तथापि सप्तके क्षीणे नियमादवतिष्ठते, न तु चारित्रमोहक्षपणाय यत्नमारभते, तथा क्षीणसप्तको यदि देवगतिं नरकगतिं वा सङ्क्रामति ततो देवभवान्तरितो नरकभवान्तरितो वा तृतीयभवे मोक्षं याति। अथ तिर्यक्षु मनुष्येषु वा मध्ये उत्पद्यते तर्हि सोऽवश्यमसंख्येयवर्षायुष्केषु, ततस्तद्भवादनन्तरं देवभवे, तस्माच्च देवभवाच्च्युत्वा मनुष्यभवे, ततो मोक्षं यातीति तुर्ये भवे मोक्षगमनम्।

एतानि च सप्तकर्माणि क्षपयत्यविरतसम्यग्दृष्टिर्देशविरतः प्रमत्तो वाऽप्रमत्तो वा, तत एतेषु सप्तकक्षयः प्राप्यते। यदि पुनरबद्धायुः क्षपकश्रेणिमारभते ततः सप्तके क्षीणे नियमादनुपरतपरिणाम एव चारित्रमोहनीयक्षपणाय यत्नमारभते, तच्च क्षपयितुं यतमानो यथाप्रवृत्तादीनि त्रीणि करणानि करोति, एषां स्वरूपं प्राग्वत्। नवरमिह यथाप्रवृत्तकरणमप्रमत्तगुणस्थाने द्रष्टव्यम्, अपूर्वकरणमपूर्वगुणस्थानेऽनिवृत्त्यनिवृत्तिबादरे। तत्राऽपूर्वकरणेऽप्रत्याख्यान-प्रत्याख्यानकषायाष्टकं तथा क्षपयति स्म यथाऽनिवृत्तिकरणाद्धायाः प्रथमसमये तत्पल्योपमासंख्येयभागमात्रस्थितिकं जातम्। अनिवृत्तिकरणाद्धायाश्च संख्येयेषु भागेषु गतेषु सत्सु स्त्यानर्द्धित्रिक-नरकद्विक-तिर्यक्द्विकैक-द्वि-त्रि-चतुरिन्द्रियजाति-स्थावराऽऽतपोद्योत-सूक्ष्म-साधारणरूपाणां षोडशप्रकृतीनां क्षयस्ततः पश्चात्कषायाष्टकमन्तर्मुहूर्त्तमात्रेण क्षपयति॥६५॥

तथा चाह—

**अनियट्टिबायरे थीणगिद्धितिगनिरयतिरियनामाओ।**
**संखेज्जइमे सेसे तप्पाओग्गाओ खीयंति॥६६॥**[१]

१- गाथेयं श्रीमलयगिरिसूरिभिः मूलतया नोपात्ता।

**इत्तो हणइ कसायट्ठगं पि पच्छा नपुंसगं इत्थी ।**
**तो नोकसायछक्कं छुब्भइ संजलणकोहम्मि ॥६७॥**[१]

आद्या स्पष्टा, इतः प्रकृतिषोडशक्षयानन्तरं निःशेषतः कषायाष्टकं हन्ति।

*अन्ये* पुनराहुः— षोडशकर्माण्येव पूर्वं क्षपयितुमारभते, केवलमपान्तराले ऽष्टौ कषायान् क्षपयति, पश्चात् षोडशकर्माणि। ततोऽन्तर्मुहूर्तमात्रेण नवानां कषायाणां चतुर्णां संज्वलनानामन्तरकरणं कृत्वा नपुंसकवेददलिकमुपरितनस्थितिगतमुद्वलनविधिना क्षपयितुमारभते, तच्चान्तर्मुहूर्तेन पल्योपमासंख्येयभागमात्रं जातं, ततः प्रभृति बद्ध्यमानासु प्रकृतिषु गुणसङ्क्रमेण दलिकं प्रक्षिपति। तच्चैवं प्रक्षिप्यमाणं प्रक्षिप्यमाणमन्तर्मुहूर्तेन निःशेषं क्षीणमधस्तनदलिकं च यदि नपुंसकवेदेन क्षपकश्रेणिमारूढस्ततोऽनुभवतः क्षपयति, अन्यथा त्वावलिकामात्रं तत् स्यात्, तच्च वेद्यमानासु प्रकृतिषु स्तिबुकसङ्क्रमेण सङ्क्रमयति। तदेवं क्षि(क्ष)पितो नपुंसकवेदस्ततोऽन्तर्मुहूर्तेन स्त्रीवेदोऽप्यनेनैव क्रमेण क्षि(क्ष)प्यते। ततः षड् नोकषायान् क्षि(क्ष)पयंस्तेषामुपरितनस्थितिगतं दलिकं संज्वलनक्रोधे क्षिपति न पुरुषवेदे। ते चैवं क्षिप्यमाणा अन्तर्मुहूर्तेन निःशेषाःक्षीणास्तत्समयमेव च पुंवेदबन्धोदयोदीरणाव्यवच्छेदः, समयोनावलिकाद्विकबद्धं मुक्त्वा शेषदलिकक्षयश्च। ततोऽसावधुनाऽवेदको जातः। एवं पुंवेदेन क्षपकश्रेणिं प्रतिपन्नस्य द्रष्टव्यम्। यदा तु नपुंसकवेदेन क्षपकश्रेणिं प्रतिपद्यते तदा पूर्वं स्त्रीवेदनपुंसकवेदौ युगपत्क्षपयति। तत्क्षयसममेव च पुंवेदस्य बन्धो व्यवच्छिद्यते। तदनन्तरमवेदकः सन् पुंवेदहास्यादिषट्कं युगपत्क्षपयति। यदा तु स्त्रीवेदेन प्रतिपद्यते तदा पूर्वं नपुंसकवेदम्, ततः स्त्रीवेदं, स्त्रीवेदक्षयसममेव च पुंवेदस्य बन्धव्यवच्छेदस्ततोऽवेदकः पुंवेदहास्यादिषट्कं युगपत्क्षपयति ॥६६॥६७॥

साम्प्रतं पुंवेदेन क्षपकश्रेणिमधिकृत्याह—

**पुरिसं कोहे कोहं माणे माणं च छुहइ मायाए।**
**मायं च छुहइ लोहे, लोहं सुहुमं पि तो हणइ ॥६८॥**

पुरुषं पुंवेदबन्धादौ व्यवच्छिन्ने सति गुणसंक्रमेण क्रोधे=संज्वलनक्रोधे सङ्क्रमयति। क्रोधस्यापि बन्धादौ व्यवच्छिन्ने तं क्रोधं संज्वलनमाने सङ्क्रमयत्येवं मानं मायायाम्, तां च संज्वलनलोभे, लोभस्यापि बन्धादौ व्यच्छिन्ने तं लोभं सूक्ष्ममपि, अपिशब्दाच्छेषमपि हन्ति= स्थितिघातादिभिर्विनाशयति। तस्मिंश्च विनाशिते क्षीणकषायः स्यात्। तस्य मोहनीयवर्जानां शेषकर्मणां स्थितिघातादयः पूर्ववत्प्रवर्तन्ते

१. गाथेयं श्रीमलयगिरिसूरिभिः मूलतया नोक्ता।

यावत्क्षीणकषायाद्धायाः संख्येयभागा गताः स्युः, एकः संख्येयभागोऽवतिष्ठते। तस्मिंश्च ज्ञानावरणपञ्चकद-र्शनावरणचतुष्कान्तरायपञ्चकनिद्राद्विकरूपाणां १६प्रकृतीनां स्थितिसत्कर्माऽपवर्त्य क्षीणकषायाद्धासमं करोति, ततस्तानि १६ कर्माणि क्षपकस्य निद्राया उदयाभावान्निद्राद्विकहीनानि वेदयते यावत्क्षीणकषा-याद्धाया द्विचरमसमयस्तस्मिंश्च निद्राद्विकं स्वरूपसत्तापेक्षया क्षीणं, १४ शेषकर्मणां चरमसमये क्षयः ॥६८॥

तथा चाह—

**खीणकसायदुचरिमे निद्दा पयला यह णइ छउमत्थो ।**
**आवरणमंतराए छउमत्थो चरिमसमयम्मि ॥६९॥**[१]

स्पष्टा । ततोऽनन्तरसमये सयोगिकेवली स्यात् । ततः स सूक्ष्मक्रियाप्रतिपातिध्यानमा-रोहति, तत्र वर्त्तमानः सन्नायुर्वर्जानि सर्वाण्यपि भवोपग्राहिकर्माणि तावदपवर्त्तयति यावत्सयोग्यवस्थाचरम-समयस्तस्मिंश्चौदारिकतैजसकार्मणसंबद्धबन्धन-संघातनसंस्थानषट्काद्यसंहननौदारिकाङ्गोपाङ्गवर्णादिच-तुष्कागुरुलघूपघातगतिद्विकप्रत्येकस्थिरास्थिरशुभाशुभ[सुस्वरदुःस्वर]निर्माणनाम्नामुदयोदीरणाव्यवच्छेद-स्ततोऽनन्तरसमयेऽयोगिकेवली सन् भवोपग्राहिकर्मक्षपणाय व्युपरतक्रियमप्रतिपातिध्यानमारोहति। तत्र यान्युदयवन्ति कर्माणि तान्यनुभवन् क्षपयत्यनुदयवन्ति च वेद्यमानासु प्रकृतिषु सङ्क्रमयन् वेदयमानस्तावद् यावदयोग्यवस्थाद्विचरमसमयः ॥६९॥

तत्रैताः क्षीयन्ते ।

**देवगइसहगयाओ दुचरमसमयभवियम्मि खीयंति ।**
**सविवागेयरनामा, नीयागोयं पि तत्थेव ॥७०॥**

देव० देवगत्या सह गता एता वैक्रियाहारकशरीरबन्धनसङ्घाताङ्गोपाङ्गदेवानुपूर्व्यस्तथा सविपाकाः=सोदया, इतरा=अनुदयवत्यश्चेमा→औदारिक-तैजस-कार्मणशरीरबन्धनसङ्घातसंस्थानषट्-कसंहननषट्कौदारिकाङ्गोपाङ्ग-वर्णादिचतुष्कमनुजानुपूर्वीपराघातोपघातागुरुलघुगतिद्विकप्रत्येकापर्याप्तो-च्छ्वासस्थिरास्थिरशुभाशुभसुस्वरदुःस्वरदुर्भगानादेयायशःकीर्त्तिनिर्माणम्, तथा नीचैर्गोत्रमपिशब्दादन्य-तरदनुदितं वेदनीयं। सर्वसंख्यया ४७ प्रकृतयो द्विचरमसमयभवसिद्धिके क्षीयन्ते ॥७०॥

---

१- गाथेयं मूलतया नोपात्ता श्रीमलयगिरिसूरिभिः ।

**अन्नयरवेयणीयं मणुयाउय उच्चगोय नव नामे ।**
**वेएइ अजोगिजिणो उक्कोस जहन्न एक्कारं ॥७१॥**

अन्न० सर्वसंख्यया १२ प्रकृतीर्वेदयतेऽयोगी । जघन्येन ११ तीर्थकरवर्जा द्रष्टव्या ॥७१॥

नव नामप्रकृतीराह—

**मणुयगइ जाइ तस बायरं च पज्जत्तसुभगमाइज्जं ।**
**जसकित्ती तित्थयरं नामस्स हवंति नव एया ॥७२॥**

मणु० स्पष्टा ॥७२॥

अत्रैवमतान्तरमाह—

**तच्चाणुपुव्विसहिया तेरस भवसिद्धियस्स चरिमम्मि ।**
**संतंसगमुक्कोसं जहन्नयं बारस हवंति ॥७३॥**

तच्चा० तृतीयानुपूर्वी=मनुष्यानुपूर्वी, तया सहिताः १२ प्रकृतय एव त्रयोदश सत्यो भवसिद्धिकस्य=[तद्भवमोक्षगामिनः, 'संतं सग'त्ति] सत्कर्मोत्कृष्टं स्याज्जघन्यं पुनः १२ प्रकृतयस्तीर्थोना द्रष्टव्याः ॥७३॥

अथ कस्मात् एवमिच्छन्तीत्यत आह—

**मणुयगइ सहगयाओ भवखित्तविवागजीववागत्ति ।**
**वेयणियन्नयरुच्चं च चरिम भवियस्स खीयंति ॥७४॥**

मणु० [मनुष्यगत्या सह यासां उदयस्ता मनुजगति सहगता। भवविपाका नरायुः, क्षेत्रविपाका मनुजानुपूर्वी, शेषा नव जीवविपाकाः, अन्यतरवेदनीयमुच्चैर्गोत्रं च, सर्वसंख्यया त्रयोदश प्रकृतयश्चरमसमये क्षीयन्ते।] *अन्ये [पूर्वमतानुसारिणः]* पुनराहुः—› मनुष्यानुपूर्व्या द्विचरमसमय एव सत्ताव्यवच्छेदः, उदयाभावात्। उदयवतीनां हि स्तिबुकसङ्क्रमाभावात् स्वस्वरूपेण चरमसमये दलिकं दृश्यत एवेति युक्तस्तासां चरमसमये सत्ताव्यवच्छेदः। आनुपूर्वीनाम्नां चतुर्णामपि क्षेत्रविपाकितया

भवान्तरालगतावेवोदयस्तेन न भवस्थस्य तदुदयसम्भवः। तदसम्भवाच्चाऽयोग्यवस्थाद्विचरमसमय एव मनुष्यानुपूर्व्याः सत्ताव्यवच्छेदः।

इत्थं चानेके कर्मक्षयं कृत्वा लोकान्ते गताः सन्तः सिद्धिसुखमनुभवन्ति ॥७४॥

तथा चाह—

**अह सुइयसयलजगसिहरमरुयनिरुवमसहावसिद्धिसुहं।**
**अनिहणमव्वाबाहं तिरयणसारं अणुहवंति ॥७५॥**

अह० अथेति कर्मक्षयादनन्तरं शुचिकं न रागादिदोषव्यामिश्रं [जगच्छिखरं=सकलसांसारिकसुखनिकुरम्बशेखरभूतं] त्रिरत्नसारं=ज्ञानादीनां सारं फलं [सिद्धिसुखं तत्र गता वेदयन्ति] ॥७५॥

इह बन्धादीनां संवेधश्चिन्तितः। सोऽपि सामान्येन, ततो विशेषजिज्ञासायामतिदेशमाह—

**दुरहिगमनिउणपरमत्थरुइरबहुभंगदिट्ठिवायाओ।**
**अत्था अणुसरियव्वा बंधोदयसंतकम्माणं ॥७६॥**

**जो जत्थ अपडिपुन्नो अत्थो अप्पागमेण बद्धो त्ति।**
**तं खमिऊण बहुसुया पूरेऊणं परिकहंतु ।७७॥**

दुर० जो० स्पष्टे ॥७६॥७७॥

॥ इति सप्ततिकाप्रकरणं समाप्तम् ॥

[लिपिकृत्प्रशस्तिः]

सं. १४६६ वर्षे मार्गसिर सुदि १२ लिखिता । पुस्करज्ञातीविप्रेण अनन्तेन । भारीसांपावारतव्य ।

[अवचूर्णिकृत्प्रशस्तिः]

श्रीमत्तपागणनभोर्कयुगोत्तमाभश्रीदेवसुन्दरगुरूत्तमपादुकानां ।
शिष्यैर्जिनागमसुधाम्बुधिलीनचित्तैः श्रीसूरिराजगुणरत्नमुनीन्द्रचन्द्रैः ॥१॥

नन्देषुमनुमिते १४५९ऽब्दे कर्मग्रन्थावचूर्णिरियमरचि ।
श्रीदेवेन्द्रगणेश्वरकृतविवृत्तेः स्वान्यहितहेतोः ॥२॥[1]

इति श्रीगुणरत्नसूरिकृतकर्मग्रन्थावचूर्णिः सम्पूर्णा ॥छ॥श्रीः॥२॥

ग्र. ३१००

## ॥ इति श्रीगुणरत्नसूरिविरचिता कर्मग्रन्थषट्कावचूर्णिः समाप्ता ॥

---

१. ०रिय श्री..., विवृत्तेः... हेतोः ॥ इति सप्ततिकावचूरिः सम्पूर्णा ॥छ॥छ॥ परमगुरुश्रीमुनिसुन्दरसूरिः ॥छः॥छ॥-ला०।
०रियं कृता श्री... वृत्ते..., हेतोः ॥ इति सप्ततिकावचूरिः सम्पूर्णा ॥पा०॥

# परिशिष्टं प्रथमम्

## अवचूर्ण्यन्तःप्रमाणतयोद्धृतानां शास्त्रीयावतरणानामकारादिक्रमेणानुक्रमणिका


| | पृष्ठ |
|---|---|
| अट्ठ चउ चउरट्ठगाय | १५७ |
| अट्ठच्छाहिगवीसा | १५३ |
| अट्ठट्ठी बत्तीसं | १५९ |
| अट्ठ य सय चोवट्ठि | [illegible] |
| अत्थि अणंता जीवा | ९४ |
| अदुसर | ७८ |
| अनुदीर्णमुदीर्णान्तः | ३२ |
| अव्वुच्छिन्नो उदओ | ७२ |
| एकदिग्गामिनी कीर्तिः | १५ |
| एगभवे दुखुत्तो | ९५ |
| एगसमयम्मि लोए | १०४ |
| एगिंदियाणं पुच्छा | ५७ |
| ओरालविउव्वाहार | १०७ |
| गइ इंदिए य काए | ३ |
| गम्ययपःकर्माधारे | २ |
| चउ छस्सु दोण्णि | १५३ |
| चउदंसणु | १०९ |
| चउ पणवीआ सोलस | १६१ |
| छट्ठीए नेरइओ | ९२ |
| छावट्ठी अयराणं | ९२ |
| जल्लेसे | ४५ |
| जो अदुगे | ७८ |
| जो उवसमसंढीए | ४७ |
| जोएण कम्मएणं | ५० |
| तत्तो असंखगुणिआ | १०८ |
| तद्यथेह प्रदीपस्य | ६ |
| तस बायर पज्जत्तं | ८०/९९ |
| ताणि मरणंते जया | १०८ |
| तिसु तित्थं | ३५ |
| थावरसुहुम | ८० |
| थोवा तसा य तत्तो | ५३ |
| दानपुण्यकृता कीर्तिः | १५ |
| दो वारे विजयाइसु | १०६ |
| न हु किंचि लभिज्ज | ३७ |
| नियलेऽसंखे ति | ७१ |
| पज्जत्तगसन्नियरे | १४९ |
| पज्जत्तापज्जत्तग | १५० |
| पणवीसाइ अबंधो | ९३ |
| पत्तेयमक्खराइं | १११ |
| परघाउस्सास | ७४ |
| पलिआइं तिन्नि | ९२ |
| पुव्वुत्त कालजोगो | ९२ |
| बत्तीस दोन्नि अट्ठ य | १६३ |
| बंधेण न वोलइ | ८६ |
| बेंदिअस्स दो नाणा | ५७ |
| बेंदिआणं भंते | ५७ |
| भाविनि भूतवदुपचारः | ५२ |
| मिच्छो भवपच्चयओ | ९२ |
| मीसे सम्मे सयरी | ३५ |
| विणिवारिय जा गच्छइ | ७५ |
| विरयनरभवंतरिओ | ९२ |
| वेएइ संतकम्मं | ११५ |
| सत्तावीसं सुहुमे | १५४ |
| सम्मत्तगुणनिमित्तं | ९५ |
| सम्मामिच्छदिट्ठी | ३५ |
| सव्वोवि अपज्जत्तो | ९१ |
| सा सजिण | ७८ |
| संखाइआओ खलु | ११२ |
| संजोयणा उ नियमा | ७३ |
| संतपयपरूवणया | ३/१६६ |
| हुंडं असंपत्तं | १३५ |

# द्वितीयं परिशिष्टम्

## अवचूर्ण्यन्तरुद्धृतानां ग्रन्थादिनाम्नां सूची


| | पृष्ठ |
|---|---|
| आगमाभिप्राय | १७४ |
| आचाराङ्ग | ३ |
| आवश्यक | २ / ८६ |
| उत्पादपूर्व | ४ |
| कर्मग्रन्थ | ५ / ७३ |
| कर्मग्रन्थवृत्ति | २० |
| कर्मप्रकृति | ७३ / १७२ |
| कर्मप्रकृतिप्राभृत | ११६ / १६७ |
| कर्मस्तव | ३६ / ३७ / ३८ / ३९ / ४० / १६८ |
| कालिकश्रुत | ३ |
| तन्मत | १६५ |
| दृष्टिवाद | ३ / १०७ |
| पञ्चसङ्ग्रह | ४५ / ७३ / ९४ |
| पाठान्तर | ८ |
| बृहच्छतकटीका | १०३ |
| भारत-रामायण | ३ |
| मतान्तर | ४८ / १२९ / १३० / १०७ / १५९ / १६० |
| शतकबृहच्चूर्णि | ४७ |
| शास्त्रान्तर | ६४ |
| सिद्धान्त | ६७ |
| स्वागत | १२९ |


# तृतीयं परिशिष्टम्

## अवचूर्ण्यन्तर्गतानां ग्रन्थकृदादिनाम्नां सूची


| | पृष्ठ |
|---|---|
| अनन्त | १८० |
| अन्ये | ६५ / १९३ / १२५ / १७२ / १७६ / १७८ |
| अपरे | २० / १३९ |
| अम्बड | ३८ |
| आचार्य | २८ / २० / १५३ / १५९ / १६५ / १७२ |
| कार्मग्रन्थिक | ४४ / ५७ / ९२ |
| केचित् | ४४ / ४७ / ८२ / १२८ |
| चूर्णिकृत | १५८ |
| गुणरत्नसूरि | १८० |
| तपागण | १८० |
| देवेन्द्रगुरु | १८० |
| देवेन्द्रसूरि | १८० |
| परममुनि | ५० |
| पुष्करज्ञाति | १८० |
| पूर्वमतानुसारिन् | १७८ |
| पूर्वाचार्य | ३९ |
| बाहुबलि | ७ |
| भारिसांपा | १८० |
| मल्लिस्वामिनी | १५८ |
| विष्णुकुमार | २८ / ३८ |
| वीरजिन | १९ |
| वृद्ध | १०६ |
| स्थूलभद्र | २८ |
| सैद्धान्तिक | ४८ / ८६ |


# चतुर्थं परिशिष्टम्

## अवचूर्णौ निर्देशितन्यायौ


| | पृष्ठ | | पृष्ठ |
|---|---|---|---|
| [illegible] भूतल [illegible]न्याय | ५२ | चौरमिलितसाधुन्याय | ७४ |
| | ८६ | | |